UNIVERSITY OF MYSORE

ORIENTAL LIBRARY PUBLICATIONS

SANSKRIT SERIES No. 56

स्मृतिचन्द्रिका

श्रीयाज्ञिकदेवणभट्टोपाध्यायविरचिता

आशौचकाण्डः

SMRITICHANDRIKA

ASAUCHA KÁNDA

BY

DEVANABHATTA

EDITED BY

R. SHAMA SASTRY, B.A., M.R.A.S.

[illegible]

MYSORE :

[illegible]D AT THE GOVERNMENT BRANCH PRESS

[illegible]

Price 1-8-0

UNIVERSITY OF MYSORE

ORIENTAL LIBRARY PUBLICATIONS

SANSKRIT SERIES No. 56

स्मृतिचन्द्रिका

श्रीयाज्ञिकदेवणभट्टोपाध्यायविरचिता

आशौचकाण्डः

-:-

SMRITICHANDRIKA

ASAUCHA KÁNDA

BY

DEVANABHATTA

EDITED BY

R. SHAMA SASTRY, B.A., M.R.A.S.,

Curator, Government Oriental Library, Mysore, Periodical Lecturer to the Post-graduates' Classes of the Calcutta University, and B. B. R. A. S. Campbell Memorial Medalist.

MYSORE.

PRINTED AT THE GOVERNMENT BRANCH PRESS

1921

Price 1-8-0

उपोद्घातः

संस्काराह्निकव्यवहारश्राद्धाशौचकाण्डेषु विभक्तायाः स्मृतिचन्द्रिकाया आशौचकाण्डोऽयमन्तिमो भागः साधु संकलितो मुद्रितोऽजनि। प्रायश्चित्तकाण्ड इत्यपरः काण्डो देवणभट्टेन प्रायेण व्यरचीति संभाव्यमानोप्यद्यापि नोपालभ्यत।

स्मृतिचन्द्रिकेयं परस्परविरुद्धस्मृत्यर्थसमन्वयैकप्रयोजना स्मृतिनिबन्धग्रन्थेष्वन्यतमा जागर्ति। हेमाद्रि–माधव–भट्टनीलकण्ठ–कमलाकरभट्ट–वैदिकसार्वभौम–वैद्यनाथदीक्षितादिभ्यो निबन्धकारेभ्यः स्मृतिचन्द्रिकाप्रणेता याज्ञिकदेवणभट्टोऽयं प्राचीन इति ज्ञायते। हेमाद्रिणा स्वीये श्राद्धकल्पे स्मृतिचन्द्रिकाकारस्य तात्पर्याण्यनूदितानि क्वचित्खण्डितानीति देवणभट्टो हेमाद्रेः पूर्वकालिक इति श्राद्धकाण्डोपोद्घाते सूचितम्।

"अस्ति शस्तगुणस्तोमः सोमवंशविभूषणम्।
महादेव इति ख्यातो राजराजेव भूतले॥
तस्यास्ति नाम हेमाद्रिः सर्वश्रीकरणप्रभुः।
निजोदारतया यश्च सर्वश्रीकरणप्रभुः॥"

इति स्वीयदानखण्डस्यारम्भे स्वाश्रयराजप्रशस्तिं स्वप्रशस्तिं च प्रशंसन् हेमाद्रिः 1260 तमात्क्रिस्ताब्दादा च 1271 तमात्क्रिस्ताब्दाद्देवगिरिमधिष्ठितस्य यादववंश्यस्य महादेवनृपतेस्सभायां धर्माधिकारिपदवीमारूढोऽभूदिति बाढं ज्ञायते।

"यत्तु चन्द्रिकाकारेणोक्तं सवर्णाभावे त्वसवर्णमपि शूद्रव्यतिरिक्तं निमन्त्रणाय प्रेषयेदिति तन्नारायणप्रोक्तवचनाविरोधा-

दुपेक्षणीयम् " इति श्राद्धकल्पे 1139 तमपत्रे हेमाद्रिणा कृता-त्स्मृतिचन्द्रिकाकारपरामर्शाद्देवणभट्टोऽयं तस्मात्प्राक्कालिक इति को वा संदिह्यात् ।

" व्याख्यातं ह्यन्यथा विज्ञानेश्वरपादैः—
मातरि पूर्वं प्रमीतायां तन्निमित्ताशौचमध्ये यदि पितुरुपरमस्स्यात् तदा न पूर्वेण शुद्धिः, किंतु पितुः प्रयाणनिमित्ताशौचशुद्धिः कार्या " इति विज्ञानेश्वरं गुरुत्वपुरस्कारातिशयद्योतकेन विज्ञा-नेश्वरपादशब्देन निर्दिश्य याज्ञवल्कीयाशौचकाण्डस्थस्य विंशति-तमश्लोकार्धस्य व्याख्या देवणभट्टेनानूदिता दृश्यते । ततश्चायं ग्रन्थकृत् विज्ञानेश्वरस्य प्रायेण शिष्यः प्रशिष्यो वाऽभूदिति संभाव्यते ।

> " नासीदस्ति भविष्यति क्षितितले कल्याणकल्पं पुरं
> नो दृष्टः श्रुत एव वा क्षितिपतिः श्रीविक्रमार्कोपमः ।
> विज्ञानेश्वरपण्डितो न भजते किंचान्यदन्योपम-
> श्चाकल्पं स्थिरमस्तु कल्पलतिकाकल्पं तदेतत्त्रयम् ॥ "

इति मिताक्षराख्यव्याख्यासमाप्तौ कल्याणपत्तनस्य तदधि-ष्ठातुर्विक्रमार्कस्य राज्ञस्तदाश्रितस्य स्वस्य चाकल्पस्थायिकीर्ति-प्रशस्तिमाशंसन् विज्ञानेश्वरः 1076 तमात्क्रिस्ताब्दादा च 1126 तमात्क्रिस्ताब्दात्कृतराज्यस्य चालुक्यवंश्यस्य कल्याणनिवासिनो विक्रमार्कस्य राज्ञस्समकालिकोऽभूदिति स्पष्टमाकलयते । ततश्च विज्ञानेश्वरस्य शिष्यः प्रशिष्यो वा देवणभट्टस्तत्कालिकः पञ्चा-शद्वत्सरैरुत्तरकालिको वेति वक्तुं शक्यते ।

देशभेदादाचारभेदस्तावत्तैत्तिरीयोपनिषदि शिक्षावल्ल्या-मित्थं दर्शितः—" अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा

वा स्याद् तत्र ब्राह्मणास्सम्मर्शिनः युक्ता आयुक्ताः अलूक्षा धर्मकामास्स्युः यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः" इति युगापरनामककालभेदाच्चाचारभेदः स्मृतिषु बहुधा प्रपञ्चितो दृश्यते। तथाच देशतः कालतश्चाचारेषु भिद्यमानेषु तादृशाचाराणां विहितत्वाविहितत्वप्रतिपादिकाः स्मृतयश्च बाढं भिद्येयुरेव। ततश्च स्मृतीनां परस्परविरोधः देशकालमतिभेदात्संजात इति वक्तुं शक्यते। निबन्धकारास्तु देशकालभेदेन स्मृत्यर्थसमन्वयं न कुर्वन्ति, किंतु –

मुहूर्तं जीवितो बालः पञ्चत्वं यदि गच्छति।
मातुश्शुद्धिर्दशाहेन सद्यश्शौचास्तु गोत्रिणः॥

इति बृहत्प्रचेतसो वचनस्य विरुद्धं "जातमृते मृतजाते वा सपिण्डानां दशाहम्" इति हारीतवचनं "शिशोर्नाभिच्छेदादूर्ध्वं मरणे वेदितव्यं" इति पदाध्याहारेणार्थान्तरं प्रकल्प्यार्थसमन्वयं स्मृतीनामैककण्ठ्यं च प्रतिपादयन्ति। एतादृशैककण्ठ्यप्रकल्पनाप्रवृत्तौ निबन्धृणां तत्तत्स्मृतिदेशकालभेदाज्ञानमेव मूलमिति प्रतिभाति। एतादृशार्थसमन्वयकल्पनावशाद्बहून्यनभ्युपगमनीयानि तात्पर्याणि दत्तावकाशानि भवन्ति। तथाहि—सर्वा अपि स्मृतयस्समानदेशकाला इत्येकं, स्मृतीनां प्रामाण्ये न तारतम्यमित्यपरं, "कलौ पाराशराः स्मृताः" इति वचने जागरूके सत्यपि प्रामाण्यविषये पाराशरस्मृतेः स्मृत्यन्तरादविशेष इति तृतीयं, स्मृत्युक्तास्सर्वेऽपि विधिनिषेधाः पुरेवाद्यापि कृतानुष्ठाना इत्यनभ्युपगमनीयार्थाभ्युपगम इति चतुर्थं पुरातनानामाचाराणां नैव ह्रासः नापि नवानां प्राप्तिरिति विप्रतिपन्नार्थाभ्युपगम इति पञ्चममित्यनेकविधानि तात्पर्याणि दत्तावकाशानि भवन्ति। न चैतादृशानि तात्पर्याण्यभ्युपगन्तुं शक्यन्ते। तथाच

स्मृतिनिबन्धॄणां समन्वयार्थयत्नः न साधु समालोचित इति भाति ।

तदित्थं निबन्धकाराणां समन्वययत्ने अनभ्युपगमनीयतात्पर्यप्रचारकेऽपि स यत्नोऽन्यथा सफल एव—कति स्मृतयः पुराऽऽसन्, कथं वा तासां पाठक्रमः प्रचलित इति संदेहः बहूनां निबन्धकाराणामनुवादपरीक्षया निरस्तो भवतीति ।

आशौचकाण्डस्यास्य शोधने द्वौ मातृकाकोशावुपयुक्तौ—No. 4338 तालपत्रात्मकमान्ध्रलिप्या लिखितमेतत्कोशागारस्थमशुद्धमेकं, राजकीयसरस्वतीभाण्डागारस्थं ग्रन्थलिप्या लिखितं शुद्धमपरम् ॥

R. SHAMA SASTRY.

श्रीः

स्मृतिचन्द्रिकायामाशौचकाण्डे

विषयानुक्रमणिका.

विषयः	पृष्ठसङ्ख्या.

विषयः	पृष्ठसङ्ख्या.
जन्मदाख्यदेवतायागकालः	10
कुमारप्रसवे नाभिच्छेदात्पूर्वं दानप्रतिग्रहादिष्वदोषः	11
समानोदकानां जननाशौचम्	11
सद्यश्शौचविधानमग्निहोत्रानुष्ठातृविषयम्	12
शावाशौचप्रकरणम्	13
अनुपात्तवर्णविशेषमाशौचं चातुर्वर्ण्यसाधारणम्	13
मृतजाते जातमृते वा अशौचम्	14
सूतकमध्यभवशिशुमरणाशौचविषयाणि	15
सूतकोपरिभवशिशुमरणाशौचविषयाणि	17
नामकरणात्पूर्वं शिशुमरणे	18
दन्तजननात्प्राङ्मरणे	18
उपनयनात्पूर्वं मरणे	18
शिशुमरणे शरीरसंस्काराशौचविषयाणि	19
मृतविषये खननदाहादिनिर्णयः	20
अनतीतद्विवर्षस्य खनने विशेषः	20
अनुगमनम्	21
द्विवर्षमरणे	21
चाण्डालाद्यग्निनिषेधः	22
उदकदानस्याग्निसंस्कारानुविधायित्वम्	23
त्रिवर्षमरणे	24
अकृतचूडस्याप्यग्निसंस्कारे आशौचम्	25
प्रस्तुताग्निहोत्राद्यनुष्ठानविषये सद्यश्शौचम्	26
अत्र वाक्यान्तरविरोधपरिहारः	27
स्त्रीप्रजामरणाशौचविषयाणि	29
कृतचूडकन्यामरणे आशौचम्	29

अशुद्धशोधनम्.

पृष्टे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
4	12	ज्ञापितुं	ज्ञापयितुं
11	21	समानोदकाना	समानोदकानां
12	11	घ्रातृविंयं	घ्रातृविषयं
13	4	स्वाध्योपेत	स्वाध्यायोपेत
22	13,17	काष्ठावत्	काष्ठवत्
25	11	क्रियमाणाग्निऽऽसंस्कार	क्रियमाणाऽऽग्निसंस्का॰
26	19	ऊर्द्धिवर्षे	ऊनद्विवर्षे
28	8	निखनेन	निखनने
30	16	प्रात्ताप्रत्तासु	प्रत्ताप्रत्तासु
30	17	त्रितरात्रं	त्रिरात्रं
32	3	स्मान्मृतके	स्यान्मृतके
32	12	त्वंसस्कृता	त्वसंस्कृता
33	10	व्यवस्थाया	व्यवस्थया
35	8	यौवेन	यौवने
38	11	प्रमिणा	प्रामिणा
40	16	यस्तास्त्रा	यस्यास्त्रा
49	1	शब्दस्स	शब्दस्य
49	7	पुर्वोक्त	पूर्वोक्त
50	7	दर्वार्ग	दर्वाग
50	9	श्रुध्यति	शुध्यति

पुटे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
50	15	सूत्रागता	सूत्रगता
51	20	त्वाशोचे	त्वाशौचे
55	3	आद्र	आर्द्र
56	10	दूर्ध्वमति	दूर्ध्वमपि
59	7	मारभ्य	मारभ्य
64	2	मरणोशोच	मरणाशौच
81	1	येज्ञपाश्वः	यज्ञपार्श्वः
87	5	ज्येष्ठे सन्निहिते	ज्येष्ठेऽसन्निहिते
88	1	तदेवा	तदेव
114	8	स्रान	स्थान
136	10	स्ववन्त्रं	स्वतन्त्रं
137	11	समिद्वेऽगौ	समिद्वेऽग्नै
137	15	पीतिकरं	प्रीतिकरं
163	12	संवस्तरं	सवत्सरं
166	5	यज्ञज्ञवत्	यज्ञवत्
169	15	क्लीबैश्र	क्लीबैर्न
170	13	हति	इति
199	11	मान्मुयु:	माप्नुयु:

श्रीः.

स्मृतिचन्द्रिकायां आशौचकाण्डः.

अथाशौचकालादौ कर्तव्यैकोद्दिष्टादिश्राद्धस्य निरूपणार्थ-माशौचप्रकरणमारभ्यते ।

तत्र शङ्खः—

दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च ।
प्रेतपिण्डक्रियावर्जमाशौचे विनिवर्तयेत् ॥

सपिण्डादिजनने मरणे वा यदप्रायत्यं दानादिधर्मेष्वयोग्यत्व-लक्षणं पापविशेषात्मकं वा भवति तदाशौचशब्देन बोद्धव्यम् । अयमेवाशौचशब्दार्थ इत्युपदिष्टः। अदूरे भट्टाचार्यग्रन्थसंवादे दृढीकरिष्यामः । एवंविधाशौचे वर्तमाने प्रेतोपकारकपिण्ड-क्रियाव्यतिरिक्तपितृकर्मदानप्रतिग्रहादिकं च न कुर्यादित्यर्थः। प्रेतपिण्डक्रियावर्जमिति पर्युदासेन प्रेतोपकारकं श्राद्धमाशौचे वर्तमानेऽपि कर्तव्यमिति दर्शितम् । आशौचस्य वर्तमानता न चिरं काल एवेत्याह दक्षः—

सद्यश्शौचं तथैकाहस्त्र्यहश्चतुरहस्तथा ।
षड्दशद्वादशाहश्च पक्षो मासस्तथैव च ॥
मरणान्तं तथा चान्यद्दश पक्षास्तु सूतके ।

इति । दश पक्षा इति नावधारणार्थं, इतोऽधिकानामपि पक्षाणां स्मृतिषु दर्शनात् ।

.... अचिरे तूत्तमे त्रयः ।
राजन्ये तु चतूरात्रं वैश्ये पञ्चाहमेव च ॥
अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्तिता ।

इति पञ्चाहादिकमपि स्मृतम् । अयमर्थः—

अचिरे गर्भकालस्य निष्पादकचतुर्थमासादर्वाचीने काले गर्भस्रुतां यथामासं नाशौचं, किंतु उत्तमे ब्राह्मणवर्णे त्रयो दिवसाः मातुश्शुद्धिहेतवः, राजन्ये क्षत्रियवर्णे चतूरात्रं मातुश्शुद्धिहेतुः, वैश्यवर्णे पञ्चाहं मातुश्शुद्धिकारणं, शूद्रवर्णस्य अष्टाहेन स्रावे मातुश्शुद्धिः । (ब्राह्मण्यास्त्रिरात्रं क्षत्रियायाश्चतूरात्रं वैश्यायाः पञ्चरात्रं शूद्राया अष्टरात्रं शुद्धिकारणम्)। शुद्धिशब्दार्थस्तु—' पापक्षयश्शुद्धिः धर्मयोग्यत्वमेव वा ' इति भट्टाचार्योक्तो द्रष्टव्यः । पापक्षयः सपिण्डादौ जनने मरणे वा तत्सम्बन्ध्यादावुत्पन्नस्य पापविशेषस्य क्षयः । धर्मयोग्यत्वं दानादिधर्मानुष्ठानार्हत्वम् । एवं शुद्धिशब्दार्थो मतभेदेन द्विधा विवृतो भट्टाचार्यैः । तद्विपरीतस्य जननमरणनिमित्तकस्य पापविशेषस्य दानादिधर्मानुष्ठानायोग्यत्वस्य च मतभेदेनाशौचशब्दाभिधेयत्वं ज्ञापितमिति मन्तव्यम् । अचिरगर्भस्रावे मातुरेवाशौचं, न पित्रादिसपिण्डानाम् । तथाचानन्तरमुक्तं तेनैव—

स्रावे मातुस्त्रिरात्रं स्यात्सपिण्डाशौचवर्जनम् ।

इति। त्रिरात्रमिति ब्राह्मणवर्णाभिप्रायं, राजन्यादेश्चतूरात्रादे-रुक्तत्वात्। यत्तु सुमन्तुनोक्तं—'गर्भमासतुल्या दिवसा गर्भ-स्रंसने सद्यश्शौचं च' इति, तच्चतुर्थमासाविषयम्। व्यव-स्थितविकल्पश्चायम्। एवंचायमर्थः—गर्भस्रंसने चतुर्थे मासि गर्भस्रावे मातुश्चतूरात्रमाशौचं, सपिण्डपुरुषस्य स्नानात्सद्य-श्शौचमिति। तथाच वृद्धवसिष्ठः—'गर्भस्रावे मासतुल्या दि-वसाः स्त्रीणां स्नानमात्रमेव पुरुषस्य ईषत्कठिनगर्भस्रावे तु त्रिरात्रम्' इति, एतत् चतुर्थमासजातगर्भस्रावविषयमिति व्य-क्तं, मासान्तरे ईषत्काठिनस्रावासंभवात्। अस्य वचनस्यायं तात्पर्यार्थः—चतुर्थे मासे मृदुतया ईषत्कठिनतया वा गर्भस्रावे मातुस्त्रिरात्रमाशौचं, सपिण्डपुरुषस्य मृदुतया स्रावे सद्यश्शौचं, कठिनतया स्रावे त्रिरात्रमाशौचमिति। पुरुषग्रहणादत्र सपि-ण्डस्त्रीणां नाशौचं, किन्तु पुरुषस्येत्येकवचनात्पितुस्त्रिरात्रमा-शौचम्। यत्तु मरीचिना सपिण्डस्त्रीपुंससाधारण्येन त्रिरा-त्रमुक्तं—

पाते मातुर्यथामासं पित्रादीनां दिनत्रयम्।

इति, यच्च वसिष्ठेन—'गर्भस्य पतने सपिण्डानां त्रिरात्रम्' इति, तत् पञ्चमषष्ठमासपातविषयं, मासान्तरे गर्भपातासंभ-वात्। तात्पर्यार्थस्तु—पञ्चमे मासि गर्भपाते मातुः पञ्चरात्र-माशौचं, षष्ठे षड्रात्रं, पित्रादीनां सपिण्डानां तु मासद्वयेऽपि त्रिरात्रमिति। यत्तूक्तं यमेन—

अजातदन्ते तनये शिशौ गर्भच्युते तथा ।
सपिण्डानां तु सर्वेषामहोरात्रमशौचकम् ॥

इति, तत् गुणवत्सपिण्डविषयं असन्निहितविषयं वा । यत्तूक्तं ब्रह्मपुराणे--

सद्यश्शौचं सपिण्डानां गर्भस्य पतने सति ।

इति, तत् चतुर्थमासान्तर्गतमृदुरूपगर्भस्रावविषयं, तत्रैव च सुमन्तुना वृद्धवसिष्ठेन च सपिण्डपुरुषस्य सद्यश्शौचविधानात् । एवं स्रावे पातशब्दो मातुर्जठरान्निर्गमनगुणेन स्रावेण गौण्या वर्तत इति बोध्यं, मुख्यार्थपरत्वे पूर्वोक्तवचनविरोधापत्तेः । चतुर्थमासादिषु त्रिषु यच्चतूरात्रादिकमाशौचमुक्तं तत् ब्राह्मणादिवर्णचतुष्कसाधारणं, विशेषास्मरणात् । विशेषस्मरणं च वर्णचतुष्टयेऽप्याशौचविषयमेव ज्ञापितुं मनुनाऽत्र साधारणरजस्वलाशुद्धेस्साहचर्यं कृतम्--

रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति ।
रजस्युपरते सर्वा स्नानेन स्त्री रजस्वला ॥

इति । सर्वा सर्ववर्णेत्यर्थः ।

सप्तममासादिषु स्मृत्यन्तरोक्तं द्रष्टव्यम्--

आ चतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वं प्रसूतौ तु दशाहं सूतकं भवेत् ॥

इति । आङभिविधौ । दशाहमिति ब्राह्मणीविषयमेव, न जात्यन्तरस्त्रीविषयम् । तथाचादिपुराणे--

षण्मासाभ्यन्तरं यावद्गर्भस्रावो भवेद्यदा ।
तदा माससमैस्तासां दिवसैश्शुद्धिरिष्यते ॥
अत ऊर्ध्वं स्वजात्युक्तमाशौचं तासु विद्यते ।

इति । षण्मासाभ्यन्तरं यावत् चतुर्थमासमारभ्येत्यर्थः । स्वजात्युक्तमित्यनेनैतदुक्तं—ब्राह्मण्या दशाहाशौचं, क्षत्रियाया द्वादशाहाशौचं, वैश्यायाः पञ्चदशाहाशौचं, शूद्राया मासमिति । यत्तु प्रचेतसोक्तं—

सूतिका सर्ववर्णानां दशाहेन विशुध्यति ।
ऋतौ तु न पृथक्स्त्रीणां सर्ववर्णेष्वयं विधिः ॥

स्त्रीणां रजोदर्शने यस्त्रिरात्राशौचविधिः स सर्ववर्णेष्वविशिष्ट इत्यर्थः । अत्र सर्ववर्णानां सूतिका दशाहेन शुध्यतीत्येतत् प्रसवसमयासृङ्निस्सरणनिबन्धनाप्रायत्यलक्षणाशौचाभिप्रायं, ऋतुमत्याशौचसाहचर्यात् ।

अत ऊर्ध्वं स्वजात्युक्तमाशौचं तासु विद्यते ।

इति पूर्वोक्तवचनं, मातापित्रादिसर्वसपिण्डसाधारणासरूपाभिप्रायं, स्वजात्युक्तमित्युक्तत्वात् । यत्तु पैठीनसिनोक्तं—'सूतिकां पुत्रजननीं विंशतिरात्रेण कर्माणि कारयेन्मासेन स्त्रीजननीम्' इति, तद्वचनं दानादिधर्मेष्वयोग्यत्वलक्षणाशौचाभिप्रायमिति न पूर्वोक्तविरोधः । कर्माण्यत्रादृष्टार्थानि यागदानादीनि विवक्षितानि । विंशतिरात्रेण गतेनेत्यर्थः । प्रसव

दिनमारभ्य विंशतिदिनेष्वतीतेषु दानादिकर्मणि योग्या भवतीत्यर्थः ।

सूतिका सर्ववर्णानां दशाहेन विशुध्यति ।

इत्यत्र सर्वशब्दश्शूद्रेतरवर्णेषु संकोचनीयः । तथाच पारस्करः–

द्विजातिस्सूतिका या स्यात्सा दशाहेन शुध्यति ।
त्रयोदशेऽह्नि संप्राप्ते शूद्रा शुध्यत्यसंशयः ॥

इति । एवं सूतिकायामसृङ्निस्सरणनिबन्धनमप्रायत्यं युगत्रयमात्रपरिहरणादिहेतुभूतं द्विजादिषु दशरात्रपर्यन्तं, अघरूपाशौचं त्वस्पृश्यत्वादिहेतुभूतं स्वजात्युक्तदशद्वादशपञ्चदशाहपर्यन्तं, दानादिधर्मानधिकारलक्षणं तु द्विजादिषु पुत्रजनन्यां विंशतिरात्रपर्यन्तं स्त्रीजनन्यां मासपर्यन्तमित्यवगन्तव्यम् । यत्तु चतुर्विंशतिमत उक्तं—

अधस्तान्नवमान्मासाच्छुद्धिस्स्यात्प्रसवे सदा ।
मृते जीवेऽपि वा तस्मिन्नहोभिर्माससंख्यया ॥

इति, अधस्तान्नवमान्मासात् सप्तममासादारभ्येति शेषः । तदेतत् सूतिकाव्यतिरिक्तसपिण्डविषयं, सूतिकादिसर्वसपिण्डविषयत्वे पूर्वोक्तवचनविरोधापत्तेः । एवंच यदुक्तं विष्णुना— 'ब्राह्मणस्य सपिण्डानां जननमरणयोर्दशाहमाशौचं द्वादशाहं राजन्यस्य पञ्चदशाहं वैश्यस्य मासं शूद्रस्य' इति, तदेतद्विष्णुवचनं

नवमे दशमे वाऽपि प्रबलैस्सूतिमारुतैः ।

निस्सार्यते बाण इव यन्त्रच्छिद्रेण सज्वरः ॥

इति याज्ञवल्क्योक्तनवमदशममासप्रसवविषयं वेदितव्यम् । यत्तु पैठीनसिनोक्तं—

जनौ सपिण्डाश्शुचयो मातापित्रोस्तु सूतकम् ।

सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः ॥

इति, तस्यायमर्थः—सपिण्डस्य जनने पितृमातृव्यतिरिक्ताः सपिण्डाश्शुचयः सपिण्डजननिबन्धनाशौचे धर्मानधिकारलक्षणे विद्यमानेऽप्यघरूपाभावात्स्पर्शनयोग्याः । तत्सम्भवान्मातापित्रोरस्पृश्यत्वलक्षणं सूतकं भवति । तत्संभवश्च मातापित्रोर्जायमानप्राणिपीडाहेतुत्वात् । तद्धेतुत्वं तज्जनकतया पितुः कथंचित्परम्परया, मातुः गर्भान्निर्गमनानुकूलप्रेरणतया साक्षात् । ततश्च गुरुतया स्नानमात्रानपनोद्यं सूतकं मातुरेव स्यात्, न पितुः । तेन शुद्ध्यर्थं कालप्रतीक्षाऽभावेऽपि स्नानमात्रेण पिता शुचिः अघनाशात्स्पर्शयोग्यो भवतीति । तथाच स्मृत्यन्तरं—'जननेऽप्येतन्मातापित्रोर्मातुरेवास्पर्शनात्मकं नान्येषां ज्ञातीनाम्' इति । यथा मरणे तदनन्तरमधर्मयोग्यत्वलक्षणमाशौचं नाभिच्छेदात्प्राङ्मातापित्रोरेव भवति नान्येषां सपिण्डानां जायमानप्राणिपीडनकर्तृत्वरहितानाम् । मातापित्रोर्मध्येऽपि स्नानमात्रानपनोद्यमस्पर्शनहेतुभूतमाशौचं मातुरेवेत्यर्थः । एतेन यदुक्तं जनने पापोत्पत्तौ निमित्ताभावाद्धर्मानर्हत्व लक्षणमेवाशौचं न पुनरघरूपाशौचमिति तन्निरस्तम् । तर्हि-

स्पृश्यत्वधर्मानर्हत्वलक्षणमाशौचं संभवति, अग्निहोत्रादिकर्मानर्हाणां विवाहरहितानामस्पृश्यत्वाभावात्। तेन जननिनिमित्तं च द्विविधमेव। यदङ्गिरोवचनं—

प्राक् स्नानाज्जननेऽस्पृश्यः कर्महानिरशौचकम्।

इति, तत् पितृविषयं वेदितव्यम्। स्नानादूर्ध्वं पिता सूतिकां स्पृशति चेत्तत्स्पृष्टौ स्नानादप्यस्पृश्य एव। तथाच पराशरः—

यदि पत्न्यां प्रसूतायां द्विजस्संसर्गमिच्छति।
सूतकं तु भवेत्तस्य यदि विप्रष्षडङ्गवित्॥

इति। संसर्गमिच्छति पत्न्या सह संस्पर्शलक्षणं संसर्गं करोति तस्य द्विजस्य सूतिकास्पर्शननिमित्तमस्पृश्यत्वं भवेदित्यर्थः। पतिरिति वक्तव्ये द्विज इत्युक्तिः पतिव्यतिरिक्तस्यापि सूतिकां स्पृशतो द्विजस्य समानमेतादिति ज्ञापनार्थम्। अत एव सुमन्तुः— 'मातुरेव सूतकं तां स्पृशतां च, नेतरेषाम्' इति। प्रसवसमयासृङ्निस्सरणनिबन्धनाप्रायत्यलक्षणसूतकाभिप्रायमेतत्। तां सूतिकां स्पृशतो जनस्य सूतकमस्पृश्यत्वलणं भवति, नेतरेषां तामस्पृशतां जनानामित्यर्थः। वसिष्ठोऽपि—

नाशौचं सूतके पुंसां संसर्गं चेन्न गच्छति।
रजस्तत्राशुचि ज्ञेयं तच्च पुंसि न विद्यते॥

इति। पराशरस्तु सरूपाशौचमाह—

प्रसवे गृहमेधी तु न कुर्यात्सङ्करं यदि।
दशाहाच्छुध्यते माता त्ववगाह्य पिता शुचिः॥

इति। अत्रिरपि—

संपर्काज्जायते दोषः पारक्ये मृतिजन्मनि।
तद्वर्जनात्पितुरपि सद्यश्शौचं विधीयते॥

इति। पारक्ये मृतिजन्मनि परसंबन्धिनि मरणे जनने चेत्यर्थः। आदिपुराणेऽपि—

सूतके तु मुखं दृष्ट्वा जातस्य जनकस्ततः।
कृत्वा सचेलस्नानं तु शुद्धो भवति तत्क्षणात्॥

इति। संवर्तोऽपि—

सचेलं तु पितुस्स्नानं जाते पुत्रे विधीयते।
माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः॥

न दोषावहमित्यर्थः। माता शुध्येत् स्पर्शनयोग्या भवतीत्यर्थः। यत्तु बोधायनेनोक्तं—'जनने तावन्मातापित्रोर्दशाहमाशौचं मातुरित्येके' इति, आशौचं असमवायलक्षणम्। तत्र मातापित्रोर्दशाहमित्येतत्पूर्वपक्षत्वेनोक्तमिति तावद्ग्रहणादवगम्यते। तेन 'मातुरित्येके' इत्ययमत्र सम्यक्पक्ष इति न पूर्वोक्तविरोधः। यदुक्तमङ्गिरसा—

सूतके सूतिकावर्जं संस्पर्शो न ह्यशुद्धिदः।

इति, तत् अस्नातपितृव्यतिरिक्तविषयम्। यत्तु तेनैवोक्तं—

नाशौचं सूतके प्रोक्तं सपिण्डानां क्रियावताम् ।

इति, अस्यार्थः—क्रियावतां जन्मदाख्यदेवताप्रीत्यर्थं यागादिक्रियावतां पित्रादिसपिण्डानां जन्मदाख्यदेवतायागाद्यनुष्ठानदिवसेषु नाशौचं कर्मायोग्यत्वलक्षणं तदनुष्ठानकाल इति । तथाच व्यासः—

सूतिकावासनिलया जन्मदा नाम देवताः ।
तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता ॥

इति । यागग्रहणं पूजाकर्मादेरुपलक्षणार्थम् । अत एवानन्तरमुक्तं तेनैव—

प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा ।
त्रिष्वेतेषु न कुर्वीत पुत्रजन्मनि सूतकम् ॥

इति । सूतकं तु धर्मायोग्यत्वलक्षणमित्यभिप्रेतं, यागनिमित्तमित्यभिधानात् । प्रथमे दशमे वा यागनिमित्ताशौचाभावः । यागकालस्तु—

षष्ठेऽह्नि यागं दानं च जन्मदानां तु कारयेत् ।

इति । यागार्थं ततस्तत्र शुद्धिः प्रकीर्तितेत्यर्थः । दशमेऽह्न्यपि रात्रावेव यागविधानम् । तथाच मार्कण्डेयः—

रक्षणीया तथा षष्ठी निशा तत्र विशेषतः ।
रात्रौ जागरणं कार्यं जन्मदानां तथा बलिम् ॥
पुरुषाश्शस्त्रहस्ताश्च नृत्तगीतैश्च योषितः ।
रात्रौ जागरणं कुर्युर्दशम्यां चैव सूतके ॥

इति। प्रथमे दिवसे कर्मादिनिमित्ते जातकर्माद्यनुष्ठानकाले कृत्स्ने न प्रथमेऽह्नि। तथा शङ्खलिखितौ—'कुमारप्रसवे नाभ्यामच्छिन्नायां गुडतिलहिरण्यवस्त्रप्रावरणगोधान्यानां प्रतिग्रहेऽप्यदोषः तदहरित्येके' इति। कुमारप्रसवदिने अच्छिन्नायां नाभ्यां दानप्रतिग्रहादिष्वदोष इति। तदहरित्येके मन्यन्ते। अत एव याज्ञवल्क्यः—

तदहर्न प्रदुष्येत पूर्वेषां जन्मकारणात्।

इति। यस्मिन् दिने कुमारजननं तदहर्न प्रदुष्येत कुमारजन्मनिमित्तदानार्चनानर्हत्वापादकं न भवति यस्मात्तस्मिन्नहनि पूर्वेषां पित्रादीनां पुत्ररूपेण जन्मोपपत्तेरित्यर्थः। यत्तु जैमिनिनोक्तं—

यावन्न छिद्यते नाळं तावन्नाप्नोति सूतकम्।
छिन्ने नाळे ततः पश्चात्सूतकं तु विधीयते॥

इति, तस्यायमर्थः—नाभिच्छेदनिमित्तकं सर्वसापिण्डानामघरूपमाशौचं आशौचनिमित्तसंभावनादूर्ध्वमेव भवति न पुनः पूर्वमेव चेति।

नन्वघरूपाशौचं सपिण्डपितृव्यतिरिक्तानां न भवति, कारणाभावादित्याशङ्क्य कारणमाह हारीतः—'प्रेताभिभूतत्वाच्छावाशौचं जाते वृद्धियोगेन केनेति मीमांसन्ते नाभ्यच्छिन्नकालानामुच्छेदभूयस्त्वाच्च कुलस्याशौचं भवति' इति। समानोदकानां तु जननिमित्ताशौचं त्रिरात्रं वेदितव्यं,

जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते ।

इति स्मरणात् । जन्मनि पित्रादिसपिण्डानामपि त्रिरात्रमाशौचमाह बृहन्मनुः—

जीवन् जातो यदि शिशुर्मृतस्सूतक एव वा ।
सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकम् ॥

इति । अयमर्थः—जातश्शिशुर्यदि नाभिच्छेदात्पूर्वं मृतः तदा मातुर्दशाहमाशौचं, पित्रादिसर्वसपिण्डानां त्रिरात्रमिति । यद्बृहत्प्रचेतसो वचनम्—

मुहूर्तं जीवितो बालः पञ्चत्वं यदि गच्छति ।
मातुश्शुद्धिर्दशाहेन सद्यश्शौचास्तु गोत्रिणः ॥

इति, तत् प्रस्तुताग्निहोत्रानुष्ठातृविषयं, 'अग्निहोत्रार्थं स्नानोपस्पर्शनात्तत्कालाशौचम्' इति शङ्खस्मरणात् । यत्तु हारीतेनोक्तं—'जातमृते मृतजाते वा सपिण्डानां दशाहम्' इति, सूतकमिति शेषः । अत्र जातमृते यद्दशाहमुक्तं तत् जातस्य शिशोर्नाभिच्छेदादूर्ध्वं मरणे वेदितव्यं, बृहन्मनुवचनसमानविषयत्वेऽन्योन्यविरोधापत्तेः । मृतजातविषये पारस्करेणापि दशाहं सूतकमुक्तं—

गर्भे यदि विपत्तिस्स्याद्दशाहं सूतकं भवेत् ।

इति । सपिण्डानामिति शेषः । उभयत्र दशाहग्रहणं स्वजात्युक्तकालोपलक्षणार्थम् । यत्तु—

पुत्रो जातो यत्र मृतो मृतो वा सूयते यदि ।
सूतकं मातुरेव स्यात्पित्रादीनां त्रिरात्रकम् ॥

इति, तदेतत् वृत्तस्वाध्यायोपेतपित्रादिविषयम् । एतच्च मृत जातत्रिरात्रसूतकं वृत्तस्वाध्योपेतपित्रादेरपि कलौ न कार्यम् ॥

इति स्मृतिचन्द्रिकायां प्रसवाशौचनिर्णयः.

अथ शावाशौचनिर्णयः.

तत्रमनुः—

प्रेतशुद्धिं प्रवक्ष्यामि द्रव्यशुद्धिं तथैव च ।
चतुर्णामपि वर्णानां यथावदनुपूर्वशः ॥

इति । ननु वर्णानामित्यनेनैव विप्रक्षत्रियविट्छूद्राणामित्येषोऽर्थस्सिद्धः, चतुर्णामित्यनर्थकम् । इति चेदुच्यते—

सब्रह्मचारिण्येकाहमतीते क्षपणं स्मृतम् ।
मातुले पक्षिणी रात्रिः शिष्यर्त्विग्बान्धवेषु च ॥

इत्येवमादिवचनेषु येऽनुपात्तवर्णविशेषा आशौचविधयः ते सर्वे न प्रथमवर्णमात्रविषयाः किंतु सर्ववर्णविषया इति ज्ञापनार्थं चतुर्णामित्युक्तम् । उक्तं चैवमेवैतद्भाष्यार्थसंग्रहकारेण—

असपिण्डेषु वर्णेषु अतीते श्रोत्रिये गुरौ ।
अतीते नृपतौ तद्वदृतुकालेषु योषिताम् ॥

अप्रजासु तथा स्त्रीषु मातुले बान्धवेषु च ।

एवमादावशौचस्य चतुर्णामपि तुल्यता ॥

वर्णानामित्येव सिद्धे चतुर्णामपि कीर्तनात् ॥

इति । प्रतिज्ञातक्रमेणादौ प्रेतशुद्धिर्निरूप्यते । तत्र पैङ्ग्यः— 'गर्भस्थे प्रेते मातुर्दशाहम्' इति । प्रेताशौचमिति शेषः । मातृव्यतिरिक्तानां सपिण्डानामस्मिन् विषये बृहद्विष्णुनोक्तं— 'मृतजाते कुलस्य सद्यश्शुद्धिः' इति । जातमृते त्वाह व्याघ्रः—

जाते मृते सपिण्डानां सद्यश्शौचं विधीयते ।

दशाहेनैव दम्पत्योस्सोदराणां तथैव च ॥

इति । दशाहेनेति जन्मदिनमृतबालविषयम् । जन्मदिनादूर्ध्वं मृतबालविषयेऽप्याह स एव—

अन्तर्दशाहे जातस्य शिशोर्निष्क्रमणं यदि ।

सूतकेनैव शुद्धिस्स्यात्पित्रोश्शातातपोऽब्रवीत् ॥

इति । पित्रोरिति सोदरभ्रातॄणामुपलक्षणार्थम् । शिशोरन्तर्दशाहे द्वितीयादिदिने । निष्क्रमणं मरणम् । सूतकेनैव जन्माशौचशेषाहोभिरेव पित्रोः सोदरभ्रातॄणां च शिशुमरणाशौचादपि शुद्धिर्भवतीत्यर्थः । तथाच अन्तर्दशाहोपरतस्य यत्पित्रादीनां मरणाशौचं तत्सूतकाहोभिरेव शुध्यतीत्यर्थः । यत्तुपैङ्गिवचनम्—'जात उभयोः कृते नामनि सोदरभ्रातॄणां च' इति, तत् कृते नामनीति नामकरणदिनस्य दशमस्योपलक्षणार्थम्। एवंचा-

यमर्थः—जातशिशौ जन्मदिने प्रेते मातापित्रोस्सोदरभ्रातॄणां च दशाहमाशौचं, कृते नामनि नामकरणदिने दशमे गते सति पूर्वोक्तानामेवाहोरात्रमाशौचमिति। तथाच शङ्खः—

दशाहान्तर्गते बाले शुद्धिस्स्याज्जन्मना सह।
ऊर्ध्वं दशाहादेकाहं .... ॥

इति। दशाहान्तः दशाहमध्ये बाले गते प्रेते जन्माशौचशुद्ध्या सह मातापित्रोः सोदरभ्रातॄणां च शिशुमरणादपि शुद्धिस्स्यात्। ऊर्ध्वं चैतेषामेकाहमिति। यत्तु यमेनोक्तं—

दशाहाभ्यन्तरे बालः कदाचिन्म्रियते यदि।
शावाशौचं न कर्तव्यं सूत्याशौचेन शुध्यति॥

इति, तस्यायमर्थः—प्रथमप्रवृत्तसूतकमध्ये शिशुमरणाशौचं च सूतकापगमादूर्ध्वं मात्रादिभिर्न कर्तव्यं, यतस्सूत्याशौचेन सूत्याशौचकालविषयेणैव मातापितरावपि शावाशौचादपि शुध्यतः सोदरभ्रातरश्च शुध्यन्तीति। यदप्यापस्तम्बेनोक्तं—'सूतके चोत्थानादाशौचं सूतकवन्मृते तस्मिन्नेव बाले सद्यश्शौचं नात्रोदकम्' इति, तस्याप्ययमर्थः—यस्मिन् जाते सूतकं प्रवृत्तं तत्सूतकमध्ये तस्मिन्नेव बाले मृते सूतकवदोत्थानादाशौचं यथा सूतकमादशम्या विहितं सूतिकोत्थानपर्यन्तं तथा शिशुमरणाशौचमपि मात्रादीनां तत्पर्यन्तमेव, सूताशौचशुद्धेः। तस्मिन विषये सपिण्डान्तरवत्सद्यश्शौचं मात्रादीनाम्। नात्र प्रेताय उदकमिति। ओत्थानादाशौचमिति यदन्तस्सूतके दशमदिनेऽ-

पि शिशुमरणे तद्दिन एवाशौचं न पुनः 'अहश्शेषे द्वाभ्यां प्रभाते त्रिभिः' इत्यादिवचनोक्तो विशेषोऽत्रापीति दर्शयति। यदुक्तं षट्त्रिंशन्मते 'न सूतिश्शावशोधिनी' इति, तत् द्व्येकत्र्यन्तरसूत्याशौचविषयं, अन्यथा पूर्वोक्ताशौचविषयादेकवचनविरोधापत्तेः। यत्तु बृहन्मनुनोक्तं—

दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवैः।
शावाशौचं न कर्तव्यं सूत्याशौचं विधीयते॥

इति तस्यायमर्थः—दशाहाभ्यन्तरे बाले मृते बान्धवैः पितृव्यादिभिरपि शावाशौचं मात्रादिवद्दीर्घकालं न कर्तव्यं, किंतु सद्य एव, सूत्याशौचं पितृव्यादिबान्धवानामपि मात्रादिवत्स्वजात्युक्तं दशाहादिदीर्घकालतया विधीयत इति। यत्तु शाट्यायनेनोक्तं—

बालस्त्वन्तर्दशाहे तु प्रेतत्वं यदि गच्छति।
सद्य एव विशुद्धिस्स्यान्नाशौचं नैव सूतकम्॥

इति, तत् मातुलादिविषयम्। ततश्चायमर्थः—मातुलादिबन्धूनामिह न कालापनोद्यं शावाशौचं सूतकं वा किंतु तदन्ननिमित्तमप्रायत्यं सूतकादि वा स्पर्शननिमित्ताप्रायत्यवत् स्नानमात्रेण नश्यतीति॥

इति स्मृतिचन्द्रिकायां सूतकमध्यभवशिशुमरणाशौचविषयाणि.

अथ सूतकोपरिभवशिशुमरणाशौचविषयाणि.

तत्र शङ्खः—

दशाहान्तर्गते बाले शुद्धिस्स्याज्जन्मना सह ।
ऊर्ध्वं दशाहादेकाहमधस्ताच्चौलकर्मणः ॥
तत ऊर्ध्वं त्रिरात्रं स्यादधस्तान्मौञ्जिबन्धनात् ॥

इति । अधस्ताच्चौलकर्मणः प्रथमाब्दविहिताच्चौलादधस्तात् दन्तोद्गमादिति यावत् । एवंचायमर्थः—दशाहान्तर्गतसूतकानुवृत्तिदशायां बाले मृते जननाशौचेन सह मरणाशौचस्यापि शुद्धिर्भवति, ऊर्ध्वं दशाहात्सूतकापगमादूर्ध्वं दन्तजननादधस्ताद्बाले मृते एकमहोरात्रमाशौचं, दन्तजननादूर्ध्वं मौञ्जिबन्धनादधस्तात् त्रिरात्रमिति । अत्र 'शुद्धिस्स्याज्जन्मना सह' इत्येतन्मातापितृविषयं,

'सूतकेनैव शुद्धिस्स्यात्पित्रोश्शातातपोऽब्रवीत् ।'

इति पूर्वोक्तस्यापि वचनस्य सामर्थ्यात् । एवंचैतत्साहचर्यात् 'ऊर्ध्वं दशाहादेकाहं' इत्येतद्दशम्यां नामकरणे सति द्रष्टव्यम्; 'जननाद्दशरात्रे व्युष्टायां* शतरात्रे संवत्सरे वा नामकरणम्' इति गृह्यपरिशिष्टोक्तेः दशरात्रादिकाले नामकरणं यथा तस्य ।

*वृष्टायां, पा.

'प्राङ्नामकरणात्सद्य एकाहं दन्तजन्मनः।
चूडायास्त्रिदिनंप्रोक्तं तथा वृद्धिक्रमाव्रतात्॥'

इति स्मृत्यन्तरोक्तं सद्यश्शौचं दशाहादूर्ध्वं नामकरणपर्यन्तं वेदितव्यम्। स्मृत्यन्तरस्यायमर्थः—सूतकापगमादूर्ध्वं नामकरणात्पूर्वं सद्यः, दन्तजननात्प्रागहोरात्रेण, दन्तजननादूर्ध्वं तृतीयवर्षविहितचूडाकरणात्प्राक् त्रिरात्रेण, अत ऊर्ध्वं मौञ्जिबन्धनात्प्राक्तेनैव त्रिरात्रेणाग्निसंस्कारोदकदानसहितेन शुद्धिरिति।
अत एव संग्रहकारः—

नाम्नो दन्तोद्गमाच्चौलादुपनीतेरधः क्रमात्।
सद्यश्शौचमहस्त्र्यहो नियताग्न्युदकः परः॥

यत्तु शङ्खेनोक्तं—

अजातदन्ते बाले तु सद्यश्शौचं विधीयते।
अहोरात्रात्तथा शुद्धिर्बाले त्वकृतचौलके॥

इति। अकृतचौलके चूडाकालादर्वागित्यर्थः।
यदपि याज्ञवल्क्येनोक्तं—

आदन्तजन्मनस्सद्य आचौलान्नैशिकी स्मृता।
त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम्॥

इति, जननानन्तरं नामकरणमारभ्य दन्तोद्गमात्प्रागतीतस्य संबन्धिनां सद्यश्शौचम्, दन्तजननादारभ्य चूडाकरणात्पूर्वमहोरात्रम्, चूडाकरणादारभ्य उपनयनपर्यन्तं त्रिरात्रमाशौचमित्यर्थः। तदेतद्वचनद्वयं मातापितृसोदरभ्रातृव्यतिरिक्तविषयम्।

'अजातदन्ते बाले तु सद्यश्शौचं विधीयते।'
इत्यत्र विषयमाहाङ्गिराः—

अनुजातस्य तावत्स्यादाशौचं संस्थितस्य तु।
यावत्स्नानं न कुर्वन्ति सचेलं बान्धवा बहिः॥

इति। अनुजातो जातदन्ताद्बालतरः अनुत्पन्नदन्त इत्यर्थः। अपराण्यपि वचनान्यस्मिन् प्रकरणे प्रदर्शितवचनविरुद्धवचनवदवभासमानानि बहूनि विद्यन्ते, तेषां विरोधपरिहारो वक्ष्यमाणप्रकरणे वक्ष्यते॥

इति स्मृतिचन्द्रिकायां सूतकोपरिभव-
शिशुमरणाशौचविषयाणि.

अथ शिशुमरणे शरीरसंस्काराशौचविषयाणि.

तत्र आदिपुराणे—

स्त्रीणां तु पतितो गर्भः सद्यो जातो मृतोऽथवा।
अजातदन्तो मासैर्वा मृतष्षड्भिर्गतैस्तथा॥
वस्त्राद्यैर्भूषणं कृत्वा न्युप्तव्यस्स तु काष्ठवत्।
खनित्वा तु शनैर्भूमिं सद्यश्शौचं विधीयते॥

इति। स्त्रीणां तु यो गर्भः पतितः, यः सद्यः जातस्सन् तत्क्षण एव मृतः, यश्चाजातदन्तस्सन् षण्मासादूर्ध्वमजातदन्तो मृतः, स बहुभिर्वस्त्रमाल्यैरलंकृत्य भूमिं खात्वा गर्ते काष्ठवन्निक्षिप्तव्य इत्यर्थः। सद्यश्शौचं मातापितृसोदरभ्रातृव्यति-

रिक्तानामित्यर्थः। मात्रादीनां तु पूर्वप्रकरणोक्तमाशौचमनुसंधेयम्। जातदन्ताविषये त्वादिपुराण एवोक्तं—

जातदन्तं मृतं त्यक्त्वा चरेदेकाहमेव तु।

इति, दन्तजननादूर्ध्वं परित्यक्तविषयम्। पूर्वोक्तविधिनाऽरण्ये निक्षिप्य एकाहमाशौचमाचरेदित्यर्थः। इदं चैकाहमाशौचं मात्रादिव्यतिरिक्तविषयं, मात्रादिविषये पूर्वप्रकरणोक्तं त्रिरात्राशौचं वेदितव्यम्। यथाऽऽदिपुराण उक्तं—

अनतीतद्विवर्षं तु मृतं भूमौ निधाय च।
त्रिरात्रं बान्धवानां तु स्यादाशौचं तु सर्वशः॥

इति। दन्तजननादूर्ध्वमपूर्णद्विवर्षे मृतं पूर्वोक्तविधिना भूमौ गर्तवत्यां निधाय पूरयेदिति प्रथमवाक्यार्थः। उक्तविषये मात्रादीनां बान्धवानां त्रिरात्रमाशौचं भवेदिति द्वितीयवाक्यार्थः। अनतीतद्विवर्षस्य खनने विशेषमाह यमः—

ऊनद्विवर्षकं प्रेतं घृताक्तं निखनेद्भुवि।
यमगाथा गायमानो यमसूक्तमनुस्मरन्॥

इति। गाथाः 'योऽस्य कौष्ठ्यजगतः' इत्याद्यास्तिस्र ऋचः। यमसूक्तं 'परेयुवांसं' इति षड्चम्। मनुरपि—

ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः।
अलंकृत्य शुचौ भूमावस्थिसंचयनादृते॥
नास्य कार्योऽग्निसंस्कारो नापि कार्योदकक्रिया।
अरण्ये काष्ठवत्त्यक्त्वा क्षपेयुस्त्र्यहमेव तु॥

इति। यत्र भूमौ पुराऽस्थिसंचयनं कृतं तां विहायान्यत्र शुचौ भूमाववटं खात्वा तत्र प्रेतशरीरं बान्धवा निधाय इष्टकालोष्टपाषाणादिभिः प्रच्छादयेयुरित्यर्थः। बान्धवा इति बहुवचनं बन्धूनामत्रानुगमनं कृताकृतमिति ज्ञापयितुम्। नियमपरं चेद्बहुवचनम्—

'ऊनद्विवार्षिकं प्रेतं निखनेन्नोदकं ततः।'

इति याज्ञवल्क्यवचनविरोधः प्रसज्येत। तस्मादेकेन द्वाभ्यां त्रिभिर्वा निखननं कार्यमिति तात्पर्यार्थः। 'न कुर्यादुदकं' इति याज्ञवल्क्यवचनेन खननानन्तरं यच्छुद्ध्यर्थं स्नानं न तन्निषिध्यते, किंतु यत्प्रेतायोदकदानं तन्निषिध्यत इत्युक्तं तद्भाष्ये। द्विवर्षमरणेऽप्युक्तं याज्ञवल्क्येन—

आ श्मशानादनुव्रज्य इतरो ज्ञातिभिर्वृतः।
यमसूक्तं तथा गाथां जपद्भिर्लौकिकाग्निना॥
स दग्धव्यः.................................॥

इति। इतरः पूर्णद्विवर्षो यो मृतः स ज्ञातिभिः आश्मशानादनुव्रज्यः अनुगन्तव्यः, लौकिकाग्निना तैरेव यमसूक्तं यमगाथां च जपद्भिर्दग्धव्यश्चेत्यर्थः। अत्रानुव्रज्य इति नियमविधिबलान्नियमेन ज्ञातिभिरनुगमनं कर्तव्यम्। इतर इत्यभिधानादूनाद्विवर्षे नियमाभावोऽवगम्यते। निखननं च द्विवर्षात्प्रागेवेत्यवगम्यते। लौकिकाग्निरसंस्कृताग्निश्चण्डालाग्निव्यतिरिक्तोऽग्निर्ग्राह्यः;

चण्डालाग्निरमेध्याग्निस्सूतकाग्निश्च कर्हिचित् ।
पतिताग्निश्चिताग्निश्च न शिष्टग्रहणोचितः ॥

इति देवलस्मरणात् । अस्मिन्वचने लौकिकाग्निनेति वदन् जातारणिनिर्मथिताग्निव्यतिरिक्तः जातकर्मादिसंस्कारेषु होमार्थ इति दर्शयति । अत एवोक्तं देवस्वामिना—'चूडाकरणादिहोमार्थं त्वग्नेर्जातारणेरुत्पत्तिः न तत्सद्भावेऽपि विद्यमानाग्निपक्षबाधनमयुक्तम्' इति । ननु संपूर्णद्विवर्षस्य याज्ञवल्क्येन विहितोऽग्निसंस्कारो न नित्यः, 'ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः' इति प्रस्तुत्य 'नास्य कार्योऽग्निसंस्कारः' इति मनुनाऽभिधानाद्दर्शयाति सर्वनाम्ना ऊनद्विवर्षप्रत्यवमर्शनं तथा व्याख्यानमयुक्तमिति । उच्यते—ऊनद्विवर्षविषये नित्यवन्निखननं विधाय वाशब्दादिकं विना तत्रैव काष्ठावत्त्यागरूपपक्षान्तरविधानस्यानुचितत्वात्, अस्येति सर्वनाम्न ऊनद्विवर्षप्रत्यासन्नतया सन्निहितसंपूर्णद्विवर्षप्रत्यवमर्शकत्वमेव युक्तमिति नास्यावकाशः । किंच संपूर्णद्विवर्षस्याग्निसंस्कारप्रतिषेधे क्रियमाणे कथं तत्र मृतशरीरस्य संस्कार इत्यपेक्षायामरण्ये काष्ठावत्त्यागविधिरपेक्षितो भवति । नैवमूनद्विवर्षे, तत्राग्निसंस्कारप्रतिषेधेऽपि निखननरूपसंस्कारस्य प्रागुक्तेरपि विद्यमानत्वात् । तस्मादेवमेव व्याख्येयम् । 'क्षपेयुस्त्र्यहमेव तु' इति त्रिरात्राशौचविधिर्यद्यपि न विशेषेणाभिहितः, तथाऽपि 'बालानां कृतचूडानामशुद्धिर्नैशिकी

स्मृता' इति तेनैव त्रिवर्षपर्यन्तं सपिण्डानामहोरात्राशौचस्योक्तत्वात् तदविरोधेन मातापितृसोदरभ्रातृष्वेव त्रिरात्रमाशौचमुपतिष्ठते, दन्तजननादूर्ध्वं त्रिवर्षपर्यन्तं त्रिरात्राशौचस्य मातापितृसोदरभ्रातृविषयत्वेन प्रतिपादितत्वात् । 'नास्य कार्योऽग्निसंस्कारो नापि कार्योदकक्रिया' इति वदन्नुदकदानक्रियाया अग्निसंस्कारानुविधायित्वं दर्शयति । तेनाग्निसंस्कारोदकदानाक्रिययोः सह वा प्रवृत्तिस्सह वा निवृत्तिरिति बोद्धव्यम् । ततश्च—

'नात्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया'

इति मनुवचनान्तरे उदकक्रियानिषेधादग्निसंस्कारस्य प्रतिषेधोऽवगन्तव्यः । अयं चाग्निसंस्कारोदकदाननिषेधो नामकरणात्प्रागेव, निखेनोर्ध्वं,

'जातदन्तस्य वा कुर्यान्नाम्नि वाऽपि कृते सति ।'

इति तेनैवानन्तरमभिधानात् । नामकरणाद्दन्तजननादूर्ध्वं त्रिवर्षपर्यन्तं नाग्निसंस्कारमुदकदानं च बान्धवाः कुर्युरित्यर्थः । एवंच जन्मप्रभृति नामकरणपर्यन्तं नाग्निसंस्कारो नोदकदानं च, नामकरणप्रभृति ऊनद्विवर्षपर्यन्तमुदकदानक्रियारहितं निखननं तत्सहिताग्निसंस्कारो वा, संपूर्णवर्षप्रभृत्यूनद्विवर्षपर्यन्तमुदकदानरहितोऽरण्ये काष्ठवत्त्यागोऽग्निसंस्कारो वा तत्सहितोऽत्रेति संकलितोऽर्थः प्रत्येतव्यः । नात्रिवर्षस्येति वदन्नसंपूर्णत्रिवर्षप्रभृत्यामौञ्जिबन्धनादग्निसंस्कारोदकदानप्रतिषे–

धो न विद्यत इति दर्शयति। तेन संपूर्णत्रिवर्षस्याकृतचौलस्यापि मरणे नियत एवाग्निसंस्कारो नित्या चोदकक्रियेति मन्तव्यम्। अत एवाङ्गिराः—

यद्यप्यकृतचूडो वै जातदन्तस्तु संस्थितः।
दाहयित्वा तथा तत्र कन्याशौचं त्र्यहं चरेत्॥

इति। जातदन्तो जाताखिलदन्तः संपूर्णत्रिवर्ष इत्यर्थः। कृतचूडं संस्थितं दाहयित्वोदकक्रियां तस्यैव कृत्वा त्र्यहमाशौचं मातापितृव्यतिरिक्तोपि सपिण्डः समाचरेदित्यर्थः। यद्यपीति वदन्नूनत्रिवर्षस्य कृतचूडस्यैव संस्थाने दहनोदकदानत्रिरात्राशौचं नियतं न पुनरकृतचूडस्यापीति दर्शयति। दर्शितं च लोकाक्षिणा—

तूष्णीमेवोदकं कुर्यात्तूष्णीं संस्कारमेव च।
सर्वेषां कृतचूडानामन्यत्रापीच्छया द्वयम्॥

इति। संस्कारं अग्निसंस्कारम्। अन्यत्रापि अकृतचूडेऽपि नामकरणादूर्ध्वं द्विवर्षपर्यन्तं इच्छया प्रेताभ्युदयकामनया अग्निसंस्कारोदकदानात्मकं द्वयं कुर्यादित्यर्थः। अग्निसंस्कारे कृते उदकदाननियमात्त्रिरात्राशौचनियमनं मात्रादिसपिण्डानाम्। तथा च पराशरः—

दन्तजातेऽनुजाते च कृतचूडे च संस्थिते।
अग्निसंस्करणं तेषां त्रिरात्रमशुचिर्भवेत्॥

इति। येषामजातदन्तानामग्निसंस्करणं कृतं तेषां सपिण्डमात्रं मात्रादिव्यतिरिक्तमपि त्रिरात्रमशुचि भवेदित्यर्थः। आदिपुराणे अकृतचूडस्याप्यग्निसंस्कारे कृते पित्रादिव्यतिरिक्तानामपि त्रिरात्रमाशौचमित्युक्तं—

अनतीतद्विवर्षस्तु प्रेतो यत्रोपदह्यते।
अतिमोहाभिभूतैस्तु देशसाधर्म्यमाचरन्॥
आशौचं वान्धवानां तु त्रिरात्रं तत्र विद्यते॥

इति। देशसाधर्म्यमाचरन् स्वदेशाचारमाचरद्भिरित्यर्थः। मोहः स्नेहः। यत्तु वसिष्ठेनोक्तं—'उदकक्रियाऽऽशौचं द्विवर्षात्प्रभृति दन्तजननादित्येके' इति। तस्यायमर्थः—प्रेताभ्युदयकामनया क्रियमाणाग्निऽऽसंस्कारपूर्वोदकदानक्रिया सर्वसपिण्डानां त्रिरात्रमाशौचं च द्विवर्षप्रभृति त्रिवर्षपर्यन्तं दन्तजननप्रभृति त्रिवर्षपर्यन्तं वा वेदितव्यमिति। 'दन्तजननादित्येके' इत्येतन्मतान्तरोपलक्षणार्थं, 'नाम्नि वाऽपि कृते सति' इति मनुना नामकरणप्रभृत्युदकदानादेरभिधानात्। दन्तजननादि मातापितृभ्यामेवाशौचं प्राक्चूडाकरणादिति मातापितृभ्यामेवाशौचं त्रिरात्रं कर्तव्यमिति शेषः।

प्राङ्नामकरणात्सद्य एकाहं दन्तजन्मनः।
चूडायास्त्रिदिनं प्रोक्तं.......................॥

इति स्मृत्यन्तरे दन्तजननादूर्ध्वं प्राक्चूडाकरणान्मातापितृविषये त्रिरात्राशौचस्याभिधानात्। मातापितृभ्यामेवेत्येवकारः

सपिण्डान्तराणां त्रिरात्राशौचस्य निवृत्त्यर्थो नाशौचमात्रस्य। तथात्वे—

'आदन्तजन्मनस्सद्य आचौलान्नैशिकी स्मृता'।

इत्यादिभिश्च सपिण्डाशौचप्रतिपादकवचनैस्सह विरोधोऽपरिहार्यस्स्यात्। एतेनैवं 'आद्विवर्षे प्रेते मातापित्रोराशौचम्' इति पारस्करवचनं व्याख्यातम्। अत एवानन्तरमुक्तं तेनैव—'एकरात्रं त्रिरात्रं वा शरीरमदग्ध्वा निखनन्ति' इति। तत्र त्रिरात्रमिति पक्षो मातापितृविषयः। एकरात्रपक्षस्तु तदितरसपिण्डविषय इति मन्तव्यम्। 'शरीरमदग्ध्वा निखनन्ति' इत्यस्मिन्विषये दाहस्थाने निखननमिति दर्शितम्। यत्तु शङ्खलिखिताभ्यामुक्तं—'बालेऽतीते सद्यश्शौचं य ऊनद्विवर्षस्स्यादनुत्पन्नदन्तकः' इति, यो बाल ऊनद्विवर्षः तस्मिन् व्यतीते सद्यश्शौचमित्यन्वयः। तदेतत् प्रस्तुताग्निहोत्राद्यनुष्ठानविषयं, 'अग्निहोत्रार्थं स्नानोपस्पर्शनात्तत्कालं शौचम्' इति शङ्खस्मरणात्। तेन शङ्खस्यापि 'आचौलन्नैशिकी स्मृता' इत्यादिपूर्वोक्तवचनैस्सह नास्ति विरोधः। यत्तु काश्यपेनोक्तं—'बालानामजातदन्तानां त्रिरात्रेण शुद्धिः' इति, यत्तु वैवस्वतेनोक्तं—बाले वा जातदन्ते वा त्रिरात्रमाशौचं सद्यश्शौचमिति गौतमः' इति, यदपि वसिष्ठेन—'ऊद्विवर्षे प्रेते गर्भप्रपतने वा सपिण्डानां त्रिरात्रमाशौचं सद्यश्शौचमिति गौतमः' इति, तत्र त्रिरात्रमित्यग्निसंस्कारविषयम्।

सद्यश्शौचमित्यनग्निसंस्कार एव प्रस्तुताग्निहोत्रानुष्ठानविषयम्। यत्तु पैठीनसिनोक्तं—' अकृतचूडानां त्रिरात्रम् ' इति, तद-प्यग्निसंस्कारविषयम्। अनग्निसंस्कारे वा मातापितृविषयम्। यत्तु यमेनोक्तं—

ऊनद्विवर्षके बाले प्रेतत्वमुपगच्छति।
अजातदन्ते तनये शिशौ गर्भच्युते तथा॥
निकृत्तचूडके वाऽपि देशान्तरगते गते।
सपिण्डानां तु सर्वेषामहोरात्रमशौचकम्॥

इति, चत्वार्येतानि वाक्यानि। 'अहोरात्रमशौचकम्' इति त्रिष्वपि वाक्येषु संबध्यते। तत्राद्यवाक्यस्यायमर्थः—दन्त-जाते ऊनद्विवर्षके बाले प्रेते निखननमेव। तत्र पित्रादिव्य-तिरिक्तसपिण्डानामहोरात्रम्। द्वितीयवाक्यस्यायमर्थः—अ-जातदन्ते तनये नामकरणादूर्ध्वं खनने च कृते मातापि-त्रोरहोरात्रमाशौचमिति। तनयग्रहणादत्र मातापित्रोरिति गम्यते। तृतीयवाक्योक्तगर्भच्युतावेकरात्रम्।

पाते मातुर्यथामासं पित्रादीनां दिनत्रयम्।

इति मरीचिवचनाविरोधपरिहाराय गुणवत्पित्रादिसपिण्ड-विषयमिति मन्तव्यम्। चतुर्थं वाक्यं देशान्तरमृतकृतचूड-बालविषयमिति तस्मिन्नेव वाक्ये स्पष्टम्। अतो नास्यापि वचनान्तरविरोधः। यत्तु याज्ञवल्क्येनोक्तं—

त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते।

ऊनद्विवर्षे उभयोस्सूतकं मातुरेव हि ॥

इति । उभयोर्मातापित्रोरित्यर्थः । ततश्चोनद्विवर्षे प्रेते मातापित्रोर्दशरात्रं शावाशौचमित्युच्यते । पूर्वोक्तत्रिरात्राशौचविधायकानेकवचनविरोधप्रसङ्गात्तत्परिहाराय त्रिरात्रं शावाशौचमित्यनेनैव संबन्धः, न पुनर्दशरात्रं शावाशौचमिष्यत इत्यनेनापीति नास्य वचनस्य पूर्वोक्तवचनेन सह विरोधः। यत्तु स्मृत्यन्तरवचनं—'ऊनद्विवर्षे प्रेते मातापित्रोरेव नेतरेषाम्' इति, तस्यायमर्थः—ऊनद्विवर्षे प्रेते निखनेन कृते मातापित्रोरेव त्रिरात्रमाशौचं नेतरेषां सपिण्डानां, तेषां त्वेकरात्राभिधानादिति सर्वमनवद्यम् ॥

एवं निरूपितवयोऽवस्थाप्रयुक्ताशौचविधिः ब्राह्मणादिचतुर्वर्णसाधारणः, वर्णविशेषानुपादानेन मातापित्रोर्विहितत्वात् । 'तुल्यं वयसि सर्वेषाम्' इति व्याघ्रपादवचनाच्च । वयसि षण्मासादिरूपे यत्सद्यश्शौचादि विहितं तत्सर्वेषां ब्राह्मणानामविशिष्टमित्यर्थः । यद्यप्यन्यानि ऋश्यशृङ्गवचनानि वयोऽवस्थाप्रयुक्ताशौचविषयाणि क्षत्रियादिषु दीर्घकालाशौचप्रतिपादकानि सन्ति, तथाऽपि 'कर्मभूयस्त्वात्फलभूयस्त्वम्' इति न्यायेनात्र शुद्धिभूयस्त्वाभावादनुष्ठातॄणां चानादरत्वे सति तानि न लिखितानि ॥

इति स्मृतिचन्द्रिकायां मृतशिशुशरीरसंस्काराशौचविषयाणि.

उक्तमविशेषेण गर्भस्रावादिस्त्रीपुंसप्रजामरणे शावाशौचम्। इदानीं स्त्रीप्रजामरणाशौचविषयाणि कानिचिद्वचनानि लिख्यन्ते। तत्रापस्तम्बः—

अप्रौढायां तु कन्यायां सद्यश्शौचं विधीयते।

इति। दन्तजननादूर्ध्वमपीति शेषः। एवंच—

अजातदन्ते बाले तु सद्यश्शौचं विधीयते।

अहोरात्रात्तदा शुद्धिर्बाले त्वकृतचूडके॥

इत्यत्र दन्तजननादूर्ध्वं बालमरणे सत्यहोरात्राशौचविधानं कन्येतरबालविषयमिति मन्तव्यम्। मनुना त्वकन्याविषय एव विहितं—

नृणामकृतचूडानामशुद्धिर्नैशिकी स्मृता।

इति। नृणां पुंसामित्यर्थः।

निवृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते।

इति। एतदपि मनूक्तमकन्याविषयमेव, नृणामित्यस्यानुषङ्गात्। कथं तर्ह्याशौचं कृतचूडकन्यामरण इत्यपेक्षिते आपस्तम्बः— 'एकाहाच्छुद्धिमायान्ति कृतचूडिकायाम्' इति। कृतचूडिकायां कन्यायां विवाहादर्वाङ्मृतायामहोरात्रमित्यर्थः।

अप्रत्तायां मृतायां तु कन्यायामेकरात्रकम्।

आशौचं बान्धवानां तु पित्रादीनां प्रकीर्तितम्॥

इति मार्कण्डेयस्मरणात्। तत्र पित्रादीनां बान्धवानामिति नैवमन्वयः, पित्रादिसर्वबन्धूनामहोरात्राशौच उच्यमाने स्मृत्य-

न्तरविरोधापत्तेः । अतस्तत्परिहाराय पित्रादीनामस्मिन्विषये स्मृत्यन्तरे प्रकीर्तितं त्रिरात्रमाशौचं भवतीत्यध्याहृतेनान्वयो द्रष्टव्यः । पितृवत्सोदराणामपि प्रत्यासत्त्यतिशयान्न बन्धुवदाशौचं, किंतु पितृवदेवेति ज्ञापयितुं बहूवचननिर्देशः पित्रादीनामिति कृतः । यमेनोक्तं—

पित्रोरुपरमे स्त्रीणामाशौचं तु कथं भवेत् ।
त्रिरात्रेण विशुद्धिस्स्यादित्याह भगवान् यमः ॥

अत्र स्त्रीणामुपरमे पित्रोः कथमाशौचमित्यन्वयः । अकृतचूडस्त्रीणामुपरमे मातापित्रोराशौचं कथं भवेत्? बन्धूनामिवैकरात्रमाशौचं? उत प्रत्यासत्त्यतिशयात्ततोऽधिकं? इति संशये पित्रोस्त्रिरात्रेणैव शुद्धिरिति नियमेन निर्णय इत्यर्थः । पित्रोरिति पित्रादीनामित्यन्वयोऽवगन्तव्यः । एवं पित्रोरिति यत्रयत्रोच्यते तत्रतत्र पितृशब्दस्य सोदरभ्रातॄणामुपलक्षणत्वं वेदितव्यम् । काष्र्णाजिनिरपि पितृव्यादिबन्धूनां पित्रादीनामाशौचे विशेषमाह—

प्रात्ताप्रत्तासु योषित्सु संस्कृतासंस्कृतासु च ।
मातापित्रोस्तिरात्रं स्यादितरेषां यथाविधि ॥

अप्रत्तासु जातदन्तास्विति शेषः । अजातदन्तासु पित्रादीनामेकरात्राशौचस्य शङ्खेनोक्तत्वात् । जातदन्तासु स्त्रीषु पित्रादीनां पुमपत्यवदेवाशौचं वेदितव्यम् । 'इतरेषां यथाविधि' इत्यस्यायमर्थः—इतरेषां पितृव्यादीनां कन्यानां प्राक्चूडाक-

रणात्सद्यश्शौचं, प्राग्दानादेकाहं, वाग्दत्तानां प्राक्परिणयनात्त्र्यहमित्यादिविध्यन्तरानुसारेण शुद्धिरिति । प्रत्ता प्रक्रान्तदाना वाग्दत्तेति यावत् । संस्कृता विवाहसंस्कारेण संस्कृता ।

वारिपूर्वं प्रदत्तास्तु या नैव प्रतिपादिता ।
असंस्कृता तु सा प्रोक्ता त्रिरात्रमुभयोः स्मृतम् ॥

इति मरीचिस्मरणात् । उभयोः भर्तृपितृपक्षयोः । अत एव मनुः—

स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यन्ति बान्धवाः ।
यथोक्तेनैव कालेन शुद्ध्यन्त्येव सनाभयः ॥

इति । अयमर्थः—वाग्दत्तानां विवाहासंस्कृतानां स्त्रीणां मरणे वाग्दानसमये कुमारीस्वीकर्तृपितृकेन बन्धुभावमुपागता भर्तृपक्षीयास्त्रिरात्रेण शुद्ध्यन्ति । सनाभयः कन्याप्रत्यासन्नास्त्रिपुरुषपर्यन्तास्सपिण्डाः यथाऽत्रैवोक्तेन त्रिरात्रकल्पेन शुध्यन्ति। 'अप्रत्तानां तु स्त्रीणां त्रिपुरुषसापिण्ड्यम्' इति वचनबलादेवं व्याख्यातम् । पद्मपुराणे तु कन्यामरणाशौचं प्रपञ्चेनाभिहितम्—

आजन्मनस्तु चौलान्ता कन्या यत्र विपद्यते ।
सद्यश्शौचं भवेत्तत्र सर्ववर्णेषु नित्यशः ॥
ततो वाग्दानपर्यन्तं यावदेकाहमेव हि ।
ततः परं प्रवृत्तायां त्रिरात्रमिति निश्चयः ॥

वाग्दाने च कृते यत्र तत्रोभयतस्त्र्यहम् ।
पितुर्वरस्य च ततो दत्तानां भर्तुरेव हि ।
स्वजात्युक्तमशौचं स्यान्मृतके जननेऽपिच ॥

इति । ततो वाग्दानपर्यन्तमित्यादेरयमर्थः—ततः तस्माच्चौलाद्वाग्दानपर्यन्तं कन्याविपत्तौ यावदेकाहं अहोरात्रं यावत्तावदाशौचं, ततःपरं वाग्दानादूर्ध्वं विवाहोत्कर्षविषये वाग्दानावस्थायामेव प्रवृत्तायामधिकवयस्यापि त्रिरात्रमेवेति निश्चयः। वाग्दाने कृते तत्रोभयतः पक्षे त्रिरात्रं, ततो विवाहादूर्ध्वं दत्तानां सम्यक्प्रतिपादितानां मरणे अपत्यजनने केवलं भर्तृपक्षस्य स्वजात्युक्तं दशाहमाशौचं स्यादिति । प्रवृत्तायां त्रिरात्रमित्यस्य दृष्टरजस्यपवादमाह शङ्खः—

पितृवेश्मनि या नारी रजः पश्यत्यसंस्कृता ।
तस्यां मृतायां नाशौचं कदाचिदपि शाम्यति ॥

इति । स्वजात्युक्तदशाहादिकालादर्वाक्कदाचिदपि न शाम्यतीत्येवं कैश्चिद्व्याख्यातम् । विवाहोत्कर्षवच्चूडाकरणवाग्दानयोरुत्कर्षे आचौडात्सद्य आवाग्दानादेकाहमेवेति निश्चयो न्यायसाम्यात्कार्यः । अचूडितायामवाग्दत्तायां वा रजोदर्शने 'पितृवेश्मनि या नारी' इत्यादिवचनोक्तं द्रष्टव्यम् । परतो मृतायामाशौचं पितृपक्षे निवर्तत इत्याह मार्कण्डेयः—

कन्यायास्तु व्रतस्थाने विवाहः परिकीर्तितः ।
उद्वाहितानामाशौचं पितृपक्षे विधीयते ॥

इति । अस्य क्वचिदपवादमाह विष्णुः—'विवाहसंस्कारसंस्कृतासु स्त्रीषु नाशौचं पितृपक्षे तत्प्रसवमरणे चेत्पितृगेहे भवेतां तदैकरात्रं त्रिरात्रं वा' इति । तत्प्रसवमरणे इत्यादेरयमर्थः—विवाहसंस्कृतानां स्त्रीणां पितृगेहे प्रसवे गर्भस्थशिशुजनने तस्या मरणे वा यथाक्रमं प्रसवे एकरात्रं मरणे त्रिरात्रं पितृव्यादिबन्धूनामाशौचं भवतीति । तथाच बान्धवा इत्यनुवृत्तौ शङ्खः—

'गेहे मृतासु दत्तासु कन्यासु त्र्यहं तथा ।'

इति । परिणीतासु स्त्रीषु पितृगेहे मृतासु पितृव्यादिबान्धवास्त्र्यहमाशौचं कुर्युरित्यर्थः । अथवा प्रसवे मरणे बान्धवानामेकरात्रं पित्रादेस्त्र्यहमिति व्यवस्थाया विष्णुवचनं व्याख्येयं,

दत्ता नारी पितुर्गेहे सूयेताथ म्रियेत वा ।
तद्बन्धुवर्गस्त्वेकेन शुद्धस्तज्जनकस्त्रिभिः ॥

इति ब्रह्मपुराणे व्यवस्थयैवाभिधानात् । जनकग्रहणं जनन्यास्सोदरभ्रातॄणामपि प्रदर्शनार्थम् । एवं पितृगेहे प्रसवे पितृपक्षीयस्यैकरात्रमाशौचं मरणे त्रिरात्रमेकरात्रं वेति । पितृगृहादन्यत्र प्रसवे मरणे वा पितृपक्षस्य नास्त्याशौचं, मातापित्रोस्स्वगेहे जनने मरणे वा त्रिरात्रं, गृहान्तरेऽपि मरणे त्रिरात्रं प्रसवे तूभयोरपि नास्त्याशौचं कारणाभावादित्यवगन्तव्यम् । यत्तु शङ्खलिखिताभ्यामुक्तं—'वाक्प्रदाने कृते विवाहे चाकृते यत्र कन्या विपद्यते तत्रोभयतः उभयास्मिन् भर्तृपितृपक्षे त्रिरात्रमाशौचं ऊढायां गोत्रात्पिण्डाशौचाभ्यां निवृत्तिः'

इति, आशौचशब्देनात्र आशौचदशायां कर्तव्यमुदकदानं निर्दिश्यते। ततश्चायमर्थः—ऊढायां कन्यायां पितृगेहे मृतायां पितृव्यादिबन्धूनामेकाहमाशौचं पितृगोत्रात्पिण्डोदकदानादेर्निवृत्तिरिति। अतो न पूर्वोक्तविरोधः। पितृगोत्रतः पिण्डाशौचनिवृत्तौ हेतुमाह पैठीनसिः—'दत्ता कन्या परैव भवति' इति। ऊढा कन्या भर्तृगोत्रेणैव भवतीत्यर्थः।

'एकत्वं सा गता भर्तुः पिण्डे गोत्रे च सूतके'।

इति स्मरणात्। अतश्च पिण्डोदकदानमूढायै भर्तृगोत्रेण कर्तव्यमित्यर्थः। अत एव मार्कण्डेयः—

ब्राह्मादिषु विवाहेषु या ऊढा कन्यका भवेत्।
भर्तृगोत्रेण कर्तव्यास्तस्याः पिण्डोदकक्रियाः॥

आसुरादिविवाहेषु पितृगोत्रेण धर्मतः॥

इति। पितृगोत्रेण कन्यापितृगोत्रेणेत्यर्थः। ऊढायाः पिण्डोदकक्रियाश्च भर्तृकुल्यैः कर्तव्याः। तथाच वसिष्ठः—'दत्तानामितरे कुर्वीरंस्ताश्च स्त्रियस्तेषाम्' इति। उद्वाहितानां स्त्रीणामौर्ध्वदैहिकं भर्तृकुल्याः कुर्युः, तेषां भर्तृकुल्यानां मरणे ता उद्वाहिताः स्त्रियः कुर्युरित्यर्थः। पुत्रादिप्रत्यासन्नाधिकार्यभावविषयमेतदिति श्राद्धकाण्डे निरूपितम्॥

इति स्मृतिचन्द्रिकायां स्त्रीप्रजाशौचविषयाणि.

अथान्यान्यपि शावाशौचविषयाणि वचनानि लिख्यन्ते.

तत्राङ्गिराः—

अतःपरं तु वर्णानां प्रतिपत्तिर्यथाक्रमम् ।
वक्ष्यामश्शावमाशौचं यथादृष्टं मनीषिभिः ॥

इति । अतः परं उपनीतशवनिमित्तमाशौचं वक्ष्याम इत्यर्थः । अनुपनीतशवनिमित्ताशौचस्य प्रागुक्तत्वात् । अत एव—

त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् ।

इत्युक्तम् । व्रतादेश उपनयनम् । ततःपरं बाल्ये यौवेन वार्धके वा मरणे दशरात्रमाशौचं भवतीत्यर्थः । अस्मिन् विषये मनुरपि—

दशाहं शावमाशौचं सपिण्डेषु विधीयते ।

इति । सपिण्डेषु ब्राह्मणसपिण्डेष्वित्यर्थः ।

शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥

इति तेनैवोक्तत्वात् । ब्रह्मणक्षत्रियवैश्यशूद्रसपिण्डेषु दशाहं द्वादशाहं पञ्चदशाहं मासं शावाशौचं विधीयत इत्यर्थः । यत्तु याज्ञवल्क्येनोक्तम्—

त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते ।

इति । तत्र त्रिरात्रपक्षः समानोदकविषय इत्यविरोधः । एवमेव बृहस्पतिः—

दशाहेन सपिण्डास्तु शुद्ध्यन्ति प्रेतसूतके ।

त्रिरात्रेण सकुल्याश्च स्नात्वा शुध्यन्ति गोत्रजाः ॥

इति । कः पुनस्सपिण्डादीनां भेदः ? उच्यते—यतः प्रवृत्तस्संतानविशेषः स कूटस्थ इति व्यवाह्रियते । तत्सन्तानेषु तमादिं कृत्वा गणिताः पुत्रपौत्रादयः सप्तपुरुषपर्यन्ता न गोत्रान्तरानुप्रविष्टाः परस्परं सपिण्डा विज्ञेयाः । तथाच शङ्खलिखितौ—

सपिण्डता तु सर्वेषां गोत्रतस्सप्तपौरुषी ।

इति । कूटस्थमारभ्य सप्तपुरुषपर्यन्तास्सापिण्डाः । सर्वेषां कूटस्थसंततिजातानां गोत्रतः एकगोत्रत्वलक्षणोपाधिसद्भावे सतीत्यर्थः । एवं कूटस्थस्त्रीपुंससन्ततिजातानां दौहित्रपौत्राणां गोत्रभेदादन्योन्यसापिण्डता नावगन्तव्या । सप्तपौरुषी चेयं सपिण्डता ब्राह्मणादिसर्ववर्णेषु समानैव,

सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ।
सजातीयेषु वर्णेषु चतुर्थे भिन्नजातिषु ॥

इति पराशरस्मरणात् । कूटस्थसजातीयेषु सपिण्डता सप्तमादूर्ध्वं निवर्तत इति असजातीयेषु त्रिपुरुषादूर्ध्वं निवर्तेत इत्यर्थः । तथाऽऽह शातातपः—

पुत्राणां च सपिण्डानामप्रत्तानां च योषिताम् ।
सपिण्डता तु निर्दिष्टा पितृपक्षे त्रिपूरुषात् ॥

इति । साप्तपौरुषात् सापिण्ड्यं विनिवर्तते । अत ऊर्ध्वं समा-

नोदकाः। समानोदका एव बृहस्पतिना सकुल्या इत्युक्ताः। निवृत्तसमानोदकभावा गोत्रजाः।

समानोदकभावस्त्वनुवर्तेताचतुर्दशात्।

जन्मनाम्नोः स्मृतेरेके तत्परं गोत्रमुच्यते ॥

इति व्याघ्रस्मरणात्। जन्म च नाम च जन्मनामनी, तयोः स्मरणं यावत्तावत्समानोदकभाव इत्येके मन्यन्ते। अतःपरं समानोदकभावस्त्वेकेषां मते निवर्तेत इत्युक्तम्। उक्तं च साक्षान्मनुना—

सपिण्डता तु पुरुषे सप्तमे विनिवर्तते।

समानोदकभावस्तु जन्मनाम्नोरवेदने ॥

इति। जन्मावेदनं अस्मत्कुलोद्भूतोऽयमिति स्मरणोत्सादनं, नामावेदनं देवदत्तवंश्या इति स्मरणोत्सादनम्। एवं जन्मनाम्नोरन्यतरस्मरणोत्सादनेऽपि समानोदकभावो निवर्तेत इत्यर्थः। तथाच स्मृत्यन्तरेऽपि—

समानोदकभावस्य निवृत्तिस्स्यादवेदने।

जन्मनाम्नोरन्यतराविज्ञानेऽपि निवर्तते ॥

इति। एवमस्मरणेऽपि न समनोदकभावो निवृत्तो येषां ते गोत्रजाः स्नानाच्छुध्यन्ति। येषां जन्मनाम्नोरस्मरणे सत्यपि चतुर्दशपुरुषातिक्रमात्सगोत्रत्वं तेषां स्नानमात्राच्छुद्धिः,

'समानोदकानां त्र्यहं गोत्रजानामहः स्मृतम्'

इति जाबालिवचनस्यैवंविधगोत्रजविषयत्वात्। समानोदकानां

त्र्यहमित्यनेन समानोदकेष्वेव त्र्यहमिति न नियम्यते, असमानो-दकेष्वपि स्मरणदर्शनात्। तथाच स्मृतिः—

'त्र्यहं मातामहाचार्यश्रोत्रियेष्वशुचिर्भवेत्'।

इति। मातामहो मातुः पिता। आचार्यः—

उपनीय तु यश्शिष्यं वेदमध्यापयेद्द्विजः।

सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥

इत्युक्तलक्षणवान्। श्रोत्रियः एकशाखाध्यायी। 'एकां शाखा-मधीत्य श्रोत्रियो भवति' इति बोधायनस्मरणात्। वाक्यार्थस्तु—मातामहाचार्यश्रोत्रियेषु मृतेषु क्रमेण दौहित्रः अश्रोत्रियोऽपि तच्छिष्यः प्रतिवेश्यद्विजश्च त्र्यहमशुचिर्भवेदिति। श्रोत्रिये त्र्यहम-शुद्धिः प्रातिवेश्य एव द्विजे, अप्रतिवेश्यानामेकग्रामिणामेकरात्रस्य वक्ष्यमाणत्वात्। अत एव मनुना श्रोत्रिये विशेष उक्तः—

श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेत्।

इति। उपसंपन्नः प्रत्यासन्नः प्रतिवेश्य इति यावत्। आश्वलाय-नोप्याचार्यलक्षणसंपन्ने गुरौ त्रिरात्रमाह—'गुरौ चासपिण्डे त्रिरात्रम्' इति। सपिण्डो गुरुः पिता। तदितर उक्तलक्षण-वानाचार्यः। इतरेष्वाचार्येष्वित्यनन्तरं तेनैवाभिधानात्। अतोत्राप्यन्योपनीतशिष्यस्यैवासपिण्डगुरुमरणे त्रिरात्रं वेदि-तव्यम्। एतच्च त्रिरात्रं परेण दहनादिके क्रियमाणे द्रष्टव्यम्। यदाह मनुः—

गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन्।

प्रेताहारैस्समं तत्र दशरात्रेण शुध्यति ॥

इति । प्रेताहाराः प्रेतद्रव्योपजीविनः, प्रेतकुटुम्बान्तर्गतास्सपिण्डा इति यावत् । तैस्सह दशरात्रेण पितृमेधकर्ता शिष्यश्शुध्यतीत्यर्थः । एवंच दशरात्राशौचस्य पितृमेधकर्तृत्वप्रयुक्तत्वाद्दौहित्रादावपि पितृमेधकर्तृत्वे दशरात्रं वेदितव्यम् । प्रचेता अपि—

मातृष्वसामातुलयोश्श्वश्रूश्वशुरयोर्गुरौ ।

मृते चर्त्विजि याज्ये च त्रिरात्रेण विशुध्यति ॥

इति । मातृष्वस्रादिषु वक्ष्यमाणपक्षिण्याशौचविधिविरोधपरिहाराय किंचिद्विशेषणं कल्प्यम् । तत्र पित्रोरसान्निधानासामर्थ्यादौ मतृष्वसामातुलयोः भागिनीसुतसान्निधात्रोः श्वश्रूश्वशुरयोः जामातृपोषकयोः गुरौ उपनयनादिकर्तरि ऋत्विजि यजमानकुलक्रमायाते याज्ये च क्षत्रियकुलक्रमायाते मृते भागिनेयादिः प्रतिसंबन्धी त्रिरात्रेण शुध्यतीति । वृद्धमनुरपि—

पित्रोरुपरमे स्त्रीणामूढानां तु कथं भवेत् ।

त्रिरात्रेण विशुद्धिस्स्यादित्याह भगवान् यमः ॥

पित्रोरुपरमे पितुर्वा मातुर्वा मरणे विवाहसंस्कारसंस्कृतानां दुहितॄणां त्रिरात्रेण शुद्धिरित्यर्थः । दौहित्राणां मरणेऽप्याह स एव—

संस्थिते पक्षिणी कार्या दौहित्रे भागिनीसुते ।

संस्कृते तु त्रिरात्रं स्यादिति धर्मो व्यवस्थितः ॥

इति । दौहित्रे भगिनीसुते उपनयनसंस्कारसंस्कृते मातामहमातामह्योः मातृष्वसामातुलयोस्त्रिरात्रमाशौचं भवति । उपनयनासंस्कृते पक्षिणी, आगामिवर्तमानाहर्युक्तां रात्रिं मातामहादिः क्षपयेदित्यर्थः । अत्रोपनीतमरणाशौचकथनेऽतिप्रसङ्गादनुपनीतस्यापि कथितमिति मन्तव्यम् । बोधायनोऽपि—'शिष्यसतीर्थ्यसब्रह्मचारिषु त्रिरात्रमहोरात्रमेकाहमिति कुर्वीत' इति । त्रीण्येतानि वाक्यानि। तत्र प्रथमवाक्यस्यायमर्थः—अन्येनोपनीते शिष्ये मृते त्रिरात्रमाशौचमाचार्यः कुर्यादिति । कृतविद्या एकगुरवश्शिष्याश्च सतीर्थ्याः; तेषु कस्यचिन्मरणे तदितरस्सतीर्थ्यः अहोरात्रं कुर्यादिति. द्वितीयवाक्यार्थः । एकगुरवस्सहाध्यायिनः शिष्यास्सब्रह्मचारिणः; तेष्वेकस्मिन्मृते तादितरस्सब्रह्मचारी एकाहमाशौचं कुर्यादिति तृतीयवाक्यार्थः । हारीतोपि—

परपूर्वासु भार्यासु पुत्रेषु कृतकेषु च ।
मातामहे त्रिरात्रं स्यादेकाहं तु सपिण्डतः ॥

इति । परः वर्तमानभर्तुरन्यः स्वभर्ता यस्सास्सा परपूर्वा पुनर्भूरित्यर्थः । कृतकः पुत्रः जन्मव्यतिरिक्तैः कारणैर्जातो दत्तादिः पुत्रः । वाक्यार्थस्तु—मातामहादौ मृते परपूर्वाया भार्याया मरणे पूर्वापरयोर्भर्त्रोस्त्रिरात्रं, कृतकपुत्रमरणे जन्मव्यतिरिक्तकारणेन यस्य पुत्रो जातस्तस्य त्रिरात्रं, पूर्वापरभर्तुः कृतकपुत्रिणश्च ये सपिण्डास्तेषामहोरात्रमाशौचमित्यर्थः । अत्र सपिण्डदौ

हित्राशौचकथनप्रसङ्गात्पुनर्भूसपिण्डानामाशौचं कथितमिति म न्तव्यम्। शङ्खस्तु स्वैरिणीपुनर्भ्वामपि त्रिरात्राशौचमाह—

अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च।
परपूर्वासु च स्वासु त्रिरात्राच्छुद्धिरिष्यते॥

इति। अनौरसेषु पुत्रेषु क्षेत्रजदत्तकादिषु अन्यगतासु पुन- र्विवाहमन्तरेण भर्त्रन्तरं समाश्रितासु स्वैरिणीषु परपूर्वासु स्वासु वर्णानतिक्रमेण पुनर्भूषु। विष्णुश्शङ्खोक्तविषये जन्मन्यपि त्रिरात्रमाह—

अनौरसेषु पुत्रेषु जातेषु च मृतेषु च।
परपूर्वासु भार्यासु प्रसूतासु मृतासु च॥

इति। 'मातामहेऽतीते त्रिरात्रेण' इति पूर्ववाक्यश्रुतात्रिरात्रेणे- तिपदमिहानुषज्यते। अङ्गिरा अपि—

गृहे यस्य मृतः कश्चिदसापिण्डः कथंचन।
तस्याप्यशौचं विज्ञेयं त्रिरात्रं नात्र संशयः॥

इति। प्रधानगृहमरणविषयमेतत्। अप्रधानगृहमरणे त्वाह विष्णुः—'असपिण्डे स्ववेश्मनि मृतेऽप्येकरात्रमाशौचम्' इति। असपिण्डयोनिसंबन्धमरणे त्वाह गौतमः—'पक्षिणीमसपिण्ड- योनिसंबन्धे सहाध्यायिनि च' इति। पितृव्यादिः योनि- संबन्धः, तद्व्यावृत्त्यर्थमसपिण्डग्रहणम्। ततश्चायमर्थः—अस पिण्डयोनिसंबन्धाः मातुलमातृष्वसृभगिनीभागिनेयपितृष्वसृ- तत्सुतादयः, तेषां मरणे तत्संबन्धप्रतियोगी भागिनेयादिः

पक्षिणीं क्षपयेदित्यर्थः। योनिसंबन्धेषु त्रिपूरुषपर्यन्तं पक्षिणी शिष्टैराचर्येति धर्मवेदिभिरभिहितम्। सहाध्यायिनीत्यस्यायमर्थः—येन शास्त्रेण सहैकस्मिन् गुरुकुले द्वादशाब्दादिबहुकालमध्ययनं च कृतं तन्मरणे तदितरस्तत्सहाध्यायी पक्षिणीं क्षपयेदिति। मनुरपि—

मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च।

इति। अल्पोपकारकमातुले, अन्योपनीतसाङ्गवेदाध्यायिनि शिष्ये, आधानप्रभृति यावज्जीवमार्त्विज्यकारिणि ऋत्विजि, आत्मपितृमातृबान्धवे मृते भागिनेयादिः पक्षिणीं रात्रिमशुचिर्भवतीत्यर्थः। बान्धवाः स्मृत्यन्तरे दर्शिताः—

आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुस्सुताः।
आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः॥
पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुस्सुताः।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः॥
मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुस्सुताः।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः॥

वृद्धमनुरपि—

श्वशुरयोर्भगिन्यां च मातुलान्यां च मातुले।
पितुस्स्वसरि मातुश्च पक्षिणीं क्षपयेन्निशाम्॥
मातुले श्वशुरे मित्रे गुरौ गुर्वङ्गनासु च।
आशौचं पक्षिणीं रात्रिं मृता मातामही यदि॥

इति। श्वशुरयोः स्वल्पोपकारिणोः भगिन्यां मातृहितकारिण्यां मातुलान्यां मातुलपत्न्यां अल्पोपकारिणि मातुले च पितृष्व-सरि मातृष्वसरि चाल्पोपकारिण्यां पक्षिणीं निशां क्षपये-दिति पूर्वश्लोकार्थः। द्वितीयश्लोके पुनर्मातुलग्रहणं श्वशुर-विशेषणार्थम्। यो मातुलो भागिनेयाय दुहितरं दत्वा श्वशुर-स्संजातस्तस्मिन् श्वशुर इत्यर्थः। मित्रे मित्रविधानेन स्वीकृते। गुरौ शास्त्रोपदेशके,

अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः।
तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तया॥

इति शास्त्रोपदेशकेऽपि गुरुशब्दस्मरणात्। यत्तु जाबालिना 'गोत्रजानामहः स्मृतम्' इत्युक्त्वोक्तं—

मातृबन्धौ गुरौ मित्रे मण्डलाधिपतौ तथा।

इति, मातृबन्धुः मातुलः। यत्तु याज्ञवल्क्येन—

अहस्त्वदत्तकन्यासु बाले त्वकृतचूडके।

इत्युक्त्वोक्तं—

गुर्वन्तेवास्यनूचानमातुलश्रोत्रियेषु च।
अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च॥

इति, यच्च विष्णुनोक्तं—'आचार्यपत्नीगुरूपाध्यायमातुलश्वशुरश्व-श्रूसहाध्यायिशिष्येष्वेकरात्रेण शुद्धिः' इति, तत्र जाबाल्युक्तगुरु शब्दस्य याज्ञवल्क्योक्तगुरुशब्दस्य च विष्णूक्तोपाध्यायशब्देन समानार्थत्वमवगन्तव्यम्। अत एवाश्वलायनेन 'गुरौ चासपिण्डे त्रिरात्रम्' इत्युक्त्वोक्तं—'इतरेष्वाचार्येष्वेकाहम्' इति। 'उपनीय

तु यश्शिष्यं वेदमध्यापयेत्' इत्यादिना निरूपितादाचार्यादित रेष्वाचार्येष्वित्यर्थः । मातुल एकरात्रमनुपकारकमातुलविषयम् । पुत्र एकरात्रं यथाकथंचित्स्वीकृतपुत्रविषयम् । शिष्य एक रात्रमितराचार्यविषयम् । श्रोत्रिय एकरात्रं समानग्रामश्रोत्रि यविषयं, 'एकाहं सब्रह्मचारिणि समानग्रामिणि च श्रोत्रिये' इत्याश्वलायनस्मरणात् । अनौरसेषु पुत्रेष्वन्यगतासु भार्यास्वे-करात्रमनौरसादीनामसंनिधानविषयम् । श्वशुरयोरेकरात्रविधा-नं जामात्रनुपकारकश्वशुरविषयम् । सहाध्यायिन्येकरात्रं द्वाद-शाब्दकालादन्यतरकालसहाध्यायिविषयम् । अन्यथा जाबालि-वचनात्पूर्वोक्तत्रिरात्रविधायकवचनैस्सह विरोधस्स्यात् । यत्तु मनुनोक्तं—

प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितः ।

इति । ज्योतिषा सह वर्तत इति सज्योतिः । अह्नि चेन्मरणं यावत्सूर्यदर्शनं तावदाशौचं, रात्रौचेत् यावन्नक्षत्रदर्शनं ताव-दाशौचमित्यर्थः । तदेतत् स्वल्पदेशाधिपतिविषयं, महामण्ड-लाधिपतिविषये त्वेकरात्रविधानात् । अत एव स्वल्पदेशा-धिपतौ सज्योतिरनध्यायमाह वृद्धमनुः—

ग्रामेश्वरे कुलपतौ श्रोत्रिये च तपस्विनि ।
शिष्ये पञ्चत्वमापन्ने शुचिर्नक्षत्रदर्शनात् ॥

इति । कुलपतिः समूहपतिः । असन्निहितश्रोत्रियादिविषय-मेतत् । यत्तु मनुनोक्तं—

भगिन्यां संस्थितायां तु भ्रातर्यपिच संस्थिते ।
मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते ॥
स्यालके तत्सुते चैव सद्यस्स्नानेन शुध्यति ॥

इति, भगिन्यां विवाहसंस्कृतायां मृतायां सोदरभ्राता सद्यस्स्नानेन शुध्यति न मातापितृवत्त्रिरात्रेणेत्यर्थः । भ्रातरि सोदरे च उपनयनसंस्कृते मृते भगिनी सद्यस्स्नानेन शुध्यतीति । मित्रे चिरकालानुबन्धशून्ये जामातरि प्रेते श्वशुरौ सद्यस्स्नानेन शुध्यतः । स्यालकः पत्नीभ्राता तस्मिंस्तत्सुते वा मृते सद्यस्स्नानेन शुध्यतीति । दौहित्रे भगिनीसुते च सद्यश्शौचमसंनिहितदौहित्रादिविषयम् । अतो न दौहित्रादावुक्तत्रिरात्रविरोधः । उक्तं समानोदकाद्याशौचमत्र त्रिष्वपि वर्णेषु समानं, सपिण्डाशौचवदत्र विशेषोल्लेखनाविशेषस्मरणात् अविशेषज्ञापकस्य वाच्यत्वाच्च । तथा हि आशौचप्रकरणादौ—

आशौचमसपिण्डेषु प्रोषिते श्रोत्रिये गुरौ ।
अतीते नृपतौ तद्वदृतुकाले च योषिताम् ॥
अप्रजासु तथा स्त्रीषु मातुले बान्धवेषु च ।
एवमादावशौचस्य चतुर्णामपि तुल्यता ॥
वर्णानामित्यत्र सिद्धे चतुर्णामपि कीर्तनात् ॥

इति । अप्रजासु गर्भस्रावादिना नष्टप्रजासु ॥

इति स्मृतिचन्द्रिकायामन्यानि शावाशौचविषयाणि.

अथासन्निहितदेशभवकालभवसपिण्डादिजननमरणाशौ-चविषयाणि वचनानि लिख्यन्ते। अत्र मनुः—

सन्निधावेत्र यः कल्पश्शावाशौचस्य कीर्तितः।
असन्निधाने स ज्ञेयो विधिस्संबन्धिबान्धवैः॥

संबन्धिनो व्यवहितसंबन्धिनः समानोदका इति यावत्। बान्धवाः प्रत्यासन्नसंबन्धिनः सपिण्डा इति यावत्। कल्पो विधिः। वाक्यार्थस्तु—शावाशौचस्य यो विधिः 'दशाहं शावमाशौचं सपिण्डेषु विधीयते, त्र्यहात्तूदकदायिनः' इत्यादिवचनैस्सपिण्डसमानोदकानां कीर्तितः,स एव विधिः सन्निहित देशभवसपिण्डादिमरणे ज्ञेयः। अयं च वक्ष्यमाणशावाशौचस्य विधिरसंनिहितदेशभवमरणविषये संबन्धिबान्धवैः ज्ञेय इति। शावाशौचस्येति जन्माशौचस्यापि प्रदर्शनार्थम्।

जननेऽप्येवमेव स्यान्निपुणां शुद्धिमिच्छताम्।
जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते॥

इति वचनेन सपिण्डसमानोदकानां कीर्तितो यस्स एष जन्माशौचविधिः सन्निहितदेशभवजननविषयो ज्ञेयः। असन्निहितदेशभवजननविषये वक्ष्यमाणो विधिर्ज्ञेयः। ततस्तावदसन्निहितदेशभवसपिण्डमरणे विशेषं दर्शयति स एव—

विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम्।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्॥

इति। विगतं मृतम्। विदेशस्थं असन्निहितदेशस्थम्।

अनिर्दशं अनिर्गतदशाहम्। एतदनिर्गतद्वादशाहादेरुपलक्षणार्थं, वाक्यार्थस्तु—असान्निहितदेशमृतं सपिण्डं यः स्वजात्युक्तकालाशौचमध्ये शृणुयात् सः स्वाशौचकालस्य यच्छेषं यावच्छेषं तावदेव तावत्कालमेव अशुचिर्भवेदिति। असन्निहितदेशप्रसवेऽपि समानमेतत्। तथाच बृहस्पतिः—

अन्यदेशमृतं ज्ञातिं श्रुत्वा पुत्रस्य जन्म वा।
अनिर्गतदशाहं तु शेषाहोभिर्विशुध्यति॥

इति। अन्यदेशमृतं असान्निहितदेशमृतं ज्ञातिं, पुत्रस्य जन्म ज्ञातेरपत्यस्य वा जन्म। शङ्खोपि—

देशान्तरगतं श्रुत्वा कल्याणं मरणं तथा।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्॥

इति। देशान्तरगतं असान्निहितदेशभवं कल्याणं अपत्यजन्मेति यावत्। असान्निहितदेशभवमरणे तु विशेषमाह पारस्करः—'प्रोषितसंस्थे यावच्छ्रवणप्रभृति कृतोदकाः कालशेषमासीरन्' इति। कृतोदकाः प्रेताय दत्तोदकाः। मरणाशौचदशायामनुष्ठेयस्याधश्शयनादेरुपलक्षणार्थमेतत्। असन्निहितदेशभवसमानोदकमरणे त्वाह मनुः—

बाले देशान्तरस्थे तु पृथक्पिण्डे च संस्थिते।
सवासा जलमाप्लुत्य सद्य एव विशुध्यति॥

इति। पृथक्पिण्डे असपिण्डे समानोदक इति यावत्। देशान्तरस्थे असान्निहितदेशस्थे। देशान्तरस्थितत्वेन बालः अ-

सपिण्डो विशेष्यते । वाक्यार्थस्तु—असन्निहितदेशस्थे बाले समानोदके वा मृते मरणवार्ताश्रवणानन्तरमेव तत्क्षणे सचेलस्नानेन विशुध्यतीति । एवं समानोदक जन्मन्यपि विशुद्धिः । तथाच बृहस्पतिः—

सन्निधानेऽशौचमिति शावं संपरिकीर्तितम् ।
दूरदेशे मृते जाते सद्यश्शौचमुदाहृतम् ॥

अत्रापि शावाशौचग्रहणं सूतकस्य प्रदर्शनार्थम् । अत एवा सन्निधाने वक्ष्यमाणाशौचविधिरत्र प्रदर्शितः । एवं मरणे जन्मनि च विहितं समानोदकानां सद्यश्शौचं संन्निधाने विहितत्रिरात्रादिकालविशेषाभावे द्रष्टव्यम् । तत्सद्भावे तच्छेषशुद्धिरप्यवगन्तव्या, 'यच्छेषं दशरात्रस्य' इति शङ्खनोक्तस्य सन्निहितसमानोदकजन्ममरणाशौचकालविशेषोपलक्षणार्थत्वात्, 'प्रोषिते कालशेषस्स्यात्' इति याज्ञवल्क्यस्मरणाच्च । यदा दशाहादूर्ध्वमसन्निहितदेशभवजन्मश्रवणं तदाऽऽह देवलः—

नाशुच्यं स्वल्पमप्यस्ति व्यतीतेषु दिनेष्वपि ।

इति । व्यतीतेषु दिनेषु प्रसवस्याशुच्यं स्वल्पमपि नास्तीत्यर्थः । यत्पुनर्मनुनोक्तं—

निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च ।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः ॥

इति । पुत्रस्य जन्म चेत्यनेन ज्ञातिपुत्रस्येति न्यायेनावगम्यते,

पुत्रशब्दस्य संबन्धिविशेषपरत्वात् । एवंचायं वाक्यार्थः—निर्गतदशाहं ज्ञातिमरणं ज्ञातेरपत्यस्य जन्म वा श्रुत्वा श्रवणानन्तरक्षणे सचेलस्नानेनासपिण्डस्य शुद्धिरिति । सन्निहितदेशगुणवतां तु यदाशौचं—

एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः ।
हीने हीनतरे चैव त्र्यहश्चतुरहस्तथा ॥

इत्यादिवचनैरुक्तं तस्मिन्नाशौचेऽतिक्रान्ते पूर्वोक्त–'निर्दशं ज्ञातिमरणं' इत्यादिवचनोक्तं द्रष्टव्यम् । निर्दशं ज्ञातिमरणमित्यत्र दशाहशब्दात् यथैकाहत्र्यहचतुरहादौ जन्ममरणवार्ताश्रवणे शुद्धिः तथाऽत्रापि कालविशेषेण शुद्धिः । 'यच्छेषं दशरात्रस्य' इति वचनस्थदशरात्रग्रहणं दशरात्रस्थानापन्नकालान्तरस्याप्युपलक्षणार्थम् । अत एव संग्रहकारेणोक्तं—

यस्य वर्णस्य यः कालो विहितो गुणवत्तया ।
श्रुत्वा तदन्तरे चादौ तच्छेषेण विशुध्यति ॥

इति । निर्गुणब्राह्मणादीनामुक्तस्य दशरात्रादिशावाशौचस्यातिक्रमादूर्ध्वं सन्निहितदेशे सपिण्डस्य मरणवार्ताश्रवणे त्वाह जाबालिः—

अतीते सूतके स्वेस्वे त्रिरात्रं स्यादशौचकम् ।
संवत्सरे व्यतीते तु सद्यश्शौचं विधीयते ॥

इति । यद्यपि सूतकशब्दः प्रसवाशौचे मुख्यः; तथाऽप्यप्राय-

त्यसाम्यादत्र मृतके वर्तते, सूतकेष्वतीताशौचानां सपिण्डानां त्रिरात्रविध्यसंभवात्। मनुनाऽप्युक्तं—

अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत्।
संवत्सरे व्यतीते तु सद्य एव विशुध्यति॥

इति। तस्माद्वचनात्प्राचीनवचनोक्तं—'विगतं तु विदेशस्थं शृणुयात्' इत्येतावदिहानुवर्तते। ततश्चायमर्थः—स्वजात्युक्त-कालाशौचादूर्ध्वं प्रथमसंवत्सरादर्वागसन्निहितदेशस्थं मृतं सपिण्डं यः शृणुयात् असौ त्रिरात्रमशुचिर्भवेत्। अतीते त्वाशौचे प्रथमसंवत्सरेऽतीते यश्शृणुयात्तदा स्नानेन शुध्य-तीति। तथाच शङ्खः—

अतीते दशरात्रे तु त्रिरात्रमशुचिर्भवेत्।
तथा संवत्सरेऽतीते स्नानेनैव विशुध्यति॥

इति। अस्मिन्विषये गौतमोप्याह—'श्रुत्वा चोर्ध्वं दशम्याः' इति। प्रकृतं त्रिरात्रमत्र श्रुत्वा चेति चशब्देनानुकृष्यते। पक्षिणीमुपरितनसूत्रागतामत्र केचित् योजयन्ति तदयुक्तं, च-शब्दानर्थक्यप्रसङ्गात् पूर्वोक्तानेकवचनविरोधप्रसङ्गाच्च।

आशौचे समतीते तु बन्धुश्च श्रूयते मृतः।
तत्र त्रिरात्रमाशौचं भवेत्संवत्सराद्धः॥

इति देवलवचनविरोधापत्तेश्च। स्वेष्वाशौचाहस्स्वतीतेषु प्रथ-मसंवत्सरमध्ये यद्यसन्निहितदेशमृतः सापिण्डः श्रूयते तत्र त्रिरा-

त्रमाशौचं भवेदित्यर्थः। प्रथमसंवत्सरादूर्ध्वं मरणश्रवणेऽप्याह स एव—

ऊर्ध्वं संवत्सरादाद्यान्मृतश्चेच्छ्रूयते स्वकैः।
भवेदेकाहमेव... .... ॥

इति। असान्निहितदेशमृतो यदि प्रथमसंवत्सरादूर्ध्वं सपिण्डः श्रुतः तदा तेषामेकाहमाशौचं पञ्चमात्प्राचीनसपिण्डविषयम्।

संवत्सरे व्यतीते तु सद्यश्शौचं विधीयते।

इति जाबालिनोक्तं सद्यश्शौचं पञ्चमादिसापिण्डविषयम्। एवमेवात्र विषयव्यवस्था न्याय्या। तथा हि—पञ्चमात्प्राचीनेषु पिण्डदाने देवतात्वेन त्रयाणां कर्तृत्वेन चेतरस्य साक्षात्पिण्डदानक्रियायोगात्सापिण्ड्यं, पञ्चमादिषु पिण्डदातृहस्तलग्नलेपदाने देवतात्वेन च पिण्डदानक्रियायोगाच्च। एवं च यत्र-यत्र साक्षात्सापिण्ड्यं तत्रैकरात्रं, यत्र परंपरया तत्र सद्यश्शौचमिति पूर्वोक्तसद्यश्शौचविधायकवचनानां न विरोधः। तस्मात्संवत्सरात्प्रागभिहितं त्रिरात्रं अत ऊर्ध्वमभिहितं सद्यश्शौचमेकरात्रं च देशान्तरलक्षणरहितसन्निहितदेशविषये द्रष्टव्यम्। देशान्तरलक्षणयुक्तदेशान्तरे मृतविषये आह वसिष्ठः—'देशान्तरस्थे मृते ऊर्ध्वं दशाहाच्छ्रुत्वैकरात्रमाशौचम्' इति। प्रथमसंवत्सरानन्तरमेतत्। अत एव विष्णुवसिष्ठौ—'व्यतीते त्वाशौचे संवत्सरान्तस्त्वेकरात्रेण ततः परं स्नानेन' इति। एवं च यत्पैठीनसिनोक्तं—

देशान्तरमृतिं श्रुत्वा क्लीबे वैखानसे यतौ ।
सद्यश्शौचं.. ॥

इति तत् देशान्तरमृतं प्रथमसंवत्सरात्परतः श्रुत्वेत्यध्याहृतेन संगमयितव्यम् । अतो न पूर्वोक्तवासिष्ठादिवचनविरोधः । किं पुनर्देशान्तरलक्षणमित्यपेक्षिते वृद्धमनुः—

महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः ।
वाचो यत्र विभिद्यन्ते तद्देशान्तरमुच्यते ॥

इति । अयमर्थः—महानद्योर्यदन्तरं मध्ये गिरिर्वा देशयोर्व्यवधायको यत्रासीत् अपभ्रंशादिभाषाभेदो वा यत्र विद्यते तद्देशान्तरमिति व्यपदिश्यत इति । काः पुनर्महानद्य इत्यपेक्षिते नरसिंहपुराणे—'गङ्गा यमुना गोदावरी कृष्णवेणी तुङ्गभद्रा कावरीत्येता महानद्यः' इति । वामनपुराणे—

गोदावरी भीमरथी कृष्णवेणी सरस्वती ।
[1]तुङ्गभद्रा सुप्रयोगा सिंहा कावेरिरेवती ॥
दुग्धोदा नळिनी रेवा निशिता कलभस्वना ।
महा अपि महानद्यस्सह्यमूलाद्विनिर्गताः ॥

'महा अपि महानद्यः' इत्ययमर्थः—परिगणिताभ्योऽन्या याः काश्चिद्विस्तारवत्यः ता अपि महानद्य इति । एवं च गङ्गा-

[1] तुङ्गभद्रा प्रयागश्च सिंहा कावेरिरेविका ।
दोग्धा धनतिला रेवा वारिशीता वलस्वना ॥
एता अपि...................... इति पाठान्तरम् ।

यमुनयोर्यदन्तरं गङ्गाया उत्तरदेशापेक्षया यमुनाया दक्षिण-देशश्च देशान्तरं भवतीत्यवगन्तव्यम् । एवं गोदावर्यादि-महानदीनामन्तराण्यपि बहिष्ठदेशानपेक्ष्य देशान्तराणीति ज्ञा-तव्यम् । न च वाच्यं महानद्या दक्षिणकूलमुत्तरकूलं च परस्परापेक्षया देशान्तरं भवतीति; तयोस्सामीप्यादेवेति । यथोक्तं बृहन्मनुना—

देशनामनदीभेदो निकटे यत्र वै भवेत् ।
तेन देशान्तरं प्रोक्तं स्वयमेव स्वयम्भुवा ॥

देशनामानि अङ्गवङ्गकलिङ्गादीनि । नदीभेदो नदीविशेषः म-हानदीति यावत् । नदीभेदग्रहणं पूर्वोक्तपर्वतादीनामप्यु-पलक्षणम् । वाक्यार्थस्तु—अङ्गवङ्गादिनामान्तरं महानद्यादिकं च निकटे यत्र भवतः तत्रापि देशान्तरलक्षणेऽपि सामान्य-त्वादिना स्वयम्भुवा देशान्तरं प्रोक्तमिति । एवमत्यन्तसंनि-हितस्यापि देशान्तरत्वे 'देशान्तरस्थे प्रेते' इत्यादिवसिष्ठ वचनेन नात्रैकरात्रं भवितुमर्हति, असन्निहितेऽपि त्रिरात्रं सन्नि-हिते त्वेकरात्रमिति विपरीतम् । अतो मरणव्यवधानतारत-म्यापेक्षया यद्देवलेनोक्तं—

आ त्रिपक्षात्त्रिरात्रं स्यात् षण्मासात्पक्षिणी तथा ।
अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यति ॥

इति, तत् निकटदेशान्तरे द्रष्टव्यम् । अत्र पूर्वपक्षानुसारेण

व्यवस्थाऽवगन्तव्या । आ त्रिपक्षात् दशरात्रादिस्वजात्युक्ताशौचकालादूर्ध्वमिति शेषः । बृहस्पतिस्तु योजनसंख्याविशेषेण देशान्तरमाह—

देशान्तरं वदन्त्येके षष्टियोजनमायतम् ।
चत्वारिंशद्वदन्त्यन्ये त्रिंशदन्ये तथैव च ॥

इति । अस्मिंस्तु पक्षे जाबाल्याद्युक्तं सन्निहितदेशविषयत्रिरात्राशौचं त्रिंशद्योजनादर्वाक्तनविषये द्रष्टव्यम् । यत्र त्रिंशद्योजनादर्वागपि महानद्यादिव्यवधायकसद्भावः तत्र निकटदेशान्तरविषये 'आ त्रिपक्षात्त्रिरात्रं स्यात्' इति वचनोक्तं द्रष्टव्यम् । त्रिंशद्योजनात्परतोमृतविषये महानद्यादिव्यवधायकालाभेऽपि 'देशान्तरस्थे प्रेते' इत्यादिवसिष्ठोक्तमेवात्र 'आ संवत्सरात्तत ऊर्ध्वं ततः परं स्नानेन' इति विष्णुनाऽप्युक्तं सद्यश्शौचमेवेत्यवगन्तव्यम् । एवमुक्तमतिक्रान्ताशौचं मातापितृव्यतिरिक्तसापिण्डविषयम् । मातापितृविषये तु सन्निहितदेशे निकटदेशान्तरे च दशरात्रमेव । तथाच पैठीनसिः—

पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः ।
श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत् ॥

इति । दूरस्थशब्देनात्र सन्निहितस्वदेशस्थो दूरदेशान्तरस्थश्चोक्तः । अपिशब्देन निकटदेशान्तरस्थ उक्त इति मन्तव्यम् । सूतकी भवेत् मरणाशौची भवेदित्यर्थः । अत्र किंचिद्भाष्यकारेणोक्तं—श्रुत्वेत्यत्र तत ऊर्ध्वमिति शेषो द्रष्टव्यः ।

ततश्च दशरात्रमध्ये तु वार्ताश्रवणे पुत्रस्यापि तच्छेषेणैव सपिण्डान्तरवच्छुद्धिरिति। यत्तु दक्षेणोक्तं—

महागुरुनिपाते तु आर्द्रवस्त्रोपवासिना।
अतीतेऽब्देऽपि कर्तव्यं प्रेतकार्यं यथाविधि॥

इति। आर्द्रवस्त्रोपवासिना आर्द्रवस्त्रोपेतेन। अतीतेऽब्देऽपि अत्यन्तचिरकालादूर्ध्वम्। प्रेतकार्यं आशौचदिनेषूक्तोदकपिण्डलक्षणं विवक्षितम्। तदेव तत्पुनस्संस्कारकर्तुः पुत्रस्य तदानीं संस्करणासामर्थ्येऽप्याशौचानियमेषु समर्थतया गृहीताशौचस्य द्रष्टव्यम्। यत्तु याज्ञवल्क्येन संवत्सरेऽतीते प्रेत कार्यरहितमुदकदानसहितं सद्यश्शौचमुक्तं—'वत्सरे पूर्णे प्रेतं दत्वोदकं शुचिः' इति, तत् पुत्रव्यतिरिक्तसपिण्डविषयम्। महागुरुनिपात इत्यत्र महागुरुशब्देन पिता माता चोच्यते, न पुनः पितैव,

द्वौ गुरू पुरुषस्येह पिता माता च धर्मतः।
तयोर्गुरुः पिता तावन्माता गुरुतरा स्मृता॥

इति मातुरपि गौरवातिशयस्मरणात्। अत एव त्रिरात्रविधायकवचनान्तरेण मातृपर्युदासो दक्षेणैव कृतः—

पितृपत्न्यामतीतायां मातृवर्जं द्विजोत्तमः।
संवत्सरेऽप्यतीतेऽपि त्रिरात्रमशुचिर्भवेत्॥

इति। स्मृत्यन्तरं—

अतिक्रान्ते दशाहे तु पश्चाज्जानाति चेद्गृही।

त्रिरात्रं सूतकं तस्य न तद्द्रव्यस्य कस्यचित् ॥

इति । अत्र व्याघ्रः—

तुल्यं वयसि सर्वेषामतिक्रान्ते तथैव च ।
उपनीते तु कर्तव्यं तस्मिन्नेवातिकालजम् ॥

वयसि षण्मासादिरूपे यत्सद्यश्शौचादि विहितं तत्सर्वेषां ब्राह्मणादिवर्णानां तुल्यमविशिष्टम् । उपनीते तु सन्निहितदेशे मृते दश द्वादश पञ्चदश त्रिंशद्दिनाशौचं ब्राह्मणादिवर्णानां, तस्मिन्नेव उपनीतोपरम एव अतिक्रान्ताशौचं नानुपनीतोपरम इति । यत्तु स्मृत्यर्थसारे क्वचिद्ब्राह्मणादिवर्णानामतुल्यतयोक्तं मातापितृमरणे दशाहादूर्ध्वं दूरदेशेऽपि संवत्सरादूर्ध्वमति पुत्रः श्रुत्वा श्रवणदिनमारभ्य दशाहादिकं यथावर्णमाशौचं कुर्यादिति; तच्चिन्त्यं, 'तुल्यं वयसि सर्वेषाम्' इति व्याघ्रवचनविरोधाच्च । यदपि तेनैव मातापितृविषय उक्तः, विशेषस्य विषयान्तरेऽपि समत्वमुक्तं 'स्त्रीपुंसयोः परस्परं चैवं सर्ववर्णोक्तमवर्णसपत्नीषु चैवम्' इति, तदपि चिन्त्यं, स्त्रीपुरुषादिविषये विशेषोपदेशकस्य प्रख्यातपुरुषग्रन्थप्रदीपवर्णादिष्वदर्शनात् ॥

इति स्मृतिचन्द्रिकायामसन्निहितदेशकालभवसपिण्डादिजननमरणाशौचविषयाणि ॥

अथानेकाशौचसन्निपातविषयाणि.

तत्र देवलः—

अघानां यौगपद्ये तु शुद्धिर्ज्ञेया गरीयसा ।

इति । अघानामिति सामान्यग्रहणे गर्भस्रावपातप्रसवेषूक्तानामाशौचानां वयोऽवस्थाप्रयुक्तमरणाशौचानामुपनयनोर्ध्वं मरणाशौचानां च ग्रहणम् । अघानामाशौचानां मध्ये कयोश्चिद्यौगपद्येन सन्निपाते गरीयसेतरस्य शुद्धिर्ज्ञेयेत्यर्थः । दीर्घकालापनोद्याशौचं गरीयः, अल्पकालापनोद्याशौचमगरीय इति । अनेन हेतुना प्रथमद्वितीयापेक्षया तृतीयं गरीयः चतुर्थादिष्वप्युत्तरोत्तरं पूर्वपूर्वापेक्षया गरीय इत्यवगन्तव्यम् । समानकुलजननमरणाशौचयोर्मध्ये कालाधिक्येनाप्युत्तरस्य गरीयस्त्वायोगात्किं तयोर्गरीय इत्यपेक्षिते तेनैवोक्तं—

मरणोत्पत्तियोगे तु गरीयो मरणं भवेत् ।

इति । अनेन कालतस्समानयोर्जननमरणयोश्च मिथो गुरुलघुभावो नास्तीत्यर्थादुक्तम् । कथं पुनर्जननाशौचान्मरणाशौचस्य गरीयस्त्वम्? अत्रोच्यते—पापविशेषात्मकमाशौचं प्रथमप्रकरणे प्रतिपादितम् । पापविशेषाणां च महत्त्वाल्पत्ववशाद्गौरवं लाघवं च भवतीति दण्डधर्मशास्त्रे प्रतिपादितम् । एवमत्रापि कारणमहत्त्वान्मरणाशौचस्य स्वरूपतो गुरुत्वं, कारणाल्पत्वात्सूत्याशौचस्य स्वरूपतोऽल्पत्वमवगन्तव्यम् । कथं पुनर्मरणा-

शौचस्य कारणमहत्त्वं, कथं वा जननाशौचस्य कारणाल्पत्व-मित्यपेक्षिते हारीतः—'प्रेताभिभूतत्वाच्छावाशौचं जाते वृद्धि-योगाद्भाक्तत्वात्केनेति मीमांसन्ते बालाः कुलानुगातिच्छेदात्क्ले-शभूयस्त्वाच्च कुलस्याशौचं भवति' इति । अस्यायमर्थः—मरणाशौचकारणप्रेतसंपर्कबाहुल्याच्छावाशौचं वाऽघं कुलस्य बहु भवति, शिशोः क्लेशबाहुल्योपपादकनाभिच्छेदे शिशुसाहि-तार्थमप्रतिषिद्धमनुमतं भवतीति न्यायेन कथंचिदनुमतिद्वारक-र्तृत्वमस्तीति जनने कुलस्याशौचं कुलस्याघं भवतीति । य-तोऽघस्वरूपाशौचं नाभिच्छेदानुमतिनिमित्तं स्वत एव कर्मा-नधिकारलक्षणाशौचवज्जननानन्तरमेव न भवति, किंतु नाभि-च्छेदादूर्ध्वमेव । तथा च जैमिनिः—

यावन्न च्छिद्यते नाळं तावन्नाप्नोति सूतकम् ।
छिन्ने नाळे ततः पश्चात्सूतकं तु विधीयते ॥

इति । गरीयस्त्वात्समकालयोश्शावसूताशौचयोः सन्निपाते सूता कदाचिच्छावस्य शुद्धः, तस्याः शावापेक्षया दीर्घ-कालत्वात् । अत एवाङ्गिराः—

सूतके मृतकं वै स्यान्मृतके त्वथ सूतकम् ।
तदाऽधिकृत्य मृतकं शौचं कुर्यान्न सूतकम् ॥

एतदेव षट्त्रिंशन्मतेऽप्युक्तं—

शावाशौचे समुत्पन्ने सूतकं तु यदा भवेत् ।
शावेन शुध्यते सूतिर्न सूतिश्शावशोधिनी ॥

इति । सूताशौचमध्ये शावाशौचे समुत्पन्नेऽपि न सूतिः शावशोधिनीत्यर्थः। तेन स्वकालेनैवास्मिन्विषये शावाशौचशुद्धिः। तदाहाङ्गिराः—

अनिर्दशाहे जनने पश्चात्स्यान्मरणं यदि ।
प्रेतमुद्दिश्य कर्तव्यं तत्राशौचं स्वबन्धुभिः ॥

जननाशौचमध्ये तत्समानकालं यदा मरणाशौचं भवति तदा मरणदिनमारभ्य प्रेतसंपर्कनिमित्तमाशौचं स्वकालापगमपर्यन्तं बन्धुभिः कर्तव्यमित्यर्थः । यदा तु समानकालयोस्सन्निपातः तदा द्वयोस्तुल्यत्वेऽपि गुरुत्वेन प्राथम्यं ग्राह्यमित्याह शङ्खः—

समानाशौचसंपाते प्रथमेन समापयेत् ।

इति । जात्या कालतस्समानाशौचयोस्सन्निपाते प्रथमाशौचसमाप्तिकाल एव द्वितीयाशौचमपि समापयेदित्यर्थः । विष्णुरपि—'जननाशौचमध्ये यद्यपरं जननं स्यात्तत्र पूर्वाशौचव्यपगमे शुद्धिः । मरणाशौचमध्ये ज्ञातिमरणेऽप्येवम्' इति पूर्वाशौचकालशेषस्योपरमे परशावादपि शुद्धिर्भवतीत्यर्थः । यदाह मनुः—

अन्तर्दशाहे स्यातां चेत्पुनर्मरणजन्मनी ।
तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशम् ॥

इति । अनया वचोभङ्ग्या पूर्वाशौचकालशेषेणैव पराशौचादपि शुद्धिर्भवतीत्युक्तं भवति । याज्ञवल्क्येन सुस्पष्टमुक्तं—

अन्तरा जन्ममरणे शेषाहोभिर्विशुध्यति ।

इति । पूर्वाशौचस्य पराशौचापेक्षया दीर्घकालस्य समकालस्य वा शेषैरहोभिरन्तरापतितमाशौचं विशुध्यतीत्यर्थः । यत्पुनर्मध्यपतितमाशौचं पूर्वापेक्षया दीर्घकालं न तत्र पूर्वाशौचशेषाहोभिर्विशुद्धिः, पूर्वाशौचस्य स्वल्पकालतया लघुत्वात् । किं त्वल्पकालेनैव शुद्धिः । तथाच शङ्खः—

असमानं द्वितीयेन धर्मराजवचो यथा ।

इति । द्वितीयमाशौचं प्रथमाशौचकालापेक्षया दीर्घकालत्वेनासमानं द्वितीयेन द्वितीयाशौचकालेन गच्छतीति यावत् । यमोऽपि—

अघवृद्धिमदाशौचं पश्चिमेन समापयेत् ।
यथा त्रिरात्रे प्रक्रान्ते दशाहं प्रविशेद्यदि ॥
आशौचं पुनरागच्छेत्तत्समाप्य विशुध्यति ॥

इति । द्वितीयमाशौचं प्रथमाशौचानुवृत्तिकालापेक्षया दीर्घकालानुवर्तनेन वृद्धिमत् पश्चिमेन समापयेदित्यर्थः । अमुमेवार्थमुदाहरणपूर्वकं स्पष्टयति—यथेत्यादिना । अस्यायमर्थः—त्रिरात्रजननाशौचे मरणाशौचे वा प्रक्रान्ते दशाहं जननाशौचं मरणाशौचं वा यदि प्रविशेत् दशाहाशौचं त्रिरात्रापेक्षया दीर्घकालं जननाशौचं मरणाशौचं वा पुनरागच्छेत् अत्र पाश्चिमाशौचसमाप्त्या शुद्धिः । तथाऽन्यत्रापि प्रक्रान्तैकरात्राशौचमध्ये प्रविष्टमघवृद्धिमदाशौचं स्वकालेनैव शुध्यतीति । तथाचोशनसोक्तं—

अल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि ।
न पूर्वेण विशुद्धिस्स्यात्स्वकालेनैव शुध्यति ॥

इति । देवलेन तु प्रथमाशौचानुवृत्तिकालापेक्षया दीर्घकालानुवर्तनेन वृद्धिमदाशौचं स्वकालेन विशुध्यतीति वचनभङ्ग्योक्तम् । तस्य क्वचिदपवादोऽप्युक्तः—

परतः परतोऽशुद्धिरघवृद्धौ विधीयते ।
स्याच्चेत्पञ्चतमादह्नः पूर्वेणापि विशिष्यते ॥

इति । परतः अघवृद्धौ परभूतस्य पूर्वसजातीयस्य विजातीयस्य वा दिनाधिक्येन वृद्धौ परतोऽशुद्धिः पराशौचस्य यावान् कालस्तस्य सर्वस्यापगमपर्यन्तमशुद्धिः; तत ऊर्ध्वं शुद्धिरिति पूर्वार्धस्यार्थः । 'स्याच्चेत्पञ्चतमादह्नः' इत्याद्यपवादादेव उत्तरार्धस्यायमर्थः—पूर्वाशौचं पराशौचापेक्षया स्वल्पकालमपि यदि पञ्चतमादह्नः पञ्चमदिनात्परतोऽपि कतिपयदिनोपेतं स्यात्तदा पूर्वेण पूर्वाशौचकालशेषेण पराशौचस्यापि शुद्धिः विशिष्यते विधीयत इति । एवमुक्तं भवति—उत्तराशौचस्य दीर्घकालत्वेऽपि यदि पूर्वाशौचमुत्तराशौचकालार्धादधिककालं स्यात्तदा पूर्वेणैवोत्तरस्यापि शुद्धिर्भवति । अत्रोदाहरणं—

अधस्तान्नवमान्मासाच्छुद्धिस्स्यात्प्रसवे तदा ।
मृते जीवेऽपि वा तस्मिन्नहोभिर्माससंख्यया ॥

इति वचनेन सप्तममासप्रसवे सप्तरात्रं, अष्टममासप्रसवेऽष्टरात्रमुक्तम् । नवममासादिप्रसवे तज्जननमरणयोर्दशाहमाशौचमिति

नवमेनैव दशरात्रमुक्तम् । तत्र यदा सप्तरात्राशौचमध्ये दश-रात्राशौचं तदाऽर्धाधिकत्वात्पूर्वाशौचशेषेणोत्तराशौचस्य शुद्धि-र्भवति । एवमन्यत्राप्युत्तराशौचकालार्धाधिककाले पूर्वाशौचे द्वितीयाशौचस्य तच्छेषेणैव शुद्धिरवगन्तव्या । एवञ्च शङ्खेन यदुक्तं—

असमानं द्वितीयेन धर्मराजवचो यथा ।

इति, यदपि प्रजापतिना—'गच्छतो लघुता तथा' इति, यदपि हारीतेन—'लघुना नैव तम्' इति; तत्र शङ्खवचन-स्यार्थः प्रागेव प्रदर्शितः । प्रजापतिहारीतवचनयोरयमर्थः—दीर्घकालतया गुर्वाशौचं स्वल्पकालतया लघ्वाशौचेन पूर्वभा-विना न शुध्यतीति । तान्येतान्युत्तराशौचकालार्धादधिकका-लाशौचापनोद्येष्वाशौचेषु द्रष्टव्यानि । यदा तु संपूर्णाशौचयोः प्रथमोत्तरयोरुत्तरस्य प्रथमान्त्यदिने सन्निपातस्तदा विशेषमा-हतुश्शङ्खलिखितौ—'अथ चेदुत्तरा प्रमीयेत जायेत वा शिष्टैरेव दिवसैश्शुध्येताहश्शेषे द्वाभ्यां प्रभाते तिसृभिः' इति । अहश्शेषः अहोरात्रशेषः । एतदुक्तं भवति—संपूर्णा-शौचस्यान्त्याहोरात्रमध्ये संपूर्णाशौचान्तरस्य यदा सन्निपा-तस्तदा द्वितीयाशौचस्य प्रथमाशौचकालशेषेण न शुद्धिः, किंतु तच्छेषादूर्ध्वं द्वाभ्यां रात्रिभ्यां शुद्धिः । यदा तु पुनर-ष्टमे यामे संपूर्णाशौचान्तरसान्निपातस्तदाऽष्टमयामादूर्ध्वं तिसृभी रात्रिभिरिति । शातातपोऽप्याह—

रात्रिशेषे द्व्यहाच्छुद्धिर्यामशेषे शुचिस्त्र्यहात् ।

इति । रात्रिशेषे द्व्यहाच्छुद्धिरिति अहश्शेषे द्व्यहाच्छुद्धिरित्यर्थोऽवगन्तव्यः । एवमुक्तो विशेषः संपूर्णाशौचविषये द्रष्टव्यः । यथाऽऽह बोधायनः—अथ यदि दशरात्रसान्निपाते पुनराद्यं दशरात्रमाशौचमानवमाद्दिवसात्, इति । अस्यार्थो धर्मप्रदीपे वर्णितः । अत्रापि वर्ण्यते—यावन्नवमदिनसमाप्तिः तावत्पूर्ववर्तमानाशौचदिवसकालेनोत्तराशौचसमाप्तिरित्यर्थः। अत्र नवमग्रहणमुपान्त्यदिवसप्रदर्शनार्थम् । ततश्च द्वादशरात्रादिष्वप्येतत्सूचितमिति गुरुणा व्याख्यातं—'ततश्च दशमेऽहनि यदा दिवाऽऽशौचोत्पत्तिस्तदाऽपि द्वाभ्यामित्येतद्वेदितव्यम्' इत्येतदन्तेन ग्रन्थेन । 'दशमेऽहनि यदा दिवाऽऽशौचोत्पत्तिः' इत्यत्र धर्मदीपग्रन्थे—"दशमेऽहनीत्येतद्द्वादशाहादेरुपलक्षणार्थम्, ततश्च ब्राह्मणस्य पूर्वाशौचदशमेऽह्नि संपूर्णाद्वितीयाशौचप्रक्रमः, क्षत्रियस्य पूर्वाशौचद्वादशेऽह्नि, वैश्यस्य पूर्वाशौचपञ्चदशेऽह्नि, शूद्रस्य पूर्वाशौचमासान्त्यदिने तदाऽपि द्वाभ्यामित्ययं विशेषो वेदितव्यः । अत एव गौतमेन—तच्चेदन्तः पुनरापतेच्छेषेण शुद्ध्येरन् रात्रिशेषे द्वाभ्यां प्रभाते तिसृभिश्चतुर्णामित्यविशेषेण वर्णानाम्" इत्युक्तम् । आशौचसान्निपाते शेषेण शुध्येरन्नित्युक्त्वा रात्रिशेषे द्वाभ्यां प्रभाते तिसृभिरिति यदुक्तं तच्चतुर्णामित्यविशेषेण ज्ञेयमित्यर्थः । एवमसंपूर्णाशौचसन्निपाते संपूर्णाशौचान्त्यदिवसे तस्यासंपूर्णस्य द्वितीयाशौच-

स्यार्धरात्रादेः पूर्वं पूर्वाशौचशेषेणैव शुद्धिर्बोद्धव्या । मातापितृमरणाशौचयोस्त्वन्त्यादिनात्पूर्वमेव मिथस्सन्निपातेऽपि न प्रथमाशौचशेषेण शुद्धिः । यदाह शङ्खः—

मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता ।
पितुश्शेषेण शुद्धिस्स्यान्मातुः कुर्यात्तु पक्षिणीम् ॥

इति । यद्यप्यत्र मातुर्मरणाशौचशेषमात्रेण पश्चाद्भाविपितृमरणाशौचस्य शुद्धिः, पितृमरणाशौचशेषेण पक्षिण्यधिकेन पश्चाद्भाविमातृमरणाशौचस्य शुद्धिरिति प्रतिभाति । तथाऽपि नायं वचनार्थः, पितृमरणाशौचस्य निमित्ततो मातृमरणापेक्षया गरीयसः पूर्वशेषमात्रेण शुद्धिः, मातृमरणाशौचस्य निमित्ततः पितृमरणापेक्षया लघीयसः पूर्वाशौचशेषेण पक्षिण्यधिकेन शुद्धिरित्यनुचितार्थत्वात् । अतोऽन्यथा व्याख्येयम् । व्याख्यातं चान्यथा विज्ञानेश्वरपादैः—“मातरि पूर्वं प्रमीतायां तन्निमित्ताशौचमध्ये यदि पितुरुपरमः स्यात्तदा न पूर्वशेषेण शुद्धिः, किंतु पितुः प्रयाणनिमित्ताशौचशुद्धिः कार्या । तत्रापि पितुः प्रयाणशौचमध्ये मातरि स्वर्यातायामपि न पूर्वशेषमात्राच्छुद्धिः, किंतु पूर्वाशौचं समाप्योपरि पक्षिणीं क्षपयेत्” इति । आदिपुराणे तु प्रथमाशौचोत्तरार्धसन्निपातेऽस्य द्वितीयाशौचस्य न पूर्वशेषेणैव शुद्धिः, किंतु स्वकालेनैवेति केषांचिन्मतमुपन्यस्य तत्सर्वं धर्मशास्त्रविरुद्धत्वाद्विचार्यमित्यभिप्रायेणोक्तं—

आद्ये भार्गव यावत्स्यात्सूतकस्य तु सूतके ।
सूतके पतिते चास्मात्सूतकाच्छुद्धिरिष्यते ॥
अत ऊर्ध्वं द्वितीयात्स्यात्सूतकात्तु विशोधनम् ।
एवमेव विचार्यं स्यात्सूतके मृतके तथा ॥

इति । अस्यायमर्थः—प्रक्रान्तसूतकस्य पूर्वार्धमध्ये प्रविष्टस्य द्वितीयस्य सूतकस्य प्रक्रान्तसूतकशेषेण शुद्धिः, पूर्वार्धादूर्ध्वं प्रविष्टस्य तु स्वकालेनैव, प्रक्रान्तशावाशौचमध्ये प्रविष्टस्य सूतकस्याप्येवमेव शुद्धिरिति यत्केषांचिन्मतं तद्विचार्यं, चिन्त्यं च धर्मशास्त्रविरुद्धत्वादिति ॥

इति स्मृतिचन्द्रिकायामनेकाशौचसन्निपातविषयाणि.

उक्तमनेकविधमाशौचं—

सद्यश्शौचं तथैकाहस्त्र्यहश्चतुरहस्तथा ।
षड्दशद्वादशाहश्च पक्षो मासस्तथैव च ॥

इत्यादिकम् । तस्य सर्वस्याप्यपवादो गृहस्थेतराश्रमस्येति प्रतिपादितं—

नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम् ।
नाशौचं सूतके प्रोक्तं शावे वाऽपि तथैव च ॥

इति । सपिण्डादिषु यदाशौचमुक्तं तत् गृहस्थेतराश्रमाणां न कदाचिद्भवतीत्यर्थः । यद्यप्यत्र नाशौचमिति सामान्यवशात्सद्यश्शौचस्यापवादः प्रतिभाति; तथाऽपि वक्ष्यमाणवचन-

विरोधात्तद्व्यतिरिक्ताशौचस्यायमपवाद इत्यवगन्तव्यम् । एवंच नैष्ठिकादिषु एकाहद्व्यहाद्यनेकविधाशौचस्थानेषु सद्यश्शौचमित्यवगन्तव्यम् । तथा च याज्ञवल्क्यः—

ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वताम् ।
सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा ॥
दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ॥
आपद्यपि च कष्टायां सद्यश्शौचं विधीयते ॥

इति । तत्रर्त्विक्पदार्थो मनुनोक्तः—

अग्न्याधेयं पाकयज्ञमग्निष्टोमादिकान् मखान् ।
यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते ॥

इति । वृतो वरणेन संस्कृत इत्यर्थः । स च वरणसंस्कारोऽग्न्याधेयादौ वरणप्रभृति प्रयोगपरिसमाप्तिपर्यन्तमनुवर्तत इति तदनुवृत्तिपर्यन्तमृत्विजां दीर्घकालाशौचमध्ये सद्यश्शौचं विधीयत इति संबन्धः । दीक्षितो दीक्षाख्यसंस्कारवान् । स च संस्कारो दीक्षणीयेष्ट्यादिभिरुत्पद्यते अवभृथस्नानेनापैति । तथाच पद्मपुराणम्—

तावद्गृहीतदीक्षस्य त्रैविद्यस्य महामखे ।
स्नानं त्ववभृथे यावत्तावत्तस्य न सूतकम् ॥

एतदुक्तं भवति—दीक्षणीयादिभिरुत्पन्नो दीक्षाख्यसंस्कारो यावद्यजमाने पत्न्यां चानुवर्तते तावत्तयोः दीर्घकालाशौच

मध्येऽपि तदाशौचं न विद्यते, सद्यश्शौचविधानादिति । सत्रि-व्रतिदातृशब्दानामर्थास्संग्रहकारेण दर्शिताः—

सत्री गृहीतनियमो यज्ञे दाने च दीक्षितः ।
चान्द्रायणाद्यनुष्ठाता व्रती तु ब्रह्मचार्यपि ॥

श्राद्धे गृहीतसंकल्पो व्रती भोक्ता च कीर्तितः ।
दाता नित्यमनादाता वानप्रस्थः प्रकीर्तितः ॥

इति । यज्ञे सोमयागादौ दाने सततान्नदाने गृहीतनियमः कृतसंकल्पः सत्रीत्यनेनोक्तः । यज्ञे गृहीतनियमो दीक्षितोपि भवति, तथाऽपि पुरस्तादुक्तदीक्षितसंकीर्तनाद्गोबलीवर्दन्याये-नात्र सत्रिशब्दो दीक्षितावस्थेतरयजमाने वर्तत इति दर्श-यितुं 'यज्ञे दाने च दीक्षितः' इत्युक्तम् । व्रतीत्यनेन चा-न्द्रायणाद्यनुष्ठाता चान्द्रायणादौ कृतसंकल्पः, श्राद्धे गृहीत-संकल्पः पुत्रादिः, भोक्ता श्राद्धकर्मणि भोजनार्थं निम-न्त्रितविप्रोऽपि कीर्तितः । तयोरपि व्रतयोगवत्त्वेन व्रतिशब्द-प्रवृत्तिनिमित्तसद्भावात् । यद्यप्युपनीतब्रह्मचारिण्यपि प्रवृत्ति-निमित्तसद्भावेन व्रतिनि व्रतशब्दो वर्तते, तथाऽपि ब्रह्म-चारीति ब्रह्मचारिसान्निधानाद्गोबलीवर्दन्यायेन व्रतिशब्दो ब्र-ह्मचारिव्यतिरिक्तेषु व्रतिषु वर्तत इति दर्शयितुं ब्रह्मचारी-त्युक्तम् । दातृशब्देनात्र वानप्रस्था व्यपदिश्यन्ते, 'असाधारण्ये-न व्यपदेशा भवन्ति' इति न्यायात् । तदभिसंधायोक्तं—'दाता

नित्यमनादाता वानप्रस्थः प्रकीर्तितः' इति । अनादाता न प्रतिग्रहीता । ब्रह्मवित् परिव्राजकः, तस्मिन् प्रायेण ब्रह्मज्ञानसद्भावात् । अत्र व्रतिषु व्रतनिवृत्तिपर्यन्तं प्राप्तदीर्घाशौचापवादेन सद्यश्शौचं विधीयते । ब्रह्मचार्यादिषु तत्तदाश्रमे यावत् स्थितः तावत्सद्यश्शौचं प्राप्तदीर्घकालाशौचबाधेन विधीयत इत्यवगन्तव्यम् । ननु सत्रिशब्देनैव दाने यज्ञे च सद्यश्शौचं सिद्धं, तेन 'दाने विवाहे यज्ञे च' इति दानयज्ञयोः पुनरभिधानं व्यर्थम्। उच्यते—दाने तावदन्नदानादन्यत्रापि दानविशेषे क्वचित्सद्यश्शौचविधानार्थं पुनर्दानवचनं, असंकल्पितयज्ञेऽपि क्वचित्सद्यश्शौचाविधानार्थं पुनर्यज्ञवचनमिति न वैयर्थ्यम् । तथा च संग्रहकारः—

दाने विशिष्ट आर्तस्य व्याधिना शुद्धतोच्यते ।
[1]अनित्यतोपि यो वस्तु [2]दातुं होमादि वाञ्छति ॥
यज्ञे संभृतसंभारे........................... ॥

इत्यादि । व्याधिना आर्तस्य विशिष्टे दाने व्याधिपरिहारार्थं महिष्यादिदाने, धर्मोपचयार्थदाने च शुद्धतोच्यते सद्यश्शौचमुच्यत इत्यर्थः। 'यज्ञे संभृतसंभारे' इत्येतदुपरिष्टात्प्रपञ्च्यते। विवाहे सद्यश्शौचं कस्येत्यपेक्षिते ब्रह्मपुराणं—

.... कन्यादाने च नो भवेत् ।
विवाहे कन्यकायाश्च लाजहोमादिकर्मणि ॥

---

[1] अनिच्छतोऽपि. [2] दातुर्होमादि.

इति । कन्यादाने विवाहकर्मणि कन्याया दातुस्तत्परिग्रहीतुश्च कन्यावरणप्रभृति विवाहनिवृत्तिपर्यन्तं दीर्घप्राप्ताशौचमपि तदाशौचं नो भवेत् न विद्यते, विवाहविषयेऽपि सद्यश्शौचविधानादित्यर्थः । संग्रामे युद्धे । 'संबाधे राजानं संनाहयेत्' इत्याश्वलायनोक्तसंनाहनादिविधौ प्रास्थानिकशान्तिहोमे वाऽऽशौचे सद्यश्शुद्धिः । देशस्य विस्फोटादिभिरुपद्रवे राजभयाद्वा विप्लवे तदुपशमनार्थं शान्तिकर्मणि सद्यश्शुद्धिः । तथा कष्टायामप्यापदि संकुचितवृत्तेः क्षुत्परिश्रान्तमातापित्रादिबहुकुटुम्बस्य तद्रक्षोपयोगिनि प्रतिग्रहे सद्यश्शुद्धिरित्यर्थः । स्मृत्यन्तरेऽपि—

नरेन्द्रसत्रिव्रतिनां विवाहोपप्लवादिषु ।
सद्यश्शौचं समाख्यातं कान्तारापदि संयति ॥

इति । नरेन्द्रस्य कस्मिन् कर्मणि सद्यश्शौचमित्यपेक्षिते ब्रह्मपुराणं—

राज्यनाशस्तु येन स्याद्विना राज्ञः स्वमण्डले ।
प्रयास्यतश्च संग्रामे होमे प्रास्थानिके सति ॥
मन्त्रादितर्पणे वाऽपि प्रजानां शान्तिकर्मणि ।
गोमङ्गलादौ वैश्यानां कृषिकालात्यये सति ॥
आशौचं न भवेल्लोके सर्वत्रान्यत्र विद्यते ॥

इति । अस्यार्थः—राज्ञः राष्ट्रे येन कर्मणा विना यत्कर्माकरणे प्रजापालनादिराज्यनाशः तस्मिन् कर्मणि प्रक्रान्ते,

तथा संग्रामे प्रयास्यतः प्रास्थानिके प्रस्थाननिमित्ते होमे प्रस्तुते सति, तथा मन्त्रादिभिः मन्त्रपूर्वकपूजोपहारैर्दुष्टग्रहतर्पणे प्रस्तुते, तथा सांसर्गिकेऽपि प्रजानां शान्तिकर्मणि प्रस्तुते, तथा वैश्यानां लोकाचारसिद्धगोमङ्गलादिकर्मणि प्रस्तुते, तथा कृष्यादिकर्मार्थे विनायकपूजादिकर्मणि प्रस्तुते, राज्ञां वैश्यानां चाशौचं दीर्घकालतया न विद्यते, सद्यश्शौचविधानात्। अन्यत्र पूर्वोक्तकर्मविषयेभ्योऽन्यत्र वैश्वदेवादिकर्मसु सर्वत्राशौचं विद्यते, तत्र सद्यश्शौचविधानाभावादिति। यत्त्वाङ्गिरोवचनं—

जनने मरणे चैव त्रिष्वाशौचं न विद्यते।
यज्ञे विवाहकाले च देवयागे तथैव च॥

इति। यज्ञः सोमयागादिर्वैदिकः। देवयागः मातृकादिदेवताको लौकिको गणयागः। यदपि पैठीनसिवचनं—

विवाहयज्ञदुर्गेषु यात्रायां तीर्थकर्मणि।
न तत्र सूतकं तद्वत्कर्म यज्ञादि कारयेत्॥

इति। यदपि ब्रह्मपुराणवचनं—

इष्टे देवप्रतिष्ठायां गणयागादिकर्मणि।
श्राद्धादौ पितृयज्ञे च कन्यादाने च नो भवेत्॥

इति। एतान्युपक्रान्तयज्ञादिकर्मविषयाणि वचोभङ्ग्या सद्यश्शौचविधायकानीति मन्तव्यम्। अत एव ब्रह्मपुराणे क्वचिदस्यापवाद उक्तः—

यज्ञार्थं बहुसम्भारसम्भृतस्यापि कुत्रचित् ।
आशौचं न भवेत् .... ॥

इति । ततश्चायमर्थः—यज्ञार्थं संभृतसंभारस्य कल्पितसमस्तयज्ञसाधनपदार्थस्याप्यकृतसंकल्पस्याशौचापगमादूर्ध्वं वसन्तान्तर्गतकर्मकालासंभवेन तस्मिन्वत्सरे करिष्यमाणयज्ञातिक्रमविषये यज्ञसंकल्पात्पूर्वक्षणे शुद्धिर्भवतीति । यज्ञग्रहणं प्रतिष्ठादेरुपलक्षणार्थम् । अत एव विष्णुः–'न देवप्रतिष्ठाविवाहयोः पुनस्संभृतयोः' इति । देवप्रतिष्ठाविवाहयोः संभृतबहुसंभारयोरुपक्रमात्प्रागपि न तत्कर्तुराशौचं भवतीत्यर्थः । एतदुक्तं भवति—यावति काले संभृतबहुसंभारधारणं कर्तुं शक्यते तावत्कालमध्ये प्रतिष्ठाद्यङ्गभूतं कालान्तरं यत्र न लभ्यते तद्विषय एव संकल्पात्प्रागाशौचाभाव इति । स्मृत्यन्तरेऽपि—

यज्ञे संभृतसंभारे विवाहे श्राद्धकर्मणि ।

इति । संभृतसंभार इति सर्वत्र संबध्यते । अत्रापि वैष्णववचनसमानविषयत्वमेव मन्तव्यम् । श्राद्धे संभृतसंभारत्वं पक्वद्रव्याभिप्रायं, आमद्रव्यभिप्राये वक्ष्यमाणस्मृत्यन्तरवचनाविरोधापत्तेः । तथाहि—

श्राद्धविघ्ने समुत्पन्ने त्वन्तरा मृतसूतके ।
अमावास्यां प्रकुर्वीत शुद्धावेके मनीषिणः ॥

इति । अयमर्थः—आमद्रव्योपकल्पनसंकल्पयोर्मध्ये दैवान्मानुषाद्वा समुत्पन्ने श्राद्धविघ्ने मृतके सूतके वाऽमावास्यायामा-

शौचापगमादनन्तरं वा श्राद्धं कुर्वीत। पक्वद्रव्योपकल्पनसंकल्प-योर्मध्ये सूतके मृतके वा समुत्पन्ने पूर्वोक्तसद्यश्शौचविधि-बलात् तस्मिन्नेव काले श्राद्धं कर्तव्यमित्यवगन्तव्यम् । विप्रनि-मन्त्रणात्प्राग्विप्रस्याशौचे प्राप्ते विप्रान्तरमामन्त्र्य श्राद्धं कर्तव्यम् । निमन्त्रणादूर्ध्वं विप्रस्याशौचे प्राप्ते तस्य शुद्धि-र्ब्रह्मपुराणे दर्शिता—

निमन्त्रितस्य विप्रस्य स्वाध्यायनिरतस्य च ।
देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित् ॥

इति । यत्तु स्मृत्यन्तरेऽभिहितं—

द्रव्याणि स्वामिसंबन्धात्तदघे त्वशुचीनि च ।
स्वामिशुध्यैव शुध्यन्ति वारिणा प्रोक्षितान्यपि ॥

इति । तदाशौचोत्पत्तेः पूर्वं यज्ञार्थमसंकल्पितद्रव्यविषयं,

पूर्वसंकल्पितं द्रव्यं दीयमानं न दुष्यति ।

इति क्रतुस्मरणात् । आशौचोत्पत्तेः पूर्वं संकल्पितं द्रव्यं देव-तायै दीयमानं ब्राह्मणेभ्यो वा दीयमानं न दुष्यतीत्यर्थः । कानिचिद्वचनानि द्रव्याणि पूर्वमसंकल्पितान्यपि न दुष्यन्ती-त्याहुः—

लवणे मधुमांसे च पुष्पमूलफलेषु च ।
शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयस्सु च ॥
तिलौषधाजिने चैव पक्वापक्वस्वयंग्रहे ।
पण्येषु चैव सर्वेषु नाशौचं मृतसूतके ॥

इति । पक्वशब्देनान्नादिव्यतिरिक्तं भक्ष्यादिकमभिप्रेतं, पक्वान्ने दोषश्रवणात् । तथाऽऽहाङ्गिराः—

अन्नसत्रप्रवृत्तानामाममन्नमगार्हितम् ।
भुक्त्वा पक्वान्नमेतेषां त्रिरात्रं तु पयः पिबेत् ॥

इति । एतेषां आशौचनिमित्तमरणादिज्ञातॄणामिति शेषः । तथाच षट्त्रिंशन्मते —

उभाभ्यामपरिज्ञातमाशौचं नैव दोषकृत् ।
एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेत् ॥

इति । पक्वभक्ष्यादिकमपि स्वाम्याशौचे स्वेष्टं भोक्तुर्दोषमावहति । अत एव मरीचिवचने स्वयंग्रह इत्युक्तम् । स्वाम्यनुज्ञया भोक्ता स्वयमेव गृह्णीयादिति तस्यार्थः । अन्नसत्रप्रवृत्तानामिति यज्ञविवाहप्रवृत्तानामुपलक्षणार्थं, तस्याशौचसंपर्कस्य निषिद्धत्वात् ।
तथाच स्मृत्यन्तरं—

विवाहोत्सवयज्ञादावन्तरा मृतसूतके ।
शेषमन्नं परैर्देयं दातॄन् भोक्तॄंश्च न स्पृशेत् ॥

इति । भोजनमध्ये शावाशौचनिमित्ते परिज्ञाते भोक्तॄणां कथं शुद्धिर्भवेदित्यपेक्षिते षट्त्रिंशन्मते स्मृतं—

भुञ्जानेषु च विप्रेषु त्वन्तरा मृतसूतके ।
अन्यगेहोदकाचान्तास्सर्वे ते शुचयः स्मृताः ॥ इति ॥

इति स्मृतिचन्द्रिकायामाशौचापवादः ॥

अथाशौचिनियमाः.

तत्र जाबालिः—

> सन्ध्यां पञ्च महायज्ञान् नैत्यकं स्मृतिकर्म च ।
> तन्मध्ये हापयेदेव दशाहान्ते पुनःक्रिया ॥

इति । पञ्चमहायज्ञानां साहचर्यान्नैत्यकशब्देनात्र नित्यश्राद्धमुच्यते । स्मृतिकर्म स्मृत्युक्तं कर्म देवतार्चनादिकम् । तन्मध्ये-आशौचमध्ये । हापयेत् त्यजेत् । तेषां सन्ध्यादीनां दशाहान्ते आशौचान्ते पुनःक्रिया पुनरनुष्ठानम् । सन्ध्यां त्यजेदित्येतन्मन्त्रोच्चारणसन्ध्याभिप्रायेणोक्तं न तु सन्ध्यामात्राभिप्रायेण । यदाह पुलस्त्यः—

> सन्ध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत् ।
> न त्यजेत्सूतके वाऽपि त्यजन् गच्छेदधो द्विजः ॥
> सूतके मृतके चैव सन्ध्याकर्म समाचरेत् ।
> मनसोच्चारयेन्मन्त्रान् प्राणायाममृते द्विजः ॥

इति । अस्यायमर्थः—प्राणायामव्यतिरिक्तमन्त्रान् मनसोच्चारयेत् । प्राणायाममन्त्रांस्तु मनसाऽपि नोच्चारयेत् । अमन्त्रकमेव प्राणायामं कुर्यादिति यावत् । मनसोच्चारयेदित्येतदञ्जलिप्रक्षेपव्यतिरिक्तविषयम् । अत एव पैठीनसिः—‘सूतके सावित्र्याऽञ्जलिं प्रक्षिप्य प्रदक्षिणीकृत्य सूर्यं ध्यायन्नमस्कुर्यात्’

इति । सन्ध्याविधावुक्तसावित्रीमन्त्रस्यैव पुनर्वचनं मनसोच्चारणानिवृत्त्यर्थम् । तेन सावित्रीमन्त्रस्योच्चारणं वाचा कर्तव्यम् । विष्णुरपि त्याज्यकर्माण्याह—'आशौचे होमदानप्रतिग्रहस्वाध्याया निवर्तन्ते नाशौचे कस्यचिदन्नमश्नीयात्' इति । होमोऽत्र वैश्वदेवोऽभिप्रेतः,

विप्रो दशाहमासीत वैश्वदेवविवर्जितः ।

इति संवर्तेन विशेषतोऽभिधानात् । वैश्वदेवाभिप्रायेण शङ्खोपि—

दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च ।
प्रेतपिण्डक्रियावर्जमाशौचे विनिवर्तयेत् ॥

पितृकर्म अमावास्याश्राद्धादिकम् । न च होम इति सामान्योक्तिबलादग्निहोत्रौपासनादिकमपि निवर्तनीयमिति शङ्कनीयम् । यत आह याज्ञवल्क्यः—

वैतानौपासनाः कार्याः क्रियाश्च श्रुतिचोदिताः ।

इति । वैतानाः गार्हपत्यादिवह्निसाध्याः 'यावज्जीवमग्निहोत्रं जुहोति, यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' इत्यादिश्रुतिचोदिताः । तथा गृह्यैकाग्निसाध्याः औपासनाः औपासनहोमपार्वणस्थालीपाकाद्याश्च कार्या इत्यर्थः । स्मृत्यन्तरं च—

कुर्याद्वैतानिकं कर्म स्नात्वोपस्पर्शनात्स्वयम् ।

इति । आशौचप्राप्त्यनन्तरं स्नात्वाऽऽचम्य वैतानिकं कर्म अग्निहोत्रादिकं तत्काले स्वयं कुर्यादित्यर्थः । न चात्र धर्मा-

योग्यत्वलक्षण आशौचे स्थिते कथं वैतानिके कर्मणि विधि-र्घटत इति वाच्यं, यतो विधिवलादेव धर्मयोग्यत्वमवगम्यते। उक्तं च गोभिलेन—

अग्निहोत्रे तु होमार्थं शुद्धिस्तात्कालिकी स्मृता।
पञ्चयज्ञान्न कुर्वीत अशुद्धः पुनरेव सः॥

इति। अग्निहोत्रादिके कर्मणि यत्राशौचमध्ये विधिरस्ति तत्र तात्कालिकी शुद्धिः। कर्मसंकल्पात्पूर्वक्षणमारभ्य वैतानिका नुष्ठानपर्यन्तं धर्मयोग्यत्वलक्षणशुद्धिर्वेदितव्या। तत्र पुनः पञ्च महायज्ञाः तदाशौचे कर्तव्या इति विधिर्नास्ति, तत्र शुद्धि-ज्ञापकविध्यभावात् कर्मायोग्यत्वमेवेत्यर्थः। एवं विधिज्ञापिते कर्मयोग्यत्वे सत्यपि यो नरो न जुहोति तस्य प्रायश्चित्तं कर्तव्यम्। अतएव मनुः—

दर्शं च पूर्णमासं च कर्म वैतानिकं च यत्।
सूतकेऽपि त्यजेन्मोहात्प्रायश्चित्तीयते हि सः॥

इति। वैतानिकग्रहणं स्मार्तस्याप्याशौचविहितकर्मण उपलक्ष-णार्थम्। अत एव जातूकर्ण्यः—

सूतके तु समुत्पन्ने स्मार्तं कर्म कथं भवेत्।
पिण्डयज्ञं चरुं होममसगोत्रेण कारयेत्॥

पिण्डयज्ञः पिण्डपितृयज्ञः। चरुः पार्वणस्थालीपाकः। होमः प्रतिदिनौपासनहोमः। कारयेदिति विधिबलात् स्मार्ते कर्माणि

त्वेकत्यागात्मककर्मण्येव धर्मायोग्यत्वलक्षणाशुद्धिः नान्यत्रेति गम्यते । अत एव बृहस्पतिः—

सूतके मृतके चैव त्वशक्तौ श्राद्धभोजने ।
प्रवासादिनिमित्तेषु हावयेन्न तु हापयेत् ॥

न हापयेत् न त्यजेदित्यर्थः । तथाच जाबालिः—

जन्महान्योर्वितानस्य कर्मत्यागो न विद्यते ।
शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैः ॥

शालाग्नौ होम औपासनाख्यः, सोऽन्यगोत्रजैः कार्य इति नियमात् वैतानिकाग्नौ क्रियमाणाग्निहोत्रादिहोमोऽन्यगोत्रजैःकार्य इत्यनियमात्स्वयं कुर्यादित्यवगम्यते ।

वर्जयेत्सूतके कर्म नित्यनैमित्तिकादिकम् ।
आहिताग्नेस्तदा शुद्धिस्सद्य एव विधीयते ॥

इति । तत्र पूर्वार्धमाशौचे कर्तव्यानित्यनैमित्तिकादिविषयं, उत्तरार्धे त्वाहिताग्निविषयमित्यवगन्तव्यम् । एवमेव 'नित्यानि निवर्तेरन् वैतानवर्जम्' इति पैठीनसिवचनस्यापि विषयो बोद्धव्यः, श्रौतस्मार्तानां त्याग एवेति प्रतिप्रसवे विध्यभावात् । श्रौतानामप्यग्निहोत्रादीनां प्रथमारम्भकाले आशौचे त्याग एव, प्रतिप्रसवविधीनां प्रथमारम्भोत्तरकालानुष्ठेयाग्निहोत्रादिविषयत्वात् । नित्यं नैमित्तिकमित्यनुवृत्तौ काम्ये प्रतिप्रसवार्थमाह पुलस्त्यः—

सन्निहत्यामुपस्पृश्य राहुग्रस्ते दिवाकरे ।
सत्रधर्मप्रविष्टस्य दानकर्मफलैषिणः ॥

अयमर्थः—दानकर्मफलकामिनोपि सन्निहत्यामुपस्पृश्य तीर्थविशेष स्नात्वा दाने प्रवृत्तस्य सद्यश्शौचं, अन्नसत्रधर्मे प्रवृत्तस्य तद्दानफलार्थिनोऽपि सद्यश्शौचमिति । नैमित्तिकेऽपि क्वचित्प्रतिप्रसवार्थमाह वृद्धबृहस्पतिः—

कन्याविवाहे संक्रान्ते सूतकं न कदाचन ।

इति । नित्यनैमित्तिककाम्येष्वपि प्रतिप्रसवार्थमाह जामदग्न्यः—

सूतके मृतके वाऽपि जाह्नव्यास्सलिलाप्लुतः ।
नाभिमात्रे जले स्थित्वा कुर्याद्दानजपादिकम् ।
नित्यं नैमित्तिकं चापि काम्यं वाऽपि विशेषतः ॥

इति । यत्तु मार्कण्डेयपुराणं—

नित्यस्य कर्मणो हानिं न कुर्वीत कदाचन ।
तस्य त्वकरणे बन्धः केवलं मृतजन्म च ॥

इति, तत् सूत्याद्याशौचेऽपि विहिताग्निहोत्ररूपकर्महानिविषयम् । न तत् तथाविधिरहिततर्पणादिनित्यकर्मविषयम्, पूर्वोक्तवचनविरोधापत्तेः । यदपि तेनैवोक्तं—

दशाहं ब्राह्मणस्तिष्ठेद्दानहोमादिवर्जितः ।
क्षत्रियो द्वादशाहं च वैश्यो मासार्धमेव च ।
शूद्रश्च मासमासीत नित्यकर्मविवर्जितः ॥

इति। तत् वयोऽवस्थाप्रयुक्तसंपूर्णाशौचकालानामप्युपलक्षणार्थम्। यत्तु हारीतेनोक्तं—

ततस्त्वेकादशदिने यज्ञः स्वाध्याय एव च।
प्रवर्तन्ते क्रियाश्चैव इत्येतन्मनुरब्रवीत्॥

इति। 'ततस्त्वेकादशदिने' इत्येतदाशौचान्त्यदिनानन्तरादिनोपलक्षणार्थम्। ब्रह्मचारिणं प्रत्याह कात्यायनः—

न त्यजेत्सूतके कर्म न त्यजेत्तु क्वचिद्व्रती।

इति। गृहस्थवदस्य सूतकाभावः प्रायश्चित्तं निस इति॥

इति स्मृतिचन्द्रिकायामाशौचनियमाः.

अथ मुमूर्षोः कर्तव्यानि। व्यासः—

म्रियमाणं नरं दृष्ट्वा कर्ता भूम्यां शुचिस्थले।
देवालये नदीतीरे गङ्गाम्भसि वनस्पतेः॥
उत्तानं दक्षिणाग्रीवं तमुद्दिश्य च गां सृजेत्।
हिरण्यं भूमिदानं च तिलान् शक्त्या च दापयेत्॥
कुटुम्बिने दरिद्राय श्रोत्रियाय तपस्विने।
यद्दानं दीयते तस्मै तद्दानं स्वर्गसाधनम्॥
आतुरो वाऽथ पुत्रो वा दद्युरासन्नबान्धवाः।
कर्णे जपेदीशवाक्यं शास्त्रादिभिरुदीरितम्॥

शातातपश्च—

आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः।
अन्नपानाश्वगोवस्त्रभूशय्याद्यासनानि च॥

प्रेतलोके प्रशस्तानि दानान्यष्टौ विशेषतः ।
तस्माद्दानं तु कर्तव्यं मृतिकाले कथंचन ॥ इति ॥

इति स्मृतिचान्द्रिकायां मुमूर्षोः कर्तव्यानि.

अथाग्निनिर्णयः

उपनयनादूर्ध्वं मरणेऽग्न्युदकदानविधिमाह याज्ञवल्क्यः—

स दग्धव्य उपेतश्चेदाहिताग्न्यावृताऽर्थवत् ।

इति । उपनीतश्चेन्मृतः अहिताग्न्यावृता अहिताग्निसंस्कारप्रकारेण अर्थवत् प्रयोजनवद्यथा भवति तथा दग्धव्यः । अयमभिप्रायः—येषां भूशोधनदर्भास्तरणप्रोक्षणादीनामाहिताग्निविहितसंस्काराणां द्वारकार्यरूपं प्रयोजनमस्ति तान्यनुष्ठेयानि । लुप्तार्थानि पात्रसंयोजनादीनि त्वननुष्ठेयानि, यथा—कृष्णलेष्वातिदेशप्राप्तेषु अवघातप्रोक्षणादिषु द्वारलोपादवघातादीनामननुष्ठानं प्रोक्षणादीनां त्वनुष्ठानमिति । सान्ततिके चैवं, मैत्रावरुणविधानात् । सान्ततिकामिति जातकर्मप्रभृति योऽग्निर्धार्यते तस्मिन्नेव सर्वाणि कर्माणि क्रियन्ते कुमारस्य चौलप्रभृत्यरण्योस्समारोपणमा विवाहात् । ब्रह्मचार्यनुपनीतकन्यानां लौकिकेन कापालने वा दहनम् । तस्योत्पत्तिररण्योरुत्पत्तिवत् । लौकिकाग्निग्रहणं जातारण्योरभावेन । तत्सद्भावे तु तत्र मथित्वाऽग्निर्ग्राह्य इति ।

तथाच यज्ञपार्श्वः—

बालस्य दहनं कार्यं कपालेनैव वह्निना ।

लौकिकेनापरे प्राहुः जातारण्योस्तथा परे ॥

इति । कात्यायनोऽपि—

दहनं ब्रह्मचारिणां मृतानां त्यक्तवह्निनाम् ।

विधुराणां यतीनां च पतितानां च योषिताम् ॥

कपालवह्निना दाहस्स्वशाखोक्तविधानतः ।

गृहस्थं प्रदहेदेवं विवाहोत्पन्नवह्निना ॥

त्रेताग्निभिश्चाहिताग्निमिति याज्ञिकसंमतम् ॥

इति । वसिष्ठः—'कपालमग्निवर्णं तप्त्वाऽन्तरे करीषादि निक्षिप्य तत्र जातो योऽग्निस्स कपालाग्निः' इति । गृह्यकारिका—

विहीनभार्यस्य मृतस्य वह्निः

उत्तापनस्स्यादथ लौकिको वा ।

अभर्तृकायाश्च तथा स्त्रियश्च

पाणिग्रहात्पूर्वमृतौ शिशोश्च ॥

इति । वृद्धयाज्ञवल्क्यः—

आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः ।

अनाहिताग्निरेकेन लौकिकेनापरे जनाः ॥

वृद्धवसिष्ठोऽपि—

तुषाग्निना दहेत्कन्यां व्रीहिभिर्वा यवेन वा ।

अथवोत्तपनीयेन कापालेनानलेन वा ॥

यतिं च ब्रह्मचारिणं दहेत्कापालवह्निना ।
अथवोत्तपनीयेन तुषेणैवापरे विदुः ॥
दर्भेष्वग्निं समारोप्य पुनर्दर्भेषु संस्थितः ।
पुनर्दर्भतृतीयेषु वह्निरुत्तापनस्स्मृतः ॥
कपालमग्नौ निक्षिप्य तप्ते चैव तुषं क्षिपेत् ।
करीषं वा समुत्पन्नस्तुषे तु तुषपावकः ॥
यावत्तप्तकपालेन केवलेनाग्निसंभवः ।
तावत्कपालसंभूतः पावकः परिकीर्तितः ॥
यस्मिन् देशे स्थितो वह्निस्ततोऽन्यत्र मृतो यदि ।
चरुः पाथिकृतः कार्यः पूर्णाहुतिरथापि वा ॥

औपासनाग्निसमीपस्थानं नीत्वा तस्मिन्नग्नौ पाथिकृतेष्टिं पूर्णाहुतिं वा हुत्वा प्रेतसंस्कारं कुर्यात् सर्वथाऽन्यदेशे विधिना दहेत् । तद्विषये प्रेताधानं कार्यम् । तावन्तं कालमग्नेः का गतिः ? उच्यते—

अन्यदीयेन वत्सेन या गौः स्नुतपयोधरा ।
आ शरीराहुतेस्तस्याः पयसा होम इष्यते ॥
अन्यस्या अपि होतव्यं पयसा तदभावतः ।
यस्त्वनौपासनादग्धस्तं विध्युक्ताग्निना दहेत् ॥

इति । स्वशाखाव्यतिरिक्तविधिना दग्धमपि पुनस्स्वशाखोक्तविधिना दहेत् । तथा—

संस्कुर्यात्तु पुनर्दग्धमनौपास्येन वह्निना ।
अनात्मीयेन शास्त्रेण यो दग्धस्तं च शास्त्रतः ॥

इति । यत्तु वचनम्—

देशान्तरास्थिते वह्नौ दूरदेशस्थितो मृतः ।
अग्निमुत्पाद्य कर्तव्यं प्रेतकृत्यं द्विजोत्तमैः ॥

इति, तच्छिष्टैरादृतम् । प्रेतो विच्छिन्नाग्निश्चेद्विधिना संधाय द्वादशगृहीतं जुहुयात् । तदुक्तमापस्तम्बेन—"यद्याहिताग्निर्विच्छिन्नाग्निर्विधुराग्निरुत्सृष्टाग्निर्वा म्रियेत न तमन्येन त्रेताग्निभ्यो दहन्तीति तस्य प्राचीनावीत्यग्न्यायतनान्युद्धृत्यावोक्ष्य यजमानायतने प्रेतं निधायापरेण गार्हपत्यमरणी सन्निधाय मन्थति 'येऽस्याग्नयो जुह्वतो माऽऽसकामास्संकल्पयन्ते यजमानमाऽऽसं । जानन्तु तेऽस्मै हविषे सादिताय स्वर्गं लोकमिमं प्रेतं नयन्तु' इति तूष्णीं विहृत्य द्वादशगृहीतेन स्रुचं पूरयित्वा तूष्णीं हुत्वा प्रेतेऽमात्या इत्येतदादि कर्म प्रतिपद्यते" इति । आत्मादिसमारूढेष्वग्निषु यजमानमरणे तेनैवोक्तं—"यद्यात्मन्यरण्योर्वा समारूढेष्वग्निषु यजमानो म्रियेत पूर्ववदग्न्यायतनान्युद्धृत्यावोक्ष्य यजमानायतने प्रेतं निधाय गार्हपत्यायतनेऽग्निमुपसमाधाय प्रेतस्य दक्षिणं पाणिमभिसंगृह्य तत्पुत्रो भ्राताऽन्यो वा प्रत्यासन्नबन्धुः उपावरोहेति जपत्यरण्योर्वोपावरोह्य मन्थेद्यद्यरण्योरसमारूढस्स्यान्निर्वर्तमाने प्रेतमन्वारम्भयित्वेमं मन्त्रं जपेत्" इति । तथाच स्मृत्यन्तरं—

यद्यात्मनि समारूढो मृतोऽयं श्रुतिरुच्यते ।
मृतस्य दक्षिणं पाणिमन्वारभ्य जपेदिमम् ॥
उपावरोह जातवेदो यद्यरण्योस्तथा जपेत् ।
मथित्वाऽग्निं समाधाय वह्नेर्दक्षिणतः परे ॥

इति । यदा युगपज्जायापत्योर्मरणं तदा सहैव पितृमेधः । तदुक्तमापस्तम्बेन—'सहैव प्रेते सहैव पितृमेधः' इति । अत्र विभज्याग्निप्रदानं केचिदिच्छन्ति तदसदिति भाष्यकारेणोक्तम् । सर्वाधाने बहुभार्यस्य पूर्वं ज्येष्ठामरणे तत्राग्नीनुत्सृज्य द्वितीयया सहाधानादि । पुनस्तन्मरणे तत्राग्नीनुत्सृज्य पत्न्यन्तरेण सहाधानम् । पत्न्यन्तराभावे पुनः परिणीय तया सहाधानादि । परिणयनासामर्थ्ये आत्मार्थमग्न्याधानम् । तथाऽऽह शौनकः—

पत्न्योरेका यदि मृता दग्ध्वा तेनैव तां पुनः ।
आदधीतान्यया सार्धमाधानविधिना गृही ॥

इति । आपस्तम्बकल्पभाष्यार्थकारोऽपि—

भार्याद्वयत्वेऽपि मृते कळत्रे
प्रेतां दहेयुस्सहिताग्निनैव ।
अतः परस्तादनयोस्सहैव
संधानमग्नेर्विधिना पुनश्च ॥

इति । स्मृत्यन्तरेऽपि—

बहुपत्नीकपक्षे तु ज्येष्ठा चेत्पूर्वमारिणी ।

तां दहेदग्निहोत्रेण पुनराधानमन्यया ॥
कनिष्ठां तु मृतां पूर्वं दहेन्निर्मन्थ्यवह्निना ।
निर्मन्थ्य एव सर्वासामाहरेयुर्न केवले ॥

तत्रैव पूर्वं यजमानमरणे तस्याग्निहोत्रत्रेतायां पितृमेधः । पत्नीनां तु प्रेताधानमेव पूर्ववत् । अर्धाधाने त्वेकभार्यस्य पूर्वं यजमानस्य मरणे तस्याग्नित्रेतायां पितृमेधः । पत्न्या औपासनेन, 'तयोर्यः पूर्वं म्रियेत तस्याग्नित्रेतायां पितृमेधस्संपद्यते यः पश्चात्तस्यौपासनेन' इत्यापस्तम्बस्मरणात् । अत्रैव पूर्वं पत्नीमरणे तत्राग्निहोत्रमौपासनं चोत्सृज्य पुनः परणीय तया सहाधानम् । 'अथैनमुपोषति' इत्यारभ्य 'पुरस्तात्सभ्यावसथ्याभ्यामौपासनेन च' इत्यौपासनस्यापि प्रतिपत्तिविधानात् । पुनस्तन्मरणे तत्राप्ययमेव न्यायः । पुनर्ग्रहणासामर्थ्ये अत्मार्थमग्न्याधानादीति । अर्धाधाने त्वनेकभार्यस्य पूर्वं यजमानस्य मरणे तस्याग्नित्रेतायां पितृमेधः । पत्नीनां तु स्वैस्स्वैरौपासनाशैः । तथाच त्रिकाण्डः—

आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः ।
अनाहिताग्निरेकेन यः पूर्वं पतिभार्ययोः ॥
स्याद्भार्ययोरन्यतरा मृता वा
दग्ध्वाऽखिलौपासनवह्निनैव ।
..............ग्नेर्विधिवत्प्रदानं
कृत्वाऽन्यमौपासनमाददीत ॥

लौक्यानले वा यदि च द्विभार्य-
संगृह्यवह्नेस्तु विभज्य दद्यात् ।
भागान्तरं वह्निमथाददीत-
नष्टे तु पूर्वाग्निमवाप्य पश्चात् ॥ इति ॥

इति स्मृतिचान्द्रिकायामग्निनिर्णयः.

अथ संस्कर्तृनिरूपणम्.

तत्र पुत्रबहुत्वेऽग्निप्रदानं सर्वैर्न कर्तव्यं, अपितु ज्येष्ठेनैव कर्तव्यम् । तथाच मरीचिः—

सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतम् ।
द्रव्येण चाविभक्तेन तत्सर्वैस्तु कृतं भवेत् ॥

इति । मत्स्यपुराणेऽपि—

प्रेतस्य पुत्रो दाहादि कुर्यादेवौरसस्सुतः ।
बहुत्वे तु गुणी दद्यात्समत्वे ज्येष्ठ एव तु ॥

इति । ऋश्यश्रृङ्गोऽपि—

पुत्राणां मध्यमो वाऽपि कनिष्ठो ज्येष्ठ एव वा ।
पितुर्यश्च प्रियतमस्सर्वं तेनैव कारयेत् ॥
पुत्रास्सर्वे पितृद्विष्टाः पत्नी भ्राता सखाऽपि वा ।
अग्निदाहादिकर्माणि कुर्युः पुत्रयादयः पितुः ॥

इति। अग्निदानाधिकारी रोगादिनाऽशक्तश्चेदाह जमदग्निः—

ज्येष्ठपुत्रेण कर्तव्याः पिण्डदानोदकक्रियाः।
अशक्तोऽप्यग्निदः पुत्रश्शेषमन्येन कारयेत्॥

वसिष्ठोऽपि—

ज्येष्ठे सन्निहिते चार्ते वर्तमाने क्रियान्तरे।
पित्रोः पुत्रेण कर्तव्यं द्वितीयेनानुजेन वा॥
पित्रोस्सपिण्डीकरणं ज्येष्ठेनाकरणं यदि।
पुनर्ज्येष्ठेन कर्तव्यं पिण्डनिर्वापणे कृते॥
दम्पत्योर्मरणे प्राप्ते दशाहाभ्यन्तरे यदि।
ज्येष्ठेनैव तु कर्तव्यं मातापित्रोस्तु तत्क्रियाः॥

तथा पुत्राभावे सपिण्डादिना कर्तव्यम्। तथाऽऽह पारस्करः—

पुत्रो भ्राताऽथ दौहित्रो ज्ञातिजामातृकोऽपि वा।
प्रथमेऽहनि यो दद्यात्स दशाहं समापयेत्॥

पुत्राभावे पितृसपिण्डाश्शिष्याश्च। तदभावे ऋत्विगाचार्यादिः।

भृगुरपि—

असगोत्रस्सगोत्रो वा यदि स्त्री यदि वा पुमान्।
प्रथमेऽहनि यो दद्यात्स दशाहं समापयेत्॥
अस्थिसंचयनादर्वागागतो यदि पुत्रकः।
तदादि कर्म कुर्वीत दाहको विसृजेच्च तत्॥
अस्थिसंचयनादूर्ध्वमागतो यदि पुत्रकः।
प्रथमेऽहनि यो दद्यात्स दशाहं समापयेत्॥

इति। तथा प्रथमेऽहनि यद्द्रव्यं पिण्डार्थं दशाहान्तं तदेवा- द्रव्यम्। तदुक्तं शुनःपुच्छेन—

शालिना सक्तुभिर्वाऽपि शाकेनाप्यथ निर्वपेत्।
प्रथमेऽहनि यद्द्रव्यं दशाहान्तं च तद्भवेत्॥

यज्ञपार्श्वः—

अपुत्रस्य तदासन्नो दद्यात्पिण्डोदकादिकम्।
आ समाप्तेः प्रतिदिनं त्वन्यथा किल्बिषी भवेत्॥

पित्रोस्संस्कारे ज्येष्ठ एव कर्ता, तदभावेऽसन्निधौ चानुजः। पुत्राभावे प्रत्यासन्नस्सपिण्डादिः। तदसन्निधानेऽनन्तरस्सं- स्करोति तथा, यथा दशाहमध्ये प्रत्यासन्नसान्निध्येऽपि स दशाहं समापयेत्, नोर्ध्वम्। यदि रोगादिना पुत्रादिरसमर्थो भवति तदा दशाहान्तमन्येन कारयेत्, आर्ते प्रतिनिधिदर्शना त्प्रायश्चित्तादर्शनाच्च। यदा तु 'असगोत्रस्सगोत्रः' इत्यादिना शाखान्तरकर्ता तदा स्वशाखया पितृमेधः। अन्यथा चेत्पुनस्सं- स्करणं कर्तव्यम्। तदाह कात्यायनः—

प्रक्रिया त्रिविधा प्रोक्ता विद्वद्भिः कार्यकारिभिः।
अक्रिया च परोक्ता च तृतीया चायथाक्रिया॥
स्वशाखाविधिमुत्सृज्य परशाखाश्रयं तु तत्।
कर्तुमर्हति दुर्मेधा मोघं तस्य च तत्फलम्॥
यन्नाम्नातं स्वशाखायां पारक्यमविरोधि यत्।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत्॥

यत्कर्मणि द्रव्यविधिर्यथोक्तस्तथैव कर्ता यदि चान्यथा स्यात् ।
तत्कर्म कुर्वीत पुनर्यथोक्तं तन्त्रस्य लोपे न पुनः क्रिया स्यात् ॥

प्रधानस्याक्रियायां तु साङ्गं तत्क्रियते पुनः ।
तदङ्गाकरणे कुर्यात्प्रायश्चित्तं न कर्म तत् ॥

इति । अत्र प्रधानस्य कर्मणोऽकरणे तत्साङ्गमेव पुनः कर्तव्यम् । तदङ्गाकरणे तस्याङ्गस्य नावृत्तिः । नापि तावन्मात्रस्याङ्गस्य करणं, किंतु प्रायश्चित्तमेव कार्यम् ॥

अथ स्त्रीणामग्निप्रवेशकर्मोच्यते.

*प्रवेशश्चानुगमनं स्त्रीणामेव विधीयते ।
अमन्त्रकं तु शूद्राणां प्रवेशविधिरुच्यते ॥

यस्यकस्यचिद्ब्राह्मणस्य मरणकाले संप्राप्ते तत्पत्नी मङ्गळस्नानं कृत्वा धौतवस्त्रं परिधायाचम्य गन्धपुष्पादीनि धृत्वा भर्तुस्समीपं गत्वा ब्राह्मणानाहूय 'पूर्वोक्तैवंगुणविशेषणविशिष्टायां पुण्यतिथौ विष्णुरूपेण भर्त्रा सह ब्रह्मलोके निवाससिध्यर्थं भर्त्रा सहानुगमनं करिष्ये' इति संकल्प्य दर्भाक्षतसहितं जलं धृत्वा पतिव्रता पूर्वाभिमुखी समासीना—

सर्वकामप्रदायास्मै पतिरूपाय विष्णवे ।
मम देहं प्रदास्यामि स्थातुं वै स्वर्गमन्दिरे ॥
भूमिर्वियज्जलं तेजो वायुश्च जगदीश्वराः ।
सप्तर्षयश्च कालश्च साक्षिणस्सर्वदेवताः ॥

* कोशद्वयमध्ये एकस्मिन्नेवकोश सहगमनप्रयोगोऽयमुपलभ्यते.

मत्कृतं पातकं यच्च मनोवाक्कायसंभवम् ।
तत्सर्वं नाशमाप्नोतु वह्नौ देहं विसर्जये ॥

अस्मै भर्त्रे श्रीमहाविष्णुस्वरूपाय मदीयब्रह्मलोकनिवासासिद्धिं कामयमानाऽमुकगोत्राय तुभ्यमहं संप्रददे न ममेति प्राणदानं कुर्यात् । कर्ता आसन्द्यां दक्षिणाग्रान् दर्भानास्तीर्य तत्र शवं निधाय शवस्य वामभागे तत्पत्नीं निधाय 'संगच्छध्वम्' इति दर्भरज्जुना प्रेतपत्नीं चाबध्य वाहकैर्नीयमानं प्रेतमनुगत्वा चितेर्दक्षिणभागे अग्निं प्रतिष्ठाप्य आज्यभागान्ते चितिमध्ये दक्षिणशिरसं शवं निधाय पत्नीं तस्य वामभागे निक्षिप्य तयोर्भुजयोर्मध्ये 'मैनमग्ने' इत्यग्निं दत्त्वा ततः कर्ता प्राचीनावीती दर्भपाणिरञ्जलिं बध्वा 'सूर्यं ते चक्षुश्शरीरैरग्ने...............' इत्यनुमन्त्र्य स्रुवेणाज्यं गृहीत्वा 'य एतयोः पथो गोप्तारस्स्वाहा' इति हुत्वा दहेत् ॥ इत्यनुगमनविधिः ॥

अथाग्निप्रवेशप्रकार उच्यते.

यदा भर्तरि मृते सति पत्नी अनुगमनं कर्तुमसमर्था सती अग्निप्रवेशेन देहत्यागं कर्तुं वाञ्छति तदा पुत्रादिः कर्ता तां पतिव्रतामग्निं प्रवेशयेत् । मृते भर्तरि सति तत्पूर्वं पतिव्रता स्नात्वाऽऽचम्य भर्तुः प्राणदानं कृत्वा वाहकैर्नीयमानं प्रेतमनुमन्त्र्य श्मशानदेशं गत्वा भर्तुस्संस्कारान्ते तटाके वा

नद्यां वा स्नात्वा हरिद्रानुलेपनं गन्धपुष्पभूषणानि धृत्वा हरिद्रा-वस्त्रं च परिधायाचम्य भर्तुस्समीपं गच्छेत्। ततः पुत्रादिः कर्ता चितेरुत्तरभागे दक्षिणाग्रान् दर्भानास्तीर्य तत्र तामुपवेश्य दक्षिणाभिमुखं कृत्वा 'आप्यायस्व' इति तां पञ्च-गव्या मार्जयित्वा 'आपोहिष्ठा मयो भुवः' इति, हिर-ण्यवर्णाः' इति च मार्जयित्वा ततः प्रेतपत्नीं प्रेतसमीपे निधाय प्रेतभुजाग्नौ 'य एतस्य' इत्यादिनाऽऽज्याहुतीः पूः र्णाहुतिं च हुत्वा आज्यस्थालीं स्रुवमग्निं प्रेतपत्नीं चिते-पश्चात् प्राङ्मुखमुपवेश्य पुनराज्यमानीय तस्याश्शिरसि दर्भा-ग्रेण धाराकारेण 'भूस्स्वाहा भुवस्स्वाहा सुवस्स्वाहा भूर्भुवस्सुव-स्स्वाहा' इत्याज्यहोमं कुर्यात्। ततः प्रेतपत्नी चितेरुत्तरभागे दक्षिणाभिमुखी स्थित्वा साक्षतोदकमञ्जलिं गृहीत्वा—

त्रयीमय त्रिमूर्त्यात्मन् त्रैलोक्यैकप्रदीपक।
ग्रहनायक सप्ताश्व गृहाणार्घ्यं नमोस्तु ते॥

इति सूर्यायार्घ्यं दत्त्वा—

मनोवाक्कायजं भर्तुर्वाग्विलङ्घनजं च यत्।
तत्पापं नाशयाशु त्वं सप्तजिह्व नमोऽस्तु ते॥

इत्यग्नौ फलमेकं दत्त्वा दक्षिणपादपूर्वकमाग्निप्रवेशं कुर्यात्। एवं प्रेतं दहित्वाऽनन्तरा ज्ञातयस्सर्वान् केशान् वापयेयुः। अन्यकर्तृविषये यथाक्रुतकर्तृविशेषवचनानि श्राद्धप्रकरणगतानि॥

इति स्मृतिचन्द्रिकायां संस्कर्तृनिरूपणम्.

——>o<——

अथ प्रेतदाहादिविषयाणि.

तत्र त्रिकाण्डीमण्डनः—

प्रत्यक्षे चाप्रतिहतौ संस्कारेण च शोधनम् ।
कुर्यात्तत्राधरोच्छिष्टे प्राजापत्यत्रयं चरेत् ॥
ऊर्ध्वोच्छिष्टेऽपिच तथा प्राजापत्यान् षडाचरेत् ।
पराशरस्तु त्रीन् प्राह भृगुः पञ्च षडङ्गिराः ॥
अस्पृश्यस्पृष्टमरणे कृच्छ्रान् षड्गौतमोऽब्रवीत् ।
प्रायश्चित्तं तु सर्वस्य शक्तो द्वादशवार्षिकम् ॥
विप्रवाक्यानुसारेण प्रत्याचार्यविधिर्यथा ।
कृत्वा तु दहनं कुर्यादन्यथा किल्बिषी भवेत् ॥
कर्ताऽधिकारसिद्ध्यर्थं त्रीन् कृच्छ्रान् पञ्च सप्त वा ।
चरेद्यद्वा तु दानाद्यैः पैतृमेधिकमाचरेत् ॥

इति । दाहादिकं स्नपनानन्तरमेव कार्यम् । तदाह कात्यायनः—

दुर्बलं स्नापयित्वा तु शुद्धचेलाभिसंवृतम् ।
दक्षिणाशिरसं भूमौ बर्हिष्मत्यां निवेशयेत् ॥
घृतेनाभ्यक्तमाप्लाव्य सवस्त्रमुपवीतिनम् ।
चन्दनोक्षितसर्वाङ्गं सुमनोभिर्विभूषितम् ॥
तथा नळमयीं मालामाबध्य च विभूषितम् ।
हिरण्यशकलान्यस्य क्षिप्त्वा छिद्रेषु सप्तसु ॥

मुखे वस्त्रं पिधायैनं निर्हरेयुस्सुतादयः ।
प्राचीनावीतिनो भूत्वा गच्छेयुर्मौनमाश्रिताः ॥

इति। अत्र ब्राह्मणादिशवनिर्हरणे दिङ्नियमो मनुना दर्शितः—

दक्षिणेन मृतं शूद्रं पूर्वद्वारेण निर्हरेत् ।
पश्चिमोत्तरपूर्वेषु यथायोगं द्विजन्मनः ॥

इति । वसिष्ठः—

औदुम्बर्यामथासन्द्यां वहेदूर्ध्वमुखं शवम् ।
न ग्रामाभिमुखं नाधो नयेयुर्याम्यशीर्षकम् ॥
वृद्धाः प्रेतस्य पुरतः स्त्रियो बालाश्च पृष्ठतः ।
अधःकृतोत्तरीयास्स्युः प्रविमुक्तशिरोरुहाः ॥
गच्छेयुर्बान्धवाः पश्चान्नाग्नेः प्रेतस्य चान्तरे ॥

इति । कात्यायनः—

आमपात्रेऽन्नमादाय प्रेतमग्निपुरस्सरम् ।
एकोऽनुगच्छेत्तस्यार्धमर्धं पथ्युत्सृजेद्भुवि ॥
अर्धमादहनं प्राप्त आसीनो दक्षिणामुखः ।
सव्यं जान्वाच्य शनकैस्सतिलं पिण्डदानवत् ॥

इति । पिण्डदानविधिना आदहनात् स्मशानपर्यन्तमासीनो भुवि निक्षिपेदित्यर्थः । गौतमः—

आग्नेय्यां वाऽथ नैर्ऋत्यां दाहदेशं प्रकल्पयेत् ।
उद्धृत्य कण्टकान् वृक्षान् वानस्पत्यौषधीरपि ॥

ऊर्ध्वबाहुमितं याम्यं खातं प्राग्दक्षिणायतम् ।
पञ्चारत्निमितं कुर्युरधस्ताद्द्वादशाङ्गुलम् ॥

दक्षिणाग्रान् कुशान् स्तीर्य तिलान् क्षिप्त्वाऽथ यावकान् ।
काष्ठैरूर्ध्वमुखं दद्यान्न नग्नं तु यथा हविः ॥

इति । व्याघ्रोऽपि—

नाधोमुखं न नग्नं च दहेयुर्मलदूषितम् ।
अयज्ञियसमिद्भिश्च चण्डालपतिताहृतैः ॥

क्रिमिकीटादिदुष्टैश्च न दहेत्तु चिरन्तनैः ।
वस्त्रं परित्यजेदर्धमर्धं तु परिधापयेत् ॥

प्रचेताश्च—

स्नानं प्रेतस्य पुत्राद्यैर्विधेयं पूजनं ततः ।
न नग्नं तु दहेद्वस्त्रं किंचिद्देयं परित्यजेत् ॥

अर्धं स्मशानवासिने देयमित्यर्थः । वृद्धपराशरः—

प्रेतस्पर्शनसंस्कारे ब्राह्मणो नैव दुष्यति ।
वोढा चैवाग्निदाता च सद्यस्स्नात्वा विशुध्यति ॥

एतदनाथब्राह्मणविषयं,

अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः ।
पदे पदे यज्ञफलमानुपूर्व्याल्लभन्ति ते ॥

न तेषामशुभं किंचित्पापं वा शुभकर्मणाम् ।
जलावगाहनात्तेषां सद्यश्शौचं विधीयते ॥

इत्युक्तत्वात् । यत्तु देवलेनोक्तं—

अह्नि चेद्दहनं कुर्यादूर्ध्वमस्तमयाद्रवेः ।
स्नात्वा गृहं विशेद्विप्रो रात्रौ चेदुदयाद्रवेः ॥

इति, यदपि हारीतेनोक्तं—'प्रेतस्पर्शे न ग्रामं प्रविशेयुरा नक्षत्रदर्शनाद्रात्रौ चेदादित्यस्य' इति, तन्मोहादिनाऽकरणीये वेदितव्यम् । यत्त्वङ्गिरसा—

यःकश्चिन्निर्हरेत्प्रेतमसपिण्डः कथंचन ।
स्नात्वा सचेलं स्पृष्ट्वाऽग्निं तस्मिन्नेवाह्नि वै शुचिः ॥

इति, तद्धनलोभादिना श्रोत्रियब्राह्मणनिर्हरणं कुर्वतोऽसपिण्डस्याशौचमस्तीत्येवंपरम् । तथाच मनुः—

असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ।
विशुद्ध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् ॥
यद्यन्नमत्ति तेषां हि स दशाहेन शुध्यति ।
अनदन्नन्नमह्नैव न चेत्तस्मिन् गृहे वसेत् ॥

इति । यस्तु प्रेतनिर्हरणं कृत्वा तस्मिन्नेव गृहे वसति न च तत्रान्नमश्नाति तत्र त्रिरात्रमाशौचं कार्यम् । गौतमः—'अवरश्चेद्वर्णः पूर्ववर्णमुपस्पृशेत्पूर्वो वाऽवरं तत्र शवोक्तमाशौचम्' इति । उपस्पर्शनं निर्हरणम् । ब्राह्मणस्य शूद्रशवनिर्हरणे दशरात्रमाशौचं भवतीत्यर्थः । यस्त्वर्थलोभादसवर्णशवनिर्हरणं करोति तस्य द्विगुणमाशौचं व्याघ्र आह—

अवरश्चेत्परं वर्णं परो वाऽप्यवरं यदि ।
वहेच्छववदाशौचं दृष्टार्थे द्विगुणं भवेत् ॥

इति । असवर्णे तु निर्हरणे यदुक्तमाशौचं तद्दृष्टार्थे द्विगुणमाशौचं भवतीत्यर्थः । यत्त्वादिपुराणं—

असवर्णं तु मूल्येन नीत्वा चैव दहेन्नरः ।
आशौचं तु भवेत्तस्य प्रेतजातिसमं सदा ॥

इति, तदापद्विषयम् । यस्तु सपिण्डमेव प्रेतं निर्हरति न तस्याशौचाधिक्यं, प्रेतनिर्हरणस्य विहितत्वात् । तथाऽऽह देवलः—

विहितं तु सपिण्डानां प्रेतनिर्हरणादिकम् ।
तेषां करोति यःकश्चित्तस्याधिक्यं न विद्यते ॥

आधिक्यं आशौचाधिक्यमित्यर्थः। समानोदकानिर्हरणे दशाहम् । तदाह स एव—

यस्समानोदकं प्रेतं वहेद्वाऽथ दहेत वा ।
तस्याशौचं दशाहं स्यादन्येषां तु त्र्यहं विदुः ॥

इति । ब्रह्मचारिणः प्रेतनिर्हरणे व्रतलोपोऽस्त्येव । तथाऽऽह देवलः—

ब्रह्मचारी न कुर्वीत शवदाहादिकाः क्रियाः ।
यदि कुर्याच्चरेत्कृच्छ्रं पुनस्संस्कारमेव च ॥

इति । पित्रादिशवदहने तु न दोषः । तदाहतुर्मनुदेवलौ—

आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम् ।
निर्हृत्य तु ब्रह्मचारी न व्रतेन वियुज्यते ॥

इति । ब्राह्मणशववहनादौ शूद्रं न नियोजयेत् । तदाह मनुः—

न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण वाहयेत् ।
अस्वर्ग्या ह्याहुतिस्सा स्याच्छूद्रसंस्पर्शदूषिता ॥

अत्र स्वेषु तिष्ठत्स्विति वचनं न विवक्षितं, अस्वर्ग्यत्वदोषश्रवणात् । मृतं द्विजं न शूद्रो निर्हरेच्छूद्रमपि न द्विज इति ॥

इति स्मृतिचन्द्रिकायां प्रेतदाहादिविषयाणि.

अथ दहनानन्तरकर्तव्यमाह याज्ञवल्क्यः—

सप्तमाद्दशमाद्वाऽपि ज्ञातयोऽभ्युपयन्त्यपः ।
अपनश्शोशुचदघमनेन पितृदिङ्मुखाः ॥

इति । सप्तमादिवसादर्वाग्दशमदिवसाद्वा ज्ञातयः समानगोत्रास्सपिण्डास्समानोदकाश्च 'अपनश्शोशुचदघं' इत्यनेन मन्त्रेण दक्षिणामुखा अपः अभ्युपयन्तीत्यर्थः । एतच्चायुग्मासु तिथिषु कार्यं 'प्रथमतृतीयपञ्चमसप्तमनवमेषूदकक्रिया' इति गौतमस्मरणात् । प्रचेतास्तु यावदाशौचं तावदिसाह—

दिनेदिनेऽञ्जलीन् पूर्णान् प्रदद्युः प्रेतकारणात् ।
तावद्वृद्धिः प्रकर्तव्या यावात्पिण्डस्समाप्यते ॥

तावदञ्जलिवृद्धिः कार्येत्यर्थः । अत्र प्रेतोपकारविशेषापेक्षया यावन्त्याशौचदिनानि तावदुदकदानावृत्तिः कार्या । ज्ञातिव्यतिरिक्तानामप्युदकदानं कर्तव्यमित्याह याज्ञवल्क्यः—

एवं मातामहाचार्यप्रेतानामुदकक्रिया ।
कामोदकं सखिप्रत्तास्वस्रीयश्वशुरर्त्विजाम् ॥

इति । प्रत्ता परिणीता दुहिता भगिनी च । स्वस्रीयो भागिनेयः । अत्र प्रेतानां मातामहादीनामसपिण्डानामुदकदानं नित्यं कार्यं, अकरणे प्रत्यवायश्रवणात् । सख्यादीनां तु कामतः, करणेऽभ्युदयः, अकरणे न प्रत्यवायः ॥

अत्र उदकदानविधिः.

सकृत्प्रसिञ्चन्त्युदकं नामगोत्रेण वाग्यताः ।

सपिण्डास्समानोदका बान्धवाश्च वृद्धपूर्वा अमुकनामा प्रेतोऽमुकगोत्रस्तृप्यत्विति सकृदेवोदकं सिञ्चेयुः प्रत्यहम् । ब्रह्मपुराणेऽपि—

शवं दग्ध्वा यथान्यायं दृष्ट्वा ज्योतींषि बान्धवाः ।
तिलाङ्गारान्* पुरस्कृत्य गच्छेयुः पुत्रसंयुताः ॥
शुद्धमस्फुटितं श्लक्ष्णं श्यामं लोहितमेव वा ।
पाषाणं तत आदाय गत्वा तत्र महाजलम् ॥
सचेलं दण्डवत्स्नात्वा मलं प्रक्षाल्य वर्ष्मजम् ।
महाजलं संप्रविश्य वस्त्रं संशोध्य वारिणा ॥

---

* बालान् दारान्. पा.

पुनस्सचेलं स्नात्वाऽथ वाग्यतास्सुसमाहिताः ।
वृद्धपूर्वास्सगोत्राश्च बान्धवाश्च समोदकाः ॥
सपिण्डाश्च क्रमात्पुत्राः प्राचीनावीतिनस्तथा ।
दक्षिणाभिमुखास्सर्वे दक्षिणाग्रकुशेषु हि ॥
पाषाणं तत्र निक्षिप्य कृत्वा तु पुरतोऽवटम् ।
नामगोत्रे समुच्चार्य प्रेतस्तृप्यत्विति ब्रुवन् ॥
गर्ते सकृत्प्रसिञ्चेयुस्तिलपूर्णं जलाञ्जलिम् ।
पित्रोस्तु यावदाशौचं तावत्कुर्याज्जलाञ्जलीन् ॥
यद्वा शताञ्जलीन् दद्यात्प्रथमेऽह्न्येकमञ्जलिम् ।
द्वितीये त्रीनञ्जलींश्च तृतीये पञ्च सप्त च ॥
चतुर्थे पञ्चमेऽह्न्येव नव दद्याज्जलाञ्जलीन् ।
एकादशाञ्जलीन् षष्ठे सप्तमे तु त्रयोदश ॥
पञ्चदशाष्टमे चैव ततस्सप्तदशाञ्जलीन् ।
एकोनविंशतिं दद्युर्दशमे तु शताञ्जलीन् ॥
सप्तत्यञ्जलयः केचित्त्रीणि सप्त च पञ्च वा ।
सप्ताष्टनवसंख्यास्स्युर्द्विदिने तु दशैव तु ॥
त्रिरात्राशौचिनः कुर्युः प्रथमे त्रिंशदञ्जलीन् ।
चत्वारिंशाद्द्वितीयेऽह्नि त्रिंशद्दद्यादतश्शुचिः ॥
सप्तसञ्जलिपक्षे तु प्रथमेऽह्नि द्वितीयके ।
एकैकविंशतिं दद्यात्तृतीये शेषतश्शुचिः ॥

इति । प्रचेता अपि—

> दिनेदिनेऽञ्जलीन् पूर्णान् प्रदद्यात्प्रेतकारणात् ।
> तावद्वृद्धिः प्रकर्तव्या यावत्पिण्डस्समाप्यते ॥

तावदञ्जलिवृद्धिः कार्येत्यर्थः । पैठीनसिः—'स्नात्वा शुचिः प्रेतं मनसा ध्यायन् दक्षिणाभिमुखस्त्रीनुदकाञ्जलीन्निनयेच्छवदाहप्रभृत्येकादशेऽह्नि विरमेत्' इति । वसिष्ठः—'शरीरमग्निना संस्कृत्यानवेक्षमाणा अपोऽभ्यवयन्ति सव्येतराभ्यां पाणिभ्यामुदकक्रियां कुर्वीरन्नयुग्मासु दक्षिणामुखाः' इति । हारीतः—'निर्हृत्य संस्कर्ताऽपो गत्वाऽऽप्लाव्य असौ तृप्यतामित्युदकाञ्जलिं निनयति' इति । शङ्खलिखितौ—'अथोदकक्रिया प्रेतस्य बान्धवा यथावृद्धमुदकमवतीर्य नोत्कर्षेयुरपः* प्रसिञ्चेरन् सकृद्दक्षिणामुखाः ब्राह्मणस्य उदङ्मुखाः प्राङ्मुखाश्च राजन्यवैश्ययोरपसव्यवासोयज्ञोपवीतिन एतच्च तत' इति । कात्यायनः—

> तथाऽनवेक्षमेत्यापस्सर्व एव शवस्पृशः ।
> स्नात्वा सचेलमाचम्य दद्युरस्योदकं स्थले ॥
> गोत्रनामानुवादान्ते तर्पयामीत्यनन्तरम् ।
> दक्षिणाग्रान् कुशान् कृत्वा सतिलं च पृथक्पृथक् ॥
> दिनेदिनेऽञ्जलिं पूर्णं प्रदद्यात्प्रेतकारणात् ।
> तावद्वृद्धिश्च कर्तव्या यावत्पिण्डस्समाप्यते ॥

---

* नोद्धर्षेयुरपः.

इति । प्रचेताः—

नदीकूलं तथा गत्वा शौचं कृत्वा यथार्थवत् ।
वस्त्रं संशोधयेदादौ ततः स्नानं समाचरेत् ॥
सचेलस्तु पुनस्स्नात्वा शुचिः प्रयतमानसः ।
पाषाणं तत आदाय विप्रो दद्याद्दशाञ्जलीन् ॥
द्वादश क्षत्रियो दद्याद्वैश्ये पञ्चदश स्मृताः ।
त्रिंशच्छूद्रस्य दातव्यास्ततस्स्वं प्रविशेद्गृहम् ॥
ततस्स्नानं पुनः कार्यं गृहशौचं च कारयेत् ।

इति । बालानामकृतनामधेयानां न किंचित्कर्तव्यमित्याह मनुः—

अजातदन्ता ये बाला ये च गर्भाद्विनिस्सृताः ।
न तेषामग्निसंस्कारो न विधिर्नोदकक्रिया ॥

इति । आपस्तम्बः—"मातुश्च योनिसंबन्धिभ्यः पितुश्चासप्तमात्पुरुषाद्यावतां संबन्धो ज्ञायते तेषां प्रेतेषूदकोपस्पर्शनं गर्भं परिहाप्योपरिसंवत्सरान्मातापितरावेव कर्तारश्च भार्यायां परमगुरुसंस्थायां वाऽऽकालमभोजनमातुरव्यञ्जनानि कुर्वीरन् केशान् प्रकीर्य पांसूनोप्यैकवाससो दक्षिणामुखास्सकृदुपमज्ज्योत्तीर्य वासः पीडयित्वोपविशन्त्येवं त्रिस्तत्प्रत्ययं तिलमिश्रमुदकं सगोत्रं नामधेयमुच्चार्योत्सिच्याप्रतीक्षास्तूष्णीं ग्राममेयु यत्स्त्रिय आहुस्तत्कुर्वन्तीतरेषु चैतदेके" इति । अमुकगोत्रायामुकशर्मणे एतत्तिलोदकं ददामीति प्रयोगः । एव-

मुदकं दत्त्वा पृष्ठतोऽनवेक्षमाणा ग्राममभ्येत्य गृहं प्रविश्य यत्स्त्रिय आहुस्तत्कुर्वन्ति । इतरेषु भार्यादिभ्योऽन्येष्वपि मृतेष्वाकालमभोजनं कर्तव्यमित्येके आचार्या अतिदिशन्ति, स्वमतं तु मातापितृगुरुष्वेव । एवमुक्तविधानेनोदकदानानन्तरं पिण्डदानं कर्तव्यम् । तदुक्तं ब्रह्मपुराणे—

ग्रामाद्बहिश्शुचौ देशे गोमयेनोपलेपिते ।
लौकिकाग्निं प्रतिष्ठाप्य स्नात्वा पात्रेण तैजसा ॥

मृन्मयेनापि कर्तव्यं श्रपणं पितृयज्ञवत् ।
अभिघार्य तमुद्वास्य पुनरप्यभिघार्य च ॥

पाषाणं पुरतस्स्थाप्य वाग्यतो दक्षिणामुखः ।
दक्षिणाग्रान् कुशान् स्तीर्य दद्यात्तेषूदकं सकृत् ॥

नामगोत्रे समुच्चार्य पिण्डं दद्यात्समन्त्रकम् ।
पुनस्तिलोदकं दद्यादेवं दशदिनेषु तु ॥
अशक्तौ प्रथमेऽह्नि स्यात्पञ्चमे दशमेऽपि वा ।
त्रिरात्राशौच उत्पन्ने त्रयः पिण्डा दशैव वा ॥
उदकं पिण्डदानं च पुनरप्युदकं नयेत् ।
वायसेभ्यो बलिं दद्याद्विवस्वतवरं स्मरन् ॥
अग्नौ जले वा निक्षिप्य स्नात्वा शश्वद्गृहं व्रजेत् ।
ब्राह्मणे दश पिण्डास्स्युः क्षत्रिये द्वादश स्मृताः ॥
वैश्ये पञ्चदश प्रोक्ताः शूद्रे त्रिंशत्प्रकीर्तिताः ॥

इति। शातातपोऽपि—

आशौचस्य तु निर्ह्रासे पिण्डान् दद्युर्दशैव तु।

इति। दशपिण्डनियमनं ब्राह्मणविषयम्। अत्र पिण्डसंख्या-नियमविशेषो यमेन दर्शितः—

दश पिण्डा ब्राह्मणस्य द्वादश क्षत्रियस्य तु।
दश पञ्च च वैश्यस्य शूद्रस्य त्रिंशदेव तु॥

इति। स्मृत्यन्तरेऽपि—

नवभिर्दिवसैर्दद्यान्नव पिण्डान् समाहितः।
दशमं पिण्डमुत्सृज्य रात्रिशेषे शुचिर्भवेत्॥

इति। यत्तु स्मृत्यन्तरं—

सायं प्रातर्द्विजाग्र्याणां पिण्डमप्युदकं ततः।
विंशतिं पिण्डमुत्सृज्य ब्राह्मणश्शुचितामियात्॥

इति, तत् येषां शाखिनां गृह्ये सायं प्रातरित्युक्तं तच्छा-खिनामेव, नान्येषाम्। आशौचनिर्ह्रासपक्षे पारस्करः—

प्रथमे दिवसे दद्यात्त्रीन् पिण्डान् सुसमाहितः।
द्वितीये चतुरो दद्यादस्थिसंचयनं ततः॥

त्रींस्तु दद्यात्तृतीयेऽह्नि वस्त्रादीन् क्षाळयेत्ततः।

इति। विष्णुः—'प्रेतस्योदकनिर्वापणं कृत्वैकपिण्डं कुशेषु दद्युः' इति। प्रत्येकमिति शेषः। दद्युरित्युदकदानोपलक्षणं पिण्डदानम्। तिलोदकपिण्डदाने विशेषमाह विष्णुः—

तिलोदकं तथा पिण्डं नवश्राद्धं तथैव च ।
रात्रौ न कुर्यात्सन्ध्यायां यदि कुर्यान्निरर्थकम् ॥

इति । अत्रापकर्षमाह पारस्करः—

गृहीत्वा प्रेतपाषाणं गच्छेद्देशविपर्यये ।
अपकृष्यापि कुर्वीत न त्वेतदवशेषयेत् ॥
उदकं पिण्डदानं च दशाहाभ्यन्तरं तु यत् ।
कार्यमेतद्दशाहे तत्सर्वं पूर्ववदाचरेत् ॥

इति । शिलादिविपर्यये स्मृत्यन्तरं—

आशौचमध्ये पाषाणो यदि नश्येच्छिलान्तरे ।
पूर्वदत्ताञ्जलीन् दद्यात्पिण्डदानं समापयेत् ॥
प्रथमेऽहनि यः कर्ता नारी वा पुरुषोऽथवा ।
आ दशाहं प्रकुर्वीत पिण्डदानोदकक्रियाः ॥
यदि भ्रष्टो मृतो वाऽपि कर्ता अन्यस्समापयेत् ।
तेनैव कारयेत्पिण्डानुदकं तु सपिण्डकैः ॥

इति । अन्तर्दशाहे दर्शादिसंभवे ऋश्यशृङ्गः—

आशौचमन्तरा दर्शो यदि स्यात्सर्ववर्णिनः ।
समाप्तिं प्रेततन्त्रस्य कुर्युरित्याह गौतमः ॥

इति । भविष्यत्पुराणे—

प्रवृत्ताशौचतन्त्रस्तु यदि दर्शं प्रपद्यते ।
समाप्य चोदकं पिण्डं स्नानमात्रं समाचरेत् ॥

इति । पैठीनसिः—

आग्नेन्दवे तु कर्तव्याः पिण्डदानोदकक्रियाः ।
द्विरैन्दवे तु कुर्वाणः पुनश्शावं समश्नुते ॥
त्रयोदश्यां कलामात्रतिथौ यस्य मृतिर्भवेत् ।
नातिक्रम्य सिनीवालीं कुर्यात्तस्योदकक्रियाः ॥

अङ्गिराः—

चतुर्दशीक्षणमृतस्ततः प्राप्तोऽमातिथिः ।
पिण्डोदकं दशाहान्तं तस्मिन्नेवाहनि क्षिपेत् ।
एकादशेऽहनि श्राद्धं कुर्यादित्यङ्गिरोऽब्रवीत् ॥

इति । एतत्सर्वं मातापितृव्यतिरिक्तविषयम् । तिथिद्वये विशेषमाह गालवः—

पित्रोराशौचमध्ये तु यदि दर्शस्समापतेत् ।
तावदेवोत्तरं तन्त्रं पर्यवस्येत्र्यहात्परम् ॥

इति । स्मृत्यन्तरेऽपि—

पित्रोराशौचमध्ये तु दर्शश्चेत्त्रिदिनात्परम् ।
तावदेवोत्तरं तन्त्रं समाप्यमिति निश्चयः ॥
दशाहमध्ये दर्शश्चेत्पिण्डदानं तिलोदकम् ।
पितृभ्यां तु विनाऽन्येषां दर्शेनैव समापयेत् ॥

इति । वसिष्ठः—

अन्तर्दशाहे दर्शश्चेत्तन्त्रं सर्वं समापयेत् ।
पित्रोस्तु यावदाशौचं तावत्कुर्यादतन्द्रितः ॥

दर्शस्संक्रमणं वाऽपि दशाहान्तर्यदा भवेत् ।
अन्येषां प्रेतकार्याणि समाप्यानीति चापरे ।
सा तिथिर्यद्यतिक्रान्ता प्रेतत्वं न च मोचयेत् ॥

इति । गालवः—

अशौचमन्तरा दर्शो यदि स्यात्सर्ववर्णिनः ।
पिण्डदानोदकं सर्वमपकृष्य समापयेत् ॥
दद्यादपस्सपिण्डानां समानोदकिनां तथा ।
द्विचन्द्रदर्शनात्सद्यः सकलं कर्म नश्यति ॥ इति ॥

इति स्मृतिचन्द्रिकायां दहनान्तरकर्तव्यनिरूपणम् ॥

एवमुदकदानानन्तरं बान्धवैराश्वासनं कार्यमित्याह याज्ञवल्क्यः—

कृतोदकान् समुत्तीर्णान् मृदुशाड्वलसंस्थितान् ।
स्नातानपवदेयुस्तानितिहासैः पुरातनैः ॥

इति । कात्यायनोपि—

एवं कृतोदकान् सम्यक् सर्वान् शाड्वलसंस्थितान् ।
आप्लुत्य पुनराचान्तान् वदेयुस्तेऽनुयायिनः ॥
मा शोकं कुरुतानित्ये सर्वस्मिन् प्राणिधर्मिणि ।
धर्मं कुरुत यत्नेन यो वस्सह गमिष्यति ॥
मानुष्ये कदलीस्तम्भनिस्सारे सारमार्गणम् ।
यः करोति स सम्मूढो जलबुद्बुदसंनिभे ॥
पञ्चधा संभृतः कायो यदि पञ्चत्वमागतः ।
कर्मभिस्स्वशरीरोत्थैः का तत्र परिवेदना ॥

अयमर्थः—जन्मान्तरात्मीयशरीरजनितैः कर्मभिः स्वैः स्वफलोपभोगार्थं पृथिव्यदिपञ्चमहाभूतात्मतया पञ्चप्रकारस्संभृतो निर्मितः कायः यदि फलभोगनिवृत्तौ पञ्चत्वमापन्नः पृथिव्यादिरूपतां प्राप्तः तत्र भवतां किमर्थं परिवेदना, निष्प्रयोजनत्वान्न कार्या । किंच—

गन्त्री वसुमती नाशमुदधिर्दैवतानि च ।
फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति ॥

उचितमेव शरीराणां मरणमतश्शोको निष्प्रयोजन इत्यर्थः । रोदने दोषमाह स एव—

श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
अतो न रोदितव्यं हि क्रियाः कार्याः प्रयत्नतः ॥

इति । बान्धवादीनामन्येषां रोदने दोषमाह पारस्करः—

अस्थिसंचयनादर्वाग्रुदित्वा स्नानमाचरेत् ।
अन्तर्दशाहे विप्रस्य ऊर्ध्वमाचमनं स्मृतम् ॥

विप्रस्य मृतस्य दशाहाभ्यन्तरेऽस्थिसंचयनादर्वाग्ब्राह्मणक्षत्रियादी रुदित्वा स्नानमाचरेत् ।

मृतस्य यावदस्थीनि ब्राह्मणस्य हृतानि तु ।
तावद्यो बान्धवस्तत्र रौति तद्बान्धवैस्सह ॥
तस्य स्नानाद्भवेच्छुद्धिः ततस्त्वाचमनं स्मृतम् ।
सचेलस्नानमन्येषामकृते त्वस्थिसंचये ॥
कृते तु केवलं स्नानं क्षत्रविट्शूद्रजन्मनाम् ॥

ब्राह्मणस्य क्षत्रियवैश्यशूद्रमरणविषये रोदने अस्थिसंचयना-
दर्वागेकाहमाशौचं सचेलस्नानं च । अत ऊर्ध्वं स्नानमात्रम् ।
तथाऽऽह पारस्करः—

अस्थिसंचयने विप्रो रौति क्षत्रियवैश्ययोः ।
तदा स्नातस्सचेलस्तु द्वितीयेऽहनि शुद्ध्यति ॥
कृते तु संचये विप्रः स्नानेनैव शुचिर्भवेत् ॥

ब्रह्मपुराणेऽपि—

अस्थिसंचयनादर्वाग्यदि विप्रोऽश्रु पातयेत् ।
मृते शूद्रे गृहं गत्वा त्रिरात्रमशुचिर्भवेत् ॥
अस्थिसंचयनादूर्ध्वं मासि यावद्द्विजातयः ।
अहोरात्रेण शुद्ध्यन्ति वासःप्रक्षाळनेन च ॥
अज्ञाते दिवसेनैव द्व्यहात् क्षत्रियवैश्ययोः ।
स्पृशन् विनाऽनुगमनं शूद्रो नक्तेन शुध्यति ॥
एतत्सर्वं सपिण्डानां विहितत्वाद्यथाविधि ।
विहितं तु सपिण्डस्य प्रेतनिर्हरणादिकम् ॥
दोषस्स्यादसपिण्डस्य तत्रानाथक्रियां विना ।
सपिण्डानामदोषस्स्यादा स्मशानात्तु रोदने ॥
ऊर्ध्वं प्रेतस्य दोषोऽस्ति त्रिरात्रेणैव बान्धवाः ।

इति । शवानुगमने दोषमाह याज्ञवल्क्यः—

ब्राह्मणेनानुगन्तव्यो न शूद्रो न क्वचिद्द्विजः ।
अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाऽग्निं घृतभुक्छुचिः ॥

इति । तदा घृतप्राशनस्य भोजनकार्यविधानेन प्रमाणाभावान्न भोजनप्रतिषेधः । उक्तं ब्रह्मपुराणे—

सवर्णमुत्तमं वाऽपि प्रेतस्नेहादिना यदि ।
कृतेऽनुगमने स्नात्वा स्पृष्ट्वाऽग्निं घृतभुक्छुचिः ॥
विप्रस्तु क्षत्रियं प्रेतमनुगम्य तु बन्धुवत् ।
ततस्स्नात्वाऽनलं स्पृष्ट्वा घृतं प्राश्य दिनं क्षपेत् ॥
वैश्यानुगमनं कृत्वा पक्षिण्याशौचमाचरेत् ।
शूद्रानुगमनं कृत्वा त्रिरात्रेण विशुध्यति ॥

इति । विप्रश्शूद्रानुगमने त्रिरात्रमाशौचं कृत्वा समुद्रगायां नद्यां स्नात्वा प्राणायामशतं कृत्वा घृतं प्राश्य शुध्येत् । क्षत्रियवैश्यानुगमने त्वेकाहमाशौचं, क्षत्रियस्य शूद्रानुगमने पक्षिणी, वैश्यस्य शूद्रानुगमने त्वेकाहं रोदने चैवमिति ॥

इति स्मृतिचन्द्रिकायामातुराश्वासनादिनिरूपणम्.

अथास्थिसंचयनम्.

तत्र संवर्तः—

प्रथमेऽह्नि तृतीये वा सप्तमे नवमेऽपि वा ।
अस्थिसंचयनं कार्यं दिवा तद्गोत्रजैस्सह ॥

इति । पारस्करोऽपि—

प्रथमेऽह्नि तृतीये वा पञ्चमे सप्तमे तथा ।
अस्थिसंचयनं कार्यं ज्ञातिभिस्सह बान्धवैः ॥

इति । विष्णुः—'चतुर्थे ह्यस्थिसंचयनं कुर्यात्तेषां गङ्गाम्भसि प्रक्षेपः' इति । कात्यायनः—

अपरेद्युस्तृतीये वा पञ्चमे सप्तमेऽपि वा ।
नवमे दशमे वाऽपि ह्यस्थिसंचयनं भवेत् ॥
यस्तत्र विधिरादिष्टः ऋषिभिस्सोऽधुनोच्यते ।
स्नानान्तं पूर्ववत्कृत्वा गव्येन पयसा ततः ।
सिञ्चेदस्थीनि सर्वाणि प्राचीनावीत्यभाषयन् ॥
शमीपलाशशाखाभ्यामुद्धृत्यास्थीनि भस्मतः ।
आज्येनाभ्यज्य गव्येन सेचयेद्गन्धवारिणा ॥
मृत्पात्रसंपुटे कृत्वा सूत्रेण परिवेष्ट्य च ।
श्वभ्रे खात्वा शुचौ भूमौ निखनेद्दक्षिणामुखः ॥
पूरयित्वाऽवटं पङ्कपिण्डशैवालसंयुतम् ।
दत्त्वोपरि समं शेषं कुर्यात्पूर्वाह्णकर्मणा ॥
एष एव गृहीताग्नेः प्रेतस्य विधिरुच्यते ।
अस्थिसंचयनं यागो देवतानां प्रकीर्तितः ॥
प्रेतीभूतं तथोद्दिश्य यश्शुचिर्न करोति चेत् ।
देवतानां तु यजनं तं शपन्त्यथ देवताः ॥
पूर्वं दग्धास्स्मशानेषु देवताः परिकीर्तिताः ।

तूष्णीं प्रसेकं पुष्पं च धूपं दीपं तथैव च ॥
अञ्जनाभ्यञ्जने चैव पानीयमनुलेपनम् ॥

इति । अस्थिसंचयने वारनक्षत्रतिथिविशेषो यमेनोक्तः—

भौमार्कमन्दवारेषु तिथियुग्मेषु चैव हि ।
वर्जयेदेकपादर्क्षे त्रिपादर्क्षेऽस्थिसंचयम् ॥
प्रदातृजन्मनक्षत्रे त्रिपादर्क्षे विशेषतः ॥

इति । ब्रह्मपुराणे—

अनाहिताग्नेर्मरणादाहिताग्नेस्तु दाहतः ।
अस्थिसंचयनं कार्यं स्वशाखोक्तविधानतः ॥
विभज्य च त्रिधाऽऽशौचं पूर्वभागे तु कारयेत् ।
मध्यमो मध्यभागस्स्यात्तृतीयस्त्वधमस्स्मृतः ।
अपराह्णं च रात्रिं च वर्जयेत्सर्वथा द्विजः ॥
चन्द्रज्ञवारौ शुभदौ मध्यमौ शुक्रसूर्यजौ ।
शेषास्त्वशुभदा वारा द्विपदानि तु मध्यमाः ॥
त्रिपदर्क्षाणि वर्ज्यानि भद्रयोगा तिथिस्तथा ।
गच्छेद्वृद्धं पुरस्कृत्य स्मशाने दक्षिणामुखः ॥
क्षीरमिश्रोदकैः प्रोक्ष्य शाखया हि शमीजया ।
अङ्गुष्ठोपकनिष्ठाभ्यां पादानां मस्तकावधि ॥
अस्थीन्यादाय कुम्भे वा स्थाप्य गर्ते विनिक्षिपेत् ।
अस्थ्नां कृत्वा तु संशुद्धिं केशवाद्यैश्च नामभिः ॥
प्रक्षाळ्य पञ्चगव्येन पुष्पाद्यैस्संप्रपूजयेत् ॥

द्विजानुज्ञामवाप्यैव गङ्गायां सुसमाहितः ।
उच्चरेद्गोत्रनामानि संकल्पं च यथाविधि ॥
अघमर्षणसूक्तेन धर्मायैव नमोऽस्त्विति ।
विसर्जयेज्जलेऽस्थीनि यावदस्थीनि तज्जपेत् ॥
यावदस्थि मनुष्याणां गङ्गातोयेषु तिष्ठति ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥
अजिनाविकसूत्रैश्च क्षौमकौशेयपट्टकैः ।
कुशरज्ज्वा दृढं बद्ध्वा पूर्वोक्तविधिना क्षिपेत् ॥

इति । मत्स्यपुराणे—

साङ्गसंस्कारमारभ्य दाहाद्गृह्यान्तरस्य तु ।
प्रथमेऽह्नि द्वितीये वा तृतीये वा चतुर्थके ॥
पञ्चमे सप्तमे वाऽपि नवमे वा शुभे दिने ।
ज्योतिर्विदोक्तसमये स्वशाखोक्तविधानतः ॥
अस्थिसंचयनं कृत्वा तथा तद्भस्मवेदिकाम् ।
यवगोधूमपिष्टैर्वा शालिपिष्टैर्मृदाऽपि वा ॥
चित्रवर्णैस्तु कुर्वीत पूजयेत्तु शिलात्रयम् ।
तत्सखिभ्योऽपरः पितृक्रमादप्युदकाञ्जलीन् ॥
दत्वाऽस्थीनि च गङ्गायां प्रक्षिपेत् भुवि वा क्षिपेत् ।
तीर्थान्तरे शुद्धदेशे कुरुक्षेत्रे विसर्जयेत् ॥ इति ॥

इति स्मृतिचन्द्रिकायामस्थिसंचयनम्.

अथ वपनम् । तच्च दशमेऽहनि कार्यम् । तदाह देवलः—

दशमेऽहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत् ।
तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च ॥

इति । पारस्करोऽपि—

द्वितीयेऽहानि कर्तव्यं क्षौरकर्म प्रयत्नतः ।
तृतीये पञ्चमे वाऽपि सप्तमे वाऽऽप्रदानतः ॥

इति । प्रदानमेकादशाहादिकं श्राद्धम् । प्रदानवचनानियमोऽवगम्यते । बोधायनः—

अनुप्तकेशो यः पूर्वं श्रुत्वा केशान् प्रवापयेत् ।
प्रथमेऽह्नि तृतीये वा पञ्चमे सप्तमेऽपि वा ॥
यावच्छ्राद्धं प्रदीयेत तावदित्यपरं मतम् ॥

इति । अत्र पुत्राणां वपनं नियतम्,

गङ्गायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृतौ ।
आधानकाले सोमे च वपनं सप्तसु स्मृतम् ॥

इति वचनात् । तत्र च—

पुत्राभावे तु पौत्रो वा तत्पुत्रः पुत्रिकासुतः ।
केशानां वपनं कृत्वा पैतृमेधिकमाचरेत् ॥

अत्र सपिण्डानां वपनमैच्छिकम् । आपस्तम्बः–'अनुभाविनां च परिवापनम्' इति । अनु पश्चाद्भवन्ति जायन्त इत्यनुभाविनो भ्रातरः । तेषां श्राद्धदिनादर्वाक्परिवापनं कर्तव्यम् । उक्तं स्याद्गृह्यकारेण—

केशान् प्रकीर्य वा पांसूनावपेयुस्सनाभयः ।
शिरसो वपनं कर्तुरूर्ध्वं तेषां यथेच्छया ॥

इति । तेषां सपिण्डानाम् । गृह्यपरिशिष्टे—

प्रकीर्य केशानित्याहुराचार्यास्तैत्तिरीयकाः ।
तत्क्रिया सामगैर्नोक्ता बह्वृचानां यथा श्रुतिः ॥
बह्वृचानां सपिण्डानामिच्छया केशवापनम् ।
दशमेऽहनि सर्वेषां क्षुरकर्म प्रशस्यते ॥

इति । वपनस्नानमुक्तं स्मृत्यन्तरे—

कूले चतुष्पथे वाऽपि महावृक्षस्य सन्निधौ ।
केशश्मश्र्वादिवपनं कुर्युरत्रानुभाविनः ॥

इति । विशेष उक्तस्स्मृत्यन्तरे—

मातामहापितृव्याणां मातुलाग्रजयोर्मृतौ ।
श्वशुराचार्ययोश्चैषां पत्नीनां च पितृष्वसुः ॥
मातृष्वसुर्भगिन्याश्च गर्भवानपि वापयेत् ।
विदेशेऽपि मृतिं पित्रोः श्रुत्वा चैवं गुरोर्मृतिम् ।
कुर्याच्च वपनं सद्यः सचेलस्नानमाचरेत् ॥

इति । यत्तु वचनं—

नोदन्वदम्भसि स्नानं न च श्मश्रुनिकृन्तनम् ।
अन्तर्वत्न्याः पतिः कुर्वन् व्रजेत नरकं ध्रुवम् ॥
व्यक्ते गर्भे च सीमन्ते विवाहे क्षौरमाचरेत् ।
क्षौरमा प्रसवान्नोक्तमन्यत्र वचनाद्भवेत् ॥

न विवाहदिने क्षौरं प्रशस्तं निशि काम्यया ।
पूर्वं कर्त्राऽथ कर्तव्यं पश्चाद्वा पञ्चमेऽहनि ॥

इति, तत् पित्रादिमरणव्यतिरिक्तविषयम् ।

यत्किंचन कृतं पापं नृणां केशेषु तिष्ठति ।
तस्मात्तु वपनं कार्यं श्राद्धमावश्यकं ततः ॥

इति स्मृतिचन्द्रिकायां वपनविषयः.

दशमाहकृत्यम्.

अत्र दशमेऽहनि क्रियाविशेषाः पारस्करेण दर्शिताः—

दशमेऽहनि पूर्वाह्णे क्षुरकर्म यथाश्रुति ।
स्नानं सचेलमाचम्य गृहाशौचं यथोदितम् ॥
ज्ञातिबन्धुजनैस्सार्धं गत्वा तत्र महाजलम् ।
स्नात्वा धर्मोदकं तूष्णीं पितृयज्ञविधानतः ॥
दद्यात्पिण्डत्रयं चाधो दक्षिणो यमदैवतः ।
मध्ये प्रेताय चोत्सृज्य रौद्रमुत्तरबर्हिषि ॥
अञ्जनाभ्यञ्जने चैव छत्रोपानत्स्रगादिकान् ।
देवताभ्यस्समुत्सृज्य वारिपूर्णं नवं घटम् ॥
प्रार्थयेच्च ततो बन्धून् प्रार्थिताश्चोदकाञ्जलीन् ।
नामगोत्रे समुच्चार्य दद्युस्त्रिरपि वा दश ॥

पाषाणं पुरतस्स्थाप्य यद्वा दर्भास्तृते भुवि ।
उपवीतिन उत्थाय पाषाणं तु विनिक्षिपेत् ॥
जलमध्ये महावृक्षमूले वाऽथ चतुष्पथे ।
कुर्युरभ्यञ्जनं सर्वे वासांसि कुसुमानि च ॥
गन्धांश्च मङ्गळान्यन्यान् वृद्धस्त्रीकलशादिकान् ।
पुरस्कृत्य गृहं गत्वा प्राशयेयुर्यवौदनम् ॥
यदि नष्टो हृतो वाऽपि पाषाणश्च प्रमादतः ।
पाषाणमन्यमादाय पूर्वदत्ताम्बु निक्षिपेत् ॥
नवश्राद्धेषु पूर्णेषु कीकसानां च संस्कृतौ ।
पूर्वं दशाहादुत्कृष्य पुनर्दहनमाचरेत् ॥
एकादशाहमारभ्य यावद्द्वादशमासिकम् ।
कुर्याच्च षोडशश्राद्धं मातुरूर्ध्वं पुनःक्रिया ॥
एकादशेऽहनि श्राद्धमेकोद्दिष्टं समाचरेत् ।
यदि कार्यं न कुर्वीत पुनस्संस्कारमर्हति ॥ इति ॥

इति स्मृतिचन्द्रिकायां दशमाहकृत्यनिरूपणम्.

मरणविधिवैशिष्ट्यमुक्तं महाभारते—

स्यादुत्तरायणे यस्य मृतिस्तस्योत्तमा गतिः ।
शुक्लपक्षे च मध्याह्ने कृष्णेऽप्येकादशीदिने ॥

इति । मार्कण्डेयोऽपि—

उत्तरायणगे सूर्ये उत्तमा गतिरुच्यते ।
शुक्लपक्षे मृतिस्तत्र श्रेष्ठा चाह्नि मृतिश्शुभा ॥

श्रेष्ठा तत्रापि मध्याह्ने उभयोरपि पक्षयोः ।
एकादश्यां मृतिश्श्रेष्ठा मोक्षदा सर्वकामदा ॥
यदि भद्रान्विताऽन्याऽपि भानुभौमशनैश्चरैः ।
त्रिपादर्क्षैश्च संयोगे स त्रियोगस्त्रिपुष्करम् ॥
तत्त्रिपुष्करयोगे तु मृतिर्मृत्यन्तरावहा ॥

इति । गर्गः—

कुजार्कार्कियुता भद्राद्वित्रिपादर्क्षसंयुता ।
त्रिपुष्करं भवेत्तेषां यद्वाभ्यां तद्द्विपुष्करम् ॥
द्वादश्यर्कसमायुक्ता विशाखैकादशीन्दुना ।
कुजद्वादशके चैव द्वितीया भृगुरोहिणी ॥
तृतीया बुधमूलेन गुरुषष्ठी शतोडुना ।
अषाढशनिसप्तम्यां सप्तयोगास्त्रिपुष्कराः ॥
यस्मिंश्च पुष्करे योगे धनिष्ठर्क्षादिपञ्चसु ।
ज्येष्ठा त्रिपुष्करे योगे दोषभाग्दहने मृतौ ॥
तद्दोषपरिहाराय स्वर्णदानं समाचरेत् ।
शवस्य हृदयं स्पृष्ट्वा ततो दहनपार्श्वतः ॥
हुत्वा तेषु मुखेष्वाज्यं हिरण्यशकलं क्षिपेत् ।
यदि न क्रियते शान्तिस्तत्फलेनाशु नश्यति ॥

इति । ज्योतिःपराशरः—

भद्रे त्रिपादनक्षत्रे भृग्वङ्गारबृहस्पतौ ।
मरणे दहने चैव तत्कर्म त्रिगुणं भवेत् ॥

भद्रे तु भूमिदानं स्यात्तूपदर्क्षे हिरण्यकम् ।
वारे वाराधिदैवत्यं वस्त्रदानं प्रशस्यते ॥ इति ॥

इति स्मृतिचन्द्रिकायां मरणविधिवैशिष्ट्यनिरूपणम्.

अथ दिनाद्याशौचं प्रति कालनिर्णयः पारस्करेणाभिहितः—

दिवा यदि रजन्यां वा जननं मरणं तथा ।
तद्दिनादिकमाशौचं रजनी त्रिदिनं स्मृतम् ॥
जाते चैव मृते चैव दशरात्रं विशोधनम् ।
भूपतेर्द्वादशाहोभिः विशः पञ्चदश स्मृताः ॥
त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्तिनः ।
निशां भागत्रयं कुर्याद्द्वौ भागौ पूर्ववासरः ।
शेषः परदिनं ग्राह्यं जाते पाके मृते समम् ॥

पाके स्थालीपाके ।

अर्धरात्रादधस्स्रावे जनने मरणेऽपि वा ।
पूर्वमेव दिनं ग्राह्यमित्याह भगवान् यमः ॥
ओदयादुदयं यावद्दिनमित्यभिधीयते ।
तद्दिनादिकमाशौचमिति वेदविदो विदुः ॥
रजोदृष्टिस्तु रात्रौ चेद्विभज्य त्रिविधां निशाम् ।
पूर्वभागद्वये पूर्वमूर्ध्वं चेदुत्तरेऽहनि ॥
जनने मरणेऽप्येवं प्राप्ते स्रावे तथैव च ।
अर्धरात्रादधस्ताच्चेत्सूतके मृतके तथा ॥

पूर्वमेव दिनं ग्राह्यमूर्ध्वं चेदुत्तरेऽहनि ।
रात्रावेव समुत्पन्ने मृते रजसि सूतके ।
पूर्वमेव दिनं ग्राह्यं यावन्नाभ्युदितो रविः ॥
रात्रिं कुर्यात्त्रिभागां तु द्वौ भागौ पूर्ववासरः ।
उत्तरांशः परदिनं जातेषु च मृतेषु च ॥

इति । काश्यपः—

अर्धरात्रादधस्ताच्चेन्मृतिः प्रसव एव वा ।
पूर्वमेव दिनं ग्राह्यमूर्ध्वं चेदुत्तरेऽहनि ॥

इति । वसिष्ठः—

उदिते तु यदा सूर्ये नारीणां दृश्यते रजः ।
जननं वा विपत्तिर्वा यस्याहस्तस्य शर्वरी ॥

इति । रात्रौ रजस्स्रावे जनने मरणे वा सति रात्रिं त्रिधा विभज्य पूर्वभागद्वये तत्पूर्वमेव दिनमित्येकः पक्षः । अर्धरात्रादधस्ताच्चेत्पूर्वमेव दिनमित्यन्यः पक्षः । सूर्योदयात्पूर्वं चेत्पूर्वमेव दिनमित्यपरः पक्षः । स्मृतीनां समबलत्वाद्देशाचारतोऽत्र व्यवस्था ॥

इति स्मृतिचन्द्रिकायामाशौचं प्रति कालनिर्णयविषयाणि.

उदकदानानर्हाः.

अथोदकदानानर्हानाह—

पाषण्ड्यनाश्रितस्तेनभर्तृघ्न्यः कामुकादिकाः ।
सुराप्य आत्मत्यागिन्यो नाशौचोदकभाजनाः ॥

इति । वेदबाह्यलिङ्गेन पाषण्ड्यनर्हः । अनाश्रितः सत्यप्यधिकारे अकृताश्रमविशेषपरिग्रहः, आनाश्रमीति यावत् । स्तेनः सुवर्णादेर्हर्ता । भर्तृघ्नी पतिघातिनी । कामुका कुलटा । सुरापी सुरापानरता । आत्मत्यागिनी कामाद्विषोद्बन्धनादिभिः प्राणत्यागिनी । मनुः—

वृथासंकरजातानां प्रव्रज्यासु च तिष्ठताम् ।
आत्मनस्त्यागिनां चैव निवर्तेतोदकक्रिया ॥
पाषण्डमाश्रितानां च चरन्तीनां च कामतः ।
गर्भभर्तृद्रुहां चैव सुरापीनां च योषिताम् ॥

इति । परभार्यास्वधर्मोत्पादिता वृथासंकरजाताः । प्रव्रज्या पित्रादिबहिष्कारेण स्वेच्छयैव वृत्तिः । तथा यमः—

वृथासंकरजातानामाश्रमान्तस्थिताश्च ये ।
दत्तानां चैव कन्यानां निवर्तेतोदकक्रिया ॥
चण्डालादुदकात्सर्पाद्ब्राह्मणाद्विद्युतस्तथा ।
दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणाम् ॥
उदकं पिण्डदानं च प्रेतेभ्यो यत्प्रदीयते ।
नोपतिष्ठति तत्सर्वमन्तरिक्षे विनश्यति ॥
नाशौचं नोदकं तेषां न दाहाद्यन्त्यकर्म च ।
ब्रह्मदण्डहतानां च न कुर्यात्कटधारणम् ॥

ब्रह्मदण्डो ब्रह्मशापः अभिचारो वा । कटशब्देन शववहनोपयोगि खट्वादिकमभिधीयते । आपस्तम्बः—

व्यापादयेद्य आत्मानं स्वयमग्न्युदकादिभिः ।
विहितं तस्य नाशौचं नापि कार्योदकक्रिया ॥

इति । विष्णुः—'आत्मत्यागिनो नाशौचोदकभागिनः' इति । गौतमः—'गोब्राह्मणहतानामन्वक्षं राजक्रोधाच्चायुद्धे प्रायोऽनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छताम्' इति । प्रायो महाप्रस्थानम् । अनाशकमनशनम् । ब्रह्मपुराणे—

शृङ्गिदंष्ट्रिनखिव्याळविषवह्निमहाजलैः ।
सुदूरात्परिहर्तव्यैः कुर्वन् क्रीडां मृतस्तु यः ॥
नागानां विप्रियं कुर्वन् दग्धश्चाप्यथ विद्युता ।
निगृहीताश्च ये राज्ञा चौर्यदोषेण कर्हिचित् ॥
परदारान् हरन्तश्च रोषात्तत्पतिभिर्हताः ।
असमानैश्च संकीर्णैश्चण्डालाद्यैश्च विग्रहम् ॥
कृत्वा तैर्निहतास्तद्वच्चण्डालांश्च समाश्रिताः ।
क्रोधात्प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम् ॥
गिरिवृक्षप्रपातं वा ये कुर्वन्ति नराधमाः ।
ब्रह्मदण्डहता ये च ये चैव ब्राह्मणैर्हताः ॥
महापातकिनो ये च पतितास्ते प्रकीर्तिताः ।
पतितानां न दाहस्स्यान्नाशौचं नान्त्यकर्म च ।
न चाश्रुपातः पिण्डो वा कार्यं श्राद्धादिकं च न ॥

इति। चण्डालादिहतानामयमग्निसंस्कारनिषेधोऽनाहिताग्निविषयः । आहिताग्निविषये च 'आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च'

इति विहिताग्नियज्ञपात्रैः प्रतिपत्तिलोपप्रसङ्गात्। स्मृत्यन्तरे चण्डालादिहताहिताग्निसंबन्धिनामग्नीनां यज्ञपात्राणां च प्रतिपत्तिपर्यन्तं विधानात्।

वैतानं प्रक्षिपेदप्सु ह्यावसथ्यं चतुष्पथे।
पात्राणि तु दहेदग्नौ यजमाने वृथाहते॥
आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया।
तेषामपि तथा गङ्गातोये संस्थापनं मतम्॥

इति। वह्निपुराणे—

पाषण्डपतितानां च चण्डालाद्यैर्हतस्य च।
शृङ्गिदंष्ट्र्यग्निसर्पाद्यैर्मृतानां बुद्धिपूर्वकम्॥
न कुर्याद्दहनाशौचं कृतं चेन्नोपतिष्ठति।
तेषां शरीरं गङ्गायां महानद्यां विनिक्षिपेत्॥
प्रेताग्नीनप्सु निक्षिप्य गृह्याग्निं च चतुष्पथे।
दहेत्तु यज्ञपात्राणि शवानां स्पर्शने सति॥
स्नानालङ्कारवस्त्रार्थरज्जुच्छेदाश्रुपातने।
महासान्तपनाच्छुद्धिर्ज्ञानात्तप्तं विशोधनम्॥
मत्याऽभ्यासे तु चान्द्रं च पराकं पादकृच्छ्रकम्।
एतेष्वेकैककरणे पादकृच्छ्रं विशोधनम्।
अज्ञानादुपवासस्स्यात्सचेलं स्नानमेव च॥

इति। तस्मात्सर्वेषामात्मघातकादीनामविशेषेण दाहोदकपिण्ड

श्राद्धनिषेधो यावत्संवत्सरम् । पूर्णे संवत्सरे पुत्रादिः प्रेतस्य श्राद्धादिकं कुर्यात् । तथा चाह—

विषोद्बन्धनशस्त्राद्यैरात्मनस्त्यागिनामपि ।
विधिं विनैवानशनतोयाग्निपतनैरपि ।
ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्ध्वदैहिकम् ॥

इति । संवत्सरादूर्ध्वमपि नारायणबलिं कृत्वा कुर्यात् । तथाच व्यासः—

ये मृताः पापमार्गेण तेषां संवत्सरात्परम् ।
नारायणबलिं कृत्वा कुर्यादूर्ध्वक्रियां द्विजः ॥ इति ॥

इति स्मृतिचन्द्रिकायामुदकदानानर्हनिरूपणम्.

अथ पुनस्संस्कारकालनिर्णयः—

बाले वा यदि वा वृद्धे शुक्रे चास्तमुपागते ।
अपूर्वदेवयात्रां च प्रेतकार्याणि वर्जयेत् ॥
बाले वा यदि वा वृद्धे शुक्रे चास्तमुपागते ।
प्रेतकर्म न कार्यं स्यादस्ते च गुरुशुक्रयोः ॥
अतीतकालं श्राद्धं चेत्पुनस्संस्कारमर्हति ।
अर्वाक्त्रिपक्षात्प्रेतस्य पुनर्दहनकर्मणि ॥
न कालनियमो ज्ञेयो न मौढ्यं गुरुशुक्रयोः ।
सपिण्डनक्रियाकालेऽप्यौर्ध्वदैहिकमाचरेत् ।
गुरुभार्गवमौढ्यादिदोषस्तत्र न विद्यते ॥

एतत् मृतसंवत्सरविषयम्—

चतुर्दशीं तिथिं नन्दां भद्रां शुक्रारवासरौ ।
त्रिपुष्करादिदुष्टर्क्षान् द्व्यङ्घ्रिभं विषमाङ्घ्रिभम् ॥
वस्त्वुत्तरार्धतः पञ्च त्रिपदर्क्षे द्विपुष्करे ।
पौष्णब्रह्मभयोर्भूयाद्दहनात्कुलनाशनम् ॥
दिनोत्तरार्धे तत्कर्तुश्चन्द्रताराबलान्विते ।
यत्पुनर्दहनं चोक्त्वा श्राद्धकालमथोच्यते ॥
त्रिपक्षे वा त्रिमासे वा षण्मासे युग्मपक्षके ।
एष्वेव कालेष्वेतान्यप्येकोद्दिष्टानि षोडश ॥

श्राद्धकालाविरोधेन पुनस्संस्कारकर्मापि कार्यमेव—

कृत्तिकासु च नन्दायां भृगुवारे त्रिजन्मसु ।
प्रेतकार्यं न कर्तव्यं कुलक्षयकरं भवेत् ॥
सकृन्महालये काम्ये न्यूनश्राद्धे नवेषु च ।
अतीतकालविषये चैतत्सर्वं विचिन्तयेत् ॥

इति स्मृतिचन्द्रिकायां पुनस्संस्कारकालनियमः.

अथ पालाशविधिः.

तत्र स्मृत्यन्तरम्—

शरीराणि न विन्देरन् देशान्तरमृतस्य चेत् ।
पलाशपर्णवृन्तैस्तु कुर्यात्तत्प्रतिरूपकम् ॥

दद्याच्छिरस्यशीत्यर्धं ग्रीवायां तु दशैव तु ।
उरसि त्रिंशतं दद्याद्विंशतिं जठरे तथा ॥
बाह्वोर्द्वयोश्शतं दद्याद्दश बाह्वङ्गुलीषु च ।
द्वादशार्धं वृषणयोरष्टार्धं शिश्न एव तु ॥
ऊर्वोर्द्वयोश्शतं दद्यात् षष्ट्यर्धं जानुजङ्घयोः ।
दश पादाङ्गुलीषु स्युरूर्णासूत्रेण बन्धयेत् ॥
स्नाप्यालंकृत्य तद्रूपं कुर्यात्तस्याभिमर्शनम् ।
दद्यात्पुत्रोऽथवा भ्राताऽप्यन्यो वाऽपि च बान्धवः ।
यथा दहनसंस्कारस्तथा कार्यं विचक्षणैः ॥

इति । हारीतेनापि पलाशवृन्तसंख्या दर्शिता—

देशान्तरगते विप्रे विपन्ने कालपर्ययात् ।
शरीरनाशकल्पस्स्यादाहिताग्नेर्विशेषतः ॥
कृष्णाजिनमथास्तीर्य पुरुषाकृतिमेव च ।
त्रीणि षष्टिशतं वृन्ताः पलाशानां समाहिताः ॥
दद्याच्छिरस्यशीत्यर्धं ग्रीवायां च दशैव तु ।
बाहुभ्यां तु शतं दद्यादङ्गुल्योर्दश चैव तु ॥
उरसि त्रिंशतं दद्याज्जठरे विंशतिं तथा ।
दद्यादष्टौ वृषणयोः पञ्च मेढ्रे तु विन्यसेत् ॥
ऊरुभ्यां तु शतं दद्यात्त्रिंशतं जानुजङ्घयोः ।
दश पादाङ्गुलीषु स्युरेतत्प्रेतविकल्पनम् ॥
पात्राणां चमसादीनां निर्णयः कथ्यतेऽधुना ।

अनुलोमानि सर्वाणि पात्राणि प्रयुनक्ति हि ॥
ध्रुवां तु दक्षिणे हस्ते स्फ्यं जुहूं च निधापयेत् ।
क्षिपेदुपभृतं सव्य उरासि स्रुक्स्रुवारणीन् ॥
मुखेऽग्निहोत्रहवणीं क्षिपेन्नासिकयोस्स्रुवौ ।
अक्ष्णोर्हैरण्यशकले स्रुचौ वा कर्णयोः क्षिपेत् ॥
प्राशित्रं..............................हन्वोरुलूखलम् ।
मुसलं च तथा दत्सु ग्राव्णो यदि भवेत्तदा ॥
कपालानि विनिक्षिप्य शिरस्येकं ललाटके ।
पिष्टसंयमनीं पात्रीमुदरे तु विनिक्षिपेत् ॥
आज्यस्थालीं क्षिपेन्नाभ्यां शूर्पं छित्त्वा तु पार्श्वयोः ।
पक्षयोश्चैव साम्नाय्यकुम्भौ यदि हि संनयेत् ॥
शिश्नेऽश्मानं ततो दद्यादण्डयोर्दृषदुपले ।
स्थापयेत्पृष्ठतश्शम्यां दक्षिणस्थानपादतः ॥
स्थालीं चैवाग्निहोत्रस्य अन्वाहार्यस्य चैव हि ।
उत्तरस्यां विनिक्षिप्य कूर्चं च शिरसि क्षिपेत् ।
दाहात्तु शवसंस्कारे पुनः कार्ये त्वयं विधिः ॥

इति । आहिताग्निमरणग्रहणमनाहिताग्नेरप्युपलक्षणम् । उक्तं च कात्यायनेन —

आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः ।
अनाहिताग्निरप्येवं स्वेनौपास्येन वह्निना ॥
पात्राणां चयनस्थाने होमपात्रं विनिक्षिपेत् ॥

इति । पराशरगौतमादिभिरुक्तन्यूनाधिकयोर्विकल्पः । आहिताग्न्यादीनां पलाशवृन्तसंख्याव्यवस्थापकहेत्वभावाद्विकल्पो द्रष्टव्यः ॥

इति स्मृतिचन्द्रिकायां पालाशविधिः.

दुर्मृतस्याहिताग्नेर्विशेषमाह पारस्करः—

चण्डालेन श्वपाकेन गोभिर्विप्रैर्हतो यदि ।
आहिताग्निश्च यो विप्रो विषेणाकर्षितोपि वा ॥
दहेत्तं ब्राह्मणं विप्रो लोकाग्नौ मन्त्रवर्जितम् ।
दग्धमस्थि पुनर्गृह्य क्षीरैः प्रक्षाळयेत्ततः ।
पुनर्दहेत्स्वाग्निना तु स्वतन्त्रेण यथाविधि ॥

स्वतन्त्रेण स्वशास्त्रोक्तेन विधिना । हारीतः—

ब्राह्मणेन वधे प्राप्ते चण्डालस्य करेण वा ।
आत्मना शस्त्रनिर्घाते शूद्रवद्दाहयेद्द्विजम् ॥
दग्धमस्थि पुनर्गृह्य विप्राणामनुशासनात् ।
क्षीरैः प्रक्षाळनं कृत्वा तदस्थि प्रेतवद्दहेत् ॥
पुनर्दहनमन्त्रैश्च यथाविधि समाचरेत् ।
एवमेव विधिं कुर्यान्मरणे गर्हितस्य च ॥
प्राजापत्यत्रयं कुर्यात्पुत्रादिः प्रेतशुद्धये ।
प्रक्षाळ्य स्नापयित्वा तु स्वधर्मेण दाहयेत् ॥

कुशैः पलाशैर्बध्वा तं प्रच्छाद्यैव च वाससा ।
नीत्वा स्मशानं कुर्वीत पात्रसंचयनादिकम् ॥
बान्धवैस्तु यथान्यायं द्वितीये सञ्चयस्स्मृतः ।
तृतीये तूदकं दत्त्वा चतुर्थे श्राद्धमाचरेत् ॥

इति । इदं कृच्छ्रत्रयं प्रमादमृतस्यात्यन्ताशक्तपुत्रविषयम् । शक्तस्य तु—

ब्राह्मणादुदकात्सर्पाद्रोभिः पशुमृगादिभिः ।
उद्बन्धनोदकविषैस्सर्पाद्युपलवैद्युतैः ॥
प्रमादमरणे चान्द्रं तप्तकृच्छ्रत्रयं तथा ।
यद्वा षण्मासकृच्छ्राणि गा दद्याद्दश पञ्च वा ॥
विधिवद्दहनं कुर्यादुदकं श्राद्धमेव च ॥

इति । पुत्रादिः कृत्वेति शेषः । इत्यादिदुर्मृतिप्रायश्चित्तविषयक-बहुवचनविरोधप्रसंगाद्विकल्पः । द्वितीयेऽस्थिसंचयनं, त्रिरात्रा-शौचमित्याद्याहिताग्निमातापितृव्यतिरिक्तविषयम् । आहिताग्नेस्सं-स्कारमारभ्याशौचग्रहणं कार्यं अनाहिताग्नेर्मरणप्रभृति । तदुक्तं—

अनग्निमत उत्क्रान्तेस्साग्नेस्संस्कारकर्मणः ।
शुद्धिस्संचयनं दाहान्मृताहात्तु यथाविधि ॥

इति । 'साग्नेस्संस्कारकर्मणः' इति श्रवणादाहिताग्नौ पितरि देशान्तरमृते सति यावद्विधिना संस्कारस्तावत्पुत्रादीनां सं-ध्यादिलोपो नास्त्येव । अनेन वचनेनाहिताग्नेर्विधिवद्दहनाभावे आशौचग्रहणं नास्त्येवेत्यनुसंधेयं, दाहादारभ्येति वचनात् ॥

अनग्निमत उत्क्रान्तेराशौचं हि द्विजातिषु ।
दाहादग्निमतो विद्याद्विदेशस्थे मृते सति ॥

तथा—

विदेशस्थे मृते यावाद्विधिना नैव संस्कृतिः ।
पुत्रादीनां तु संध्यादिकर्मलोपो न विद्यते ॥
आहिताग्नेस्तु विधिवद्दाहान्तं नास्ति चेत्तदा ।
आशौचग्रहणं नास्ति दाहाद्याशौचमिष्यते ॥

पारस्करोऽपि—

आहिताग्नेस्तु दहनाद्दशाहाशौचमिष्यते ।
अनाहिताग्नेर्मरणात्पुनर्दाहो यदा भवेत् ॥
अशौचे वर्तमाने चेत्तच्छेषेण विशुध्यति ।
गते त्वाशौचदिवसे पुनर्दाहो यदा भवेत् ॥
मरणादि गृहीतस्य त्रिरात्राच्छुद्धिरिष्यते ।
अगृहीतस्य पुत्रस्य संपूर्णाशौचमेव हि ॥
दुर्मृतानां द्विजातीनां दशाहान्तर्बहिस्तु वा ।
नाशुद्धिर्नैव चाशौचं शुद्धिं लब्ध्वा प्रदाहयेत् ॥
तदादि चोदकं पिण्डमाशौचं श्राद्धमेव च ॥

इति । बृहस्पतिः—

आशौचे वर्तमाने तु पुनर्दाहक्रिया यदि ।
तच्छेषेणैव शुद्धिस्स्यादतीते सूतकं भवेत् ॥

दशाहादि यथावर्ण पित्रोराशौचमाचरेत् ।
सपत्नीनां मिथो ज्ञेयं दम्पत्योश्च परस्परम् ।
सपिण्डानां त्रिरात्रं स्यादित्युवाच प्रजापतिः ॥

इति । वसिष्ठः—

प्रमीतपितृकः पुत्र और्ध्वदैहिकमाचरेत् ।
यदि कर्तुमशक्तश्चेदाशौचनियमान्वितः ॥
आ दशाहादथोर्ध्वं वा यदा कार्यक्षमस्तदा ।
त्रिरात्रं समतिक्रम्य श्राद्धं कुर्याद्यथाविधि ॥
दाहकस्यैतदाशौचमितरेषां न विद्यते ।
कालातिपत्तिविषये यद्यर्वागपि तत्समम् ॥

इति । अर्वाक् सूतकादर्वाक् शेषाशौचसमकालमित्यर्थः । सपत्नीनां दम्पत्योश्च मिथ इति यदुक्तं तत्पुत्रहीनविषयमित्यनुसंधेयम् । पराशरः—

ऊर्ध्वोच्छिष्टमधोच्छिष्टमन्तरिक्षमृतौ तथा ।
कृच्छ्रत्रयं प्रकुर्वीत आशौचमरणेऽपिच ॥
निमित्तद्वितये प्राप्ते प्राजापत्यार्धमाचरेत् ।
सर्वेष्वपि निमित्तेषु कुर्यात्पञ्चदशापि च ॥

इति । अन्यत्सर्वमात्मघातप्रायश्चित्ते वक्ष्यते ॥

इति स्मृतिचन्द्रिकायामाहिताग्निदुर्मरणादिविषया...

देशान्तरमृतस्य मृताहाद्यपरिज्ञाने कर्तव्यमाह पराशरः—

देशान्तरगतो विप्रः प्रवासात्कालकारितात् ।
देहनाशमनुप्राप्तः स्थितिर्न ज्ञायते यदि ॥
कृष्णाष्टमी त्वमावास्या कृष्णा चैकादशी च या ।
उदकं पिण्डदानं च तत्र श्राद्धं समाचरेत् ॥

इति । दहनाशौचं विना कृष्णाष्टम्यादिषु त्रिषु पिण्डोदकदाना-संभवाद्दहनाशौचस्वीकारोपि तत्र विवक्षित इति गम्यते । द्विविधो हि देशान्तरमृतः, कृतसंस्कारोऽकृतसंस्कारश्चेति । कृत-संस्कारश्चाशौचान्ते वक्ष्यते । अकृतसंस्कारोऽपि द्विविधः, मरण-दिवसज्ञानाज्ञानभेदात् । यस्य हि मरणदिवसो ज्ञातः तस्य प्रत्याब्दिकादिश्राद्धं तद्दिन एव कर्तव्यम् । अन्यदिवसे पुनर्दह-नमाशौचग्रहणं च । पिण्डोदकादिदानं त्वनिषिद्धदिननक्षत्र-वारादिकं प्रत्यालोच्य तत्रानुष्ठेयं, स्मृतिपुराणशिष्टाचाराणां तथा प्रवृत्तत्वात् । स्मृत्यन्तरे—

महागुरुनिपाते तु आर्द्रवस्त्रोपवासिना ।
अतीतेऽब्देऽपि कर्तव्यं प्रेतकार्यं यथाविधि ॥
गृहीत्वाऽऽशौचनियमं केशश्मश्रुनिकृन्तनम् ।
आदशाहात्प्रतिदिनं यथाविध्युदकाच्छुचिः ॥
एकादशाहे संप्राप्ते सपिण्डीकरणं भवेत् ।
अन्येषां भ्रातृपूर्वाणां प्रतिश्राद्धं तिलोदकम् ॥

कृतसंस्कारकस्येदमकृतस्याधुनोच्यते ।
समीपस्यासमीपस्य प्रेतकर्म द्विधा स्मृतम् ॥
समीपस्य च संस्कारे दिनं नैव विशोधयेत् ।
आशौचदिनमध्ये तु पुनस्संस्कारमाचरेत् ॥
शोधनीयं दिनं तत्र यथासम्भवमादरात् ।
आशौचविनिवृत्तौ चेत्पुनस्संस्क्रियते मृतः ॥
संशोध्यैव दिनं ग्राह्यमूर्ध्वं संवत्सराद्यदि ।
प्रेतकार्याणि कुर्वन् स्याच्छ्रेयस्तत्रोत्तरायणम् ।
कृष्णपक्षश्च हि तथा वर्जयेत्त्रिपदर्क्षकान् ॥

इति । कात्यायनः—

प्रत्यक्षशवसंस्कारे दिनं नैव विशोधयेत् ।
निर्दिष्टकालवीक्षायां शवः पर्युषितो भवेत् ॥
दग्धः पर्युषितो यैस्तु पुत्रमित्रैश्च बन्धुभिः ।
महाभयप्रदस्तेषां तिथ्यादीन्नैव शोधयेत् ॥
दिवा वा यदि वा रात्रौ शवास्तिष्ठति कुत्रचित् ।
तत्पर्युषितमित्याहुर्दहने तस्य का गतिः ॥
पञ्चगव्येन संस्नाप्य प्राजापत्यं समाचरेत् ।
पूतिगन्धैस्तथा क्लिन्ने स्नाप्य गोमयवारिणा ॥
ब्राह्मणैरभ्यनुज्ञातस्तप्तकृच्छ्रं समाचरेत् ।
क्रिमिरुत्पद्यते यस्य श्वपाकैश्चापि दूषितः ॥
कृत्वा तु पूर्ववत्स्नानं सर्पिषा मधुना ततः ।

पुण्याद्भिरभिषिच्याथ सेचयेद्गन्धवारिणा ॥
गां दत्त्वा द्विजमुख्याय तप्तकृच्छ्रं समाचरेत् ।
इति । एतत्सर्वं दुर्मरणप्रायश्चित्ते वक्ष्यते ॥

इति स्मृतिचन्द्रिकायां मृताहाद्यपरिज्ञानविधिः.

अथाशौचानन्तरं पुण्याहवाचनं कार्यम् । संवर्तः—

आशौचे निर्गते कुर्याद्गृहमार्जनलेपने ।
सवासा जलमाप्लुत्य शुद्धः पुण्याहवाचनैः ॥

वसिष्ठोऽपि—

आशौचान्ते तु कर्तव्यं ब्राह्मणस्याभिषेचनम् ।
ऋग्भिर्यजुर्भिश्छन्दोगैरब्लिङ्गैः पावमानिकैः ।
आशिषश्च गृहीत्वाऽथ श्राद्धकर्म समाचरेत् ॥

इति । व्यासोऽपि—

संपूज्य गन्धपुष्पाद्यैर्ब्राह्मणान् स्वस्ति वाचयेत् ।
धर्मकर्मणि संकल्पे संग्रामेऽद्भुतदर्शने ॥
यज्ञार्थे च प्रतिष्ठादौ सर्वसंस्कारकर्मसु ।
शुद्धिकामस्तुष्टिकामश्श्रेयःकामश्च नित्यशः ॥

इति । यमोऽपि—

पुण्याहवाचनं चैवं ब्राह्मणस्य विधीयते ।
एतदेव त्रिरोङ्कारं कुर्यात् क्षत्रियवैश्ययोः ॥

मन्त्रवर्जं तु शूद्राणां कुर्यात्पुण्याहमस्त्विति ।
वचनेनैव विप्रस्य वृद्धिरस्ति त्रिवाचकम् ॥

इति । काश्यपापस्तम्बौ—‘लोकेषु भूतिकर्मस्वेव तदानीं च वाक्यानि स्युः पुण्याहं स्वस्त्यृद्धिरस्त्विति’ इति । एतत्सर्वं गृह्यसूत्रे स्पष्टं चोदीरितम् ॥

इति स्मृतिचन्द्रिकायामाशौचान्ते पुण्याहवाचनविधिः.

अथैकोद्दिष्टविधिः.

तत्र मरीचिः—

आशौचान्ते ततस्सम्यक्पिण्डदानं समापयेत् ।
तत्र श्राद्धं प्रदातव्यं सर्ववर्णेष्वयं विधिः ॥

इति । ततः आशौचानन्तरमेकादशेऽहनि ब्राह्मण एकोद्दिष्टं कुर्यात् । एकादशेऽहन्येकोद्दिष्टं कुर्यादित्ययं विधिः क्षत्रियादिष्वपि वर्णेषु समान इत्यर्थः । नन्वाशौचसमाप्त्यनन्तरमेकोद्दिष्टविधिः सर्वेष्वपि वर्णेषु किं न स्यात्? एकादशेऽहनि क्षत्रियादीनामधिककालाशौचिनां शुद्ध्यभावात् । ‘शुचिना कर्म कर्तव्यम्’ इति शुद्धेः कर्माङ्गत्वविधानात् । अथ—

आशौचे निर्गते कुर्याद्गृहमार्जनलेपने ।

इत्याशौचानन्तरं गृहशुद्धिः । मैवं, सूतकान्ते पुण्याहवाचन-

मिति साधारण्येनोपक्रम्य एकादशेऽहन्येकोद्दिष्टस्य विष्णुनाऽभिहितत्वात्। तथा—

आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि।
कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः॥

इति शङ्खवचनेन आशौचमध्य एकादशेऽहन्येकोद्दिष्टविधानाच्च। नन्विदमसमञ्जसं—

एकादशेऽह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतम्।
चतुर्णामपि वर्णानां सूतकं तु पृथक्पृथक्॥

अस्यायमर्थः—आशौचानन्तरदिने यच्छ्राद्धं विहितं तच्चतुर्णामपि वर्णानां साधारणं न ब्राह्मणस्यैवेति। कथं तर्ह्येकादशाहशब्दस्योपपत्तिरिति चेत्, लक्षणयाऽऽशौचानन्तरदिनपरत्वोपपत्तेः। अत्रोच्यते—एकादशाहकालविशिष्टैकोद्दिष्टश्राद्धं चतुर्णामपि वर्णानां विधीयते 'न विधौ परऽशब्दार्थः' इति न्यायेनैकादशाहशब्दस्य लक्षणया आशौचानन्तरदिनपरत्वानुपपत्तेः, सति मुख्ये वृत्त्यन्तरकल्पनाया अन्याय्यत्वाच्चैकादशाह एव क्षत्रियादिभिरप्येकोद्दिष्टश्राद्धं कर्तव्यम्। नन्वेकादशेऽहनि क्षत्रियादीनां शुद्ध्यभावाच्छ्राद्धाधिकारो नास्तीति चेत्, न, 'कर्तुस्तात्कालिकी शुद्धिः' इति तात्कालिक्याशुद्धेस्सत्त्वात्। यत्तु शङ्खवचनस्य आशौचमध्ये आशौचान्तरप्राप्तावेकोद्दिष्टमेकादशेऽहन्यशुद्धोपि कुर्यादिति विषयविशेषे तात्पर्यमुच्यते, तन्न, तत्रापि शुद्ध्यभावादित्यस्य चोद्यस्य

समानत्वात् । सामान्येन प्रवृत्तस्य शङ्खवचनस्य विना कारणं विशेषपरत्वे संकोचकाभावाच्च । यदुक्तं—'अथाशौचापगमे' इति सामान्येन प्रक्रम्य विष्णुनैकोद्दिष्टविधानादाशौचानन्तरमेव सर्वैरेकोद्दिष्टं कर्तव्यमेवेति । तन्न, विष्णुवचनस्य दशाहाशौचिब्राह्मणविषयत्वेनोपपत्तेः । तस्मादेकादशाहे क्षत्रियादिभिरप्येकोद्दिष्टश्राद्धं कर्तव्यमिति सुष्ठूक्तम् ।

व्यासः—

सूतकानन्तरं कुर्यादेकोद्दिष्टद्वयं बुधः ।
सूतके पतिते चापि स्वतन्त्रं नातिलङ्घयेत् ॥

इति । स्वतन्त्रं नवश्राद्धादन्यत्, नवश्राद्धं च नवमिश्रद्वयम् । गौतमश्च—

ब्राह्मणं भोजयेदाद्ये होतव्यमनलोऽपि वा ।
पुनश्च भोजयेद्विप्रं द्विरावृत्तिर्भवेदिति ॥

स्वतन्त्रैकोद्दिष्टमाशौचमध्येऽपि कार्यमेव । यत्तु—

पित्रोस्तु पितृपूर्वत्वं सर्वत्र श्राद्धकर्मणि ।

इति, तत् स्वतन्त्रैकोद्दिष्टव्यतिरिक्तनवमिश्रादिसर्वश्राद्धविषयम् । एकादशेऽहनीत्यनेनैकादशाहव्यतिरिक्तनवमिश्रादि आशौचाविघ्नसंभवे विघ्नोपशमनानन्तरमेव कार्यम् । एकादशेऽहनि स्वतन्त्रैकोद्दिष्टातिक्रमे दोषो बृहस्पतिना दर्शितः—

एकादशाहे यच्छ्राद्धमेकोद्दिष्टं समाचरेत् ।
यदि कार्यं न कुर्वीत पुनस्संस्कारमर्हति ॥

इति। एकादशेऽहनि षोडशानामाद्यस्य तु कालान्तरविधाना-दाशौचविघ्नसंभवे न कर्तव्यम्।

एकादशाहे त्वाद्यस्य संकटं तु यदा भवेत्।
द्वादशाहेऽपि कर्तव्यं त्रयोविंशादिनेऽपि वा॥

इति। अत्रैकादशेऽहन्येकादशब्राह्मणभोजनं प्रेतोद्देशेन कर्तव्यम्। तदाह सत्यव्रतः—"एकादशेऽहनि प्रेतार्थं ब्राह्मणानेकादशामन्त्र्य नानाभक्ष्यान्नरसविन्यासैराशयित्वा विधिवत्पिण्डदानं वासोहिरण्यकांस्योपानच्छत्रोदकुम्भदक्षिणां गुणवति विप्रे वा दद्यात्' इति। विप्राभावेऽग्नौ कार्यम्। तथाऽऽह काश्यपः—

एकोद्दिष्टे तु संप्राप्ते विप्राभावे कथं भवेत्।
अभ्यर्च्य सुसमिद्धेऽग्नौ पायसं जुहुयाद्धविः॥
पौरुषेण तु सूक्तेन द्वात्रिंशद्ग्राससंमितम्॥

इति। व्यासोऽपि—

एकादशभ्यो विप्रेभ्यो दद्यादेकादशेऽहनि।
रुद्रमुद्दिश्य कर्तव्यं रुद्रप्रीतिकरं हि तत्॥

इति। अस्य देशाचारतो व्यवस्था। शातातपश्च—

एकादशसु विप्रेषु रुद्रमुद्दिश्य भोजयेत्।
प्रेतत्वस्य विमोकार्थं मधुक्षीरघृताशनैः॥

इति। अस्य विषयान्तरमाह प्रचेताः—

विहिते च वृषोत्सर्गे त्वलाभे शक्त्यसंभवे।
प्रेतत्वस्य विमोकार्थं रुद्रानेकादशाशयेत्॥ इति॥

इति स्मृतिचन्द्रिकायामेकोद्दिष्टविधिः.

वृषोत्सर्गविधिः.

एकादशेऽहनि वृषोत्सर्गः कर्तव्यः । तत्र पुराणम्—

उत्सृजेत्संभवे नीलं लोहितं कृष्णमेव वा ।
मृतो न पश्येन्नरकं गोघाती ब्रह्महाऽपि वा ॥
पुत्रो वा भ्रातृपुत्रो वा मृतस्यैकादशेऽहनि ।
उत्सृजेद्वृषभं नीलं यथावर्णमसंभवे ॥
प्रेतत्वात्प्रविमुच्यन्ते महापातकिनो नराः ।

इति । व्यासः—

एकादशेऽह्नि संप्राप्ते प्रेतस्य स्वर्गसाधनम् ।
वृषमेकं समुत्सृज्य श्राद्धे विप्रांश्च भोजयेत् ॥

इति । काश्यपः—

नीलं वाऽप्यथवा कृष्णं मृतस्यैकादशेऽहनि ।
वृषं पापविशुद्ध्यर्थं रुद्राणामनुशासनात् ॥
होमकर्मसमायुक्तं रुद्रप्रीतिकरं त्यजेत् ।
विप्रो वा क्षत्रियो वाऽपि वैश्यश्शूद्रोऽपि वा तथा ॥
वृषहीनो मृतो याति रौरवं तमसाऽऽवृतम् ।
पतिपुत्रवती नारी मृता चेज्जीवभर्तृका ॥
पातिव्रत्येन तल्लोकं वृषहीना न गच्छति ।
सप्तजन्मकृतं पापं यद्बाल्ये यच्च वार्धके ॥

तत्क्षणादेव नश्येत वृषोत्सर्गे पितुः कृते ।
अशौचे निर्गते पुत्रो नीलं वृषमलंकृतम् ॥
पितॄनुद्दिश्य रुद्राय होमकर्मसमन्वितम् ।
उत्सृजेदथ रुद्रस्य लोकं यात्यत्र मानवः ॥

इति । यत्तु वचनं—

पतिपुत्रवती नारी म्रियते चेद्वयोः पुरा ।
वृषं नैवोत्सृजेत्तस्या गामेकां तु समुत्सृजेत् ॥

इति, तत् वृषं गां चोत्सृजेदिति शक्तविषयम् । अशक्तः पतिपुत्रवतीविषये वृषोत्सर्गमेव कुर्यात् । व्यासः—

पतिव्रता बन्धुमती पुत्रिणी सुभगा मृता ।
नोत्सृजेद्वृषमेकं तु सहगामुत्सृजेद्वृषम् ।
वृषमेकं तु नीलं वा रुद्रमुद्दिश्य संत्यजेत् ॥

इति । वसिष्ठः—

एकादशेऽह्नि संप्राप्ते यस्य नोत्सृज्यते वृषः ।
पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि ॥

इति । लोकाक्षिः—

एकादशे वृषोत्सर्गमह्नि कुर्वीत यत्नतः ।
पतिपुत्रवती नारी म्रियते चेद्वयोः पुरा ॥
वृषं नैवोत्सृजेत्तस्या इति यत्तदसांप्रतम् ।
न स्त्रियश्च वृषोत्सर्गं भर्ता कुर्यात्कदाचन ॥
संस्कर्ता तु स्वयं चेत्स्यात्पुत्रहीना भवेद्यदि ।

अन्यो वा तन्नियोगेन दाहादि श्राद्धमाचरेत् ॥

वृषं रुद्रान् वत्सांस्त्यक्त्वा सपिण्डीकरणावधि ।

तत्कुर्याद्यदि मोहेन कुलक्षयकरं भवेत् ॥

संस्कर्ता यदि पुत्रस्स्याद्वृषं नीलं समुत्सृजेत् ॥

इति । अत्र पुत्रग्रहणं भ्रातृपुत्रविषयम् । नीलवृषलक्षणमुक्तं शातातपेन—

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डरः ।

श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥

शूलं चक्रं तथाऽन्यद्वा लाञ्छनं तस्य कारयेत् ।

यस्य देवस्य यो भक्तस्स तच्चिह्नं च कारयेत् ॥

स्वर्गकामो वृषोत्सर्गे नान्दीमुखविधानतः ।

प्रेतत्वस्य विमोकार्थं रुद्रं वा वृद्धिरूपतः ॥

ब्राह्मणान् भोजयेदष्टौ हिरण्येनोदकेन वा ॥

इति । एतत् कालान्तरे पुनः पितृप्रीत्या कृतवृषोत्सर्गविषयम् ॥

इति स्मृतिचन्द्रिकायां वृषोत्सर्गविधिः.

षोडशश्राद्धनिरूपणम्.

द्वादश प्रतिमास्यानि ऊनषाण्मासिकं तथा ।

त्रैपक्षिकमथोनाब्दं तथा चैवोनमासिकम् ॥

सपिण्डीकरणं चैवेत्येवं श्राद्धानि षोडश ।

एकादशेऽह्नि मास्यून आद्ये षष्ठे तथाऽन्तिमे ॥

प्रतिमासं मृतेऽह्नयब्दं स्युस्त्रिपक्षे च षोडश ।
नृणां तु त्यक्तदेहानां श्राद्धं दद्यात्तु षोडश ॥
चतुर्थे पञ्चमे चैव नवमैकादशे तथा ।
तत्र द्वादशभिर्मासैः श्राद्धं द्वादशसंख्यया ॥
कर्तव्यं श्रुतिनस्तेषां तत्र विप्रांश्च तर्पयेत् ।

गालवः—

ऊनषाण्मासिकं षष्ठे मास्यूनेऽप्यूनमासिकम् ।
त्रैपक्षिकं त्रिपक्षे स्यात्प्रवृत्ते विषमे दिने ॥
प्रतिमासं मृताहे तु न्यूनाब्दं चेति षोडश ।

इति । भृगुरपि—

आद्यमेकादशेऽह्नि स्याद्द्वादशे न्यूनमासिकम् ।
एकद्वित्रिदिनैरूने त्रिभागे वाऽपि वा भवेत् ॥
ऊनाब्दिकं तथैव स्यादूनषाण्मासिकं तथा ।
त्रैपाक्षिकं त्रिपक्षे स्यान्मृताहे त्वितराणि तु ॥

इति । अङ्गिराः—

एकादशे भवेदाद्यं मास्यूने ह्यूनमासिकम् ।
त्रैपक्षिकं त्रिपक्षे तु भवेच्च विषमे दिने ॥
ऊनषष्ठं तथोनाब्दं मृताहे त्वितराणि तु ॥

इति । यदा संवत्सरादर्वाक् द्वादशाहादिषु सपिण्डीकरणं क्रियते तदैकादशाहादिषु षोडश श्राद्धानि दत्त्वैव कार्यम् । तदाह दक्षः—

श्राद्धानि षोडशापाद्य विदधीत सपिण्डनम् ।

इति । पैठीनसिः—

अर्वाक्सपिण्डीकरणात्कुर्याच्छ्राद्धानि षोडश ।
श्राद्धानि षोडशादत्वा नैव कुर्यात्सपिण्डताम् ॥
द्वादशाहे यदा कुर्यात्सपिण्डीकरणं सुतः ।
मध्याह्ने चैव सर्वाणि कुर्याच्छ्राद्धानि षोडश ॥

इति । यदा त्रिपक्षादौ श्राद्धानि दत्वा सपिण्डीकरणं क्रियते तदा तदधोभाविमासिकानां न पुनः कृतिः, स्वकाले कृतत्वात् । ऊर्ध्वभाविमासिकानामेव पुनःकरणम् । तथाऽऽह गालवः—

त्रिपक्षादिषु कालेषु सापिण्ड्यं यश्चिकीर्षति ।
शिष्टानां मासिकानांच यथाकालं पुनः क्रिया ॥
एकादशे कृतानां तु यथाकालं पुनःकृतिः ।
तान्येव तु पुनः कुर्यात्स्वेस्वे काले यथाविधि ॥

इति । अत्रैव विशेषमाह गालवः—

त्रिपक्षात्पूर्वतस्साग्नेर्भवेत्संस्कारवासरे ।
ऊर्ध्वं मृतदिनेऽनग्नेस्सर्वाण्येव मृताहतः ॥

इति । जातूकर्ण्यः—

ऊर्ध्वं त्रिपक्षाद्यच्छ्राद्धं मृताहन्येव तद्भवेत् ।
अधस्तु कारयेद्दाहादाहिताग्नेर्द्विजन्मनः ॥

इति । सपिण्डीकरणादूर्ध्वभाविमासिकनियममाह प्रजापतिः—

सपिण्डीकरणारभ्य दशमैकादशेऽपि वा ।
ऊनत्रिदिवसे कुर्यात्कर्तव्यं तूनमासिकम् ॥
त्रिपक्षे द्वादशे पक्षे चतुर्विंशतिपक्षके ।
पक्षत्रिपञ्चकं कृत्वा अन्तमध्यादिषु क्रमात् ॥
त्रिभिर्द्वाभ्यामुतैकेन मास्यूने ह्यूनमासिकम् ।
त्रिभागशेषे मासे तु कुर्यादिति हि केचन ॥
त्रैपक्षिकं त्रिपक्षे तु प्रवृत्ते विषमे दिने ।
एकादशे भवेदाद्यमिति मासिकनिर्णयः ॥

दशाहादूर्ध्वमित्यर्थः ।

आशौचनिर्गमात्कुर्यादाद्यमेकादशेऽहनि ।
त्रयोविंशादिने वाऽपि सप्तविंशादिनेऽपि वा ॥
ऊनं चैव त्रिपक्षे स्यात् पक्षान्ते विषमेऽहनि ।
ऊनषष्ठं तथोनाब्दं कुर्याच्चैवोपमानतः ॥
प्रतिमासं मृताहेषु मासिकान्यपराणि हि ॥

इति । सपिण्डीकरणादूर्ध्वं मासिकानामपकर्षमाह गौतम —

प्रेतसंस्कारकार्याणि यानि श्राद्धानि षोडश ।
यथाकाले तु कार्याणि नान्यथा मुच्यते ततः ॥
देशकालादिवैषम्यान्मृत्युरोगादिशङ्कया ।
एकादशेऽह्नि कार्याणि ह्यपकृष्यापि षोडश ॥
यथोक्तकालकार्याणि पुनश्श्राद्धानि षोडश ।

वृद्धौ तान्यपकृष्यापि चरेत्तन्मृतवासरे ॥

इति । शाट्यायनिः—

सपिण्डीकरणादर्वागपकृष्य कृतान्यपि ।
पुनरप्यपकृष्यन्ते वृद्ध्युत्तरनिषेधनात् ॥

इति । विष्णुः—

प्रेतश्राद्धानि सर्वाणि सपिण्डीकरणादनु ।
अपकृष्यापि कुर्वीत कर्ता नान्दीमुखे द्विजः ॥
यः कर्ता तु विना वृद्धिं प्रेतश्राद्धानि कर्षति ।
स श्राद्धी नरके घोरे पितृभिस्सह मज्जति ॥
निर्वर्त्य वृद्धितन्त्रं यो मासिकानि समाचरेत् ।
अयातयामं मरणं भवेत्तस्य न संशयः ॥
वृद्धिश्राद्धादिहीनस्तु यश्श्राद्धान्यपकर्षति ।
स श्राद्धी नरके घोरे पितृभिस्सह मज्जति ॥

इति । अनुपस्थितायां वृद्धौ प्रेतश्राद्धं नापकर्षयेदित्यर्थः । प्रचेताः—

श्राद्धानि षोडशानीह कुर्यादेकादशेऽहनि ।
सपिण्डीकरणं कुर्याद्द्वादशाहे तु यत्नतः ॥
मासिकानि च सर्वाणि यथाकालं समाचरेत् ।
अपकृष्यापि वा कुर्याद्वृद्धिश्राद्ध उपस्थिते ॥
न च जन्मर्क्षके कुर्यान्नन्दासु न भृगोर्दिने ।
न भानुभौमदिवसे न दोषोऽस्ति मृतेऽहनि ॥

इति । शातातपः—

मासिकान्यपकृष्यापि चरेत्तन्मृतवासरे ।
त्रिपुष्करे च नन्दासु दर्शे भार्गववासरे ॥
चतुर्दश्यां न कुर्वीत ह्यूनानि त्रीणि वह्निभे ॥

इति । दक्षः—

त्रिपुष्करे च नन्दासु सिनीवाल्यां भृगोर्दिने ।
चतुर्दश्यां च नोनानि कृत्तिकासु त्रिपुष्करे ॥

इति । विष्णुः—

सिनीवाल्यां च नोनानि कृत्तिकासु च पुष्करे ।

इति । सपिण्डीकरणात्पूर्वं मासिकान्येकोद्दिष्टविधिना कुर्यात् । सपिण्डीकरणादूर्ध्वं भ्रातृपत्न्यादीनामेकोद्दिष्टविधानेनैव । मातापितृज्येष्ठभ्रातॄणां पार्वणविधिनैव । तदाह दक्षः—

पत्नीभ्रातृपितृव्याणां सपिण्डीकरणात्परम् ।
एकोद्दिष्टविधानेन मासिकानां पुनः क्रिया ॥
पितृमात्रग्रजादीनां पार्वणेन पुनः क्रिया ॥

इति । पैठीनसिः—

सपिण्डीकरणादर्वाग्यानि श्राद्धानि षोडश ।
एकोद्दिष्टविधानेन कुर्याच्छ्राद्धानि तानि हि ॥
सपिण्डीकरणादूर्ध्वं यदा कुर्यात्तदा पुनः ।
प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्कृतान्यपि ॥

इति । यथा पुत्रादिः पित्रादीनां प्रत्यब्दं पार्वणविधिना

कुर्यात्तथा मासिकान्यपि सपिण्डीकरणादूर्ध्वं कुर्यात्। यथाऽनुजपुत्रपत्नीगुर्वादीनां प्रत्यब्दमेकोद्दिष्टविधिना कुर्यात्तथा मासिकान्यपि सपिण्डीकरणादूर्ध्वं कुर्यादित्यर्थः। अपराह्णे पार्वणश्राद्धं कर्तव्यमित्युक्तं प्राक्। त्रिविधेष्वेकोद्दिष्टेषु तिथिद्वैधे मध्याह्ने कर्तव्यमित्याह मनुः—

एकोद्दिष्टं तु मध्याह्ने नवश्राद्धादिकं चरेत्।
न सन्ध्यायां तु कर्तव्यं नैव रात्रौ कदाचन॥

इत्यादिवचनादत्र मृतस्य न दहनादनन्तरं कर्तव्यं नवश्राद्धं नग्नप्रच्छादनं च; किंतु परेऽहनि मध्याह्ने कर्तव्यम्।

तिलोदकं तथा पिण्डं नग्नप्रच्छादनं नवम्।
रात्रौ न कुर्यात्संध्यायां यदि कुर्यान्निरर्थकम्॥

इति जातूकर्णिवचनाच्च। नवमिश्रसंज्ञकषोडशैकोद्दिष्टेष्वपराह्णव्यापिनी तिथिर्ग्राह्या? किं वा सायाह्नव्यापिनी? इति तिथिसन्देहे सामान्येन सायाह्नव्यापिनी तिथिर्ग्राह्या पित्रर्थे चापराह्णिकीति।

आपराह्णिकास्तु तिथयः पित्रर्थे तु शुभावहाः।
अपराह्णः पितॄणां तु याऽपराह्णानुयायिनी॥
सा ग्राह्या पितृकार्येषु न पूर्वाह्णानुयायिनी।

इति। वृद्धमनुरपि—

यस्यामस्तं रविर्याति पितरस्तामुपासते।
तिथिस्तेभ्यो यथा दत्तो ह्यपराह्णस्स्वयंभुवा॥

इति । सामान्यशास्त्रं विधिमात्रोपजीवनेन प्रवृत्तत्वादपि सामान्यम् । अपराह्णस्त्रिमुहूर्तास्तमयव्यापी । पक्षत्रयं नैकोद्दिष्टविषयं पित्र्यकर्मसामान्यमुपजीव्य प्रवृत्तत्वात् । एकोद्दिष्टश्राद्धे मध्याह्नव्यापी पक्षो वाचनिकः ।

शिवराघवसंवादे—

मध्याह्नव्यापिनी या स्यात्सैकोद्दिष्टे तिथिर्भवेत् ।
अपराह्णव्यापिनी या पार्वणे सा तिथिर्भवेत् ॥

इति । हारीतशातातपौ—

आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्टं तु मध्यमे ॥
पार्वणं चापराह्णे स्यात्प्रातर्वृद्धिनिमित्तकम् ॥
एकमुद्दिश्य यच्छ्राद्धं दैवहीनं विधीयते ।
एकोद्दिष्टं तु तत्प्रोक्तं मध्याह्ने तत्प्रकीर्तितम् ॥

इति । स तु गान्धर्वकुतपरौहिणसंज्ञको मध्याह्नस्त्रिमुहूर्तकः । तस्योपक्रमे कुतपपूर्वोत्तरभागाविच्छया विकल्पितौ । तदाह व्यासः—

कुतपप्रथमे भाग एकोद्दिष्टमुपक्रमेत् ।
आवर्तनसमीपे वा तत्रैव नियतात्मवान् ॥

इति । समाप्तिकालमाह गौतमः —

आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः ।
विधिज्ञो विधिमास्थाय रौहिणं तु न लङ्घयेत् ॥

उभयत्र गान्धर्वव्यापित्ये पूर्वविद्धा ग्राह्या पूर्वा हि सायाह्नास्तमयव्यापित्वात् । सामान्यशास्त्रबलात् उभयत्र त्रिमुहूर्तव्यापित्वे पूर्वैव ; सामान्यापराह्णनिर्णयवत् ॥

इति स्मृतिचन्द्रिकायां षोडशश्राद्धादिनिरूपणम्.

अथ सपिण्डीकरणकालः.

तत्राश्वलायनः—'अथ सपिण्डीकरणं संवत्सरे पूर्णे द्वादशाहे वा' इति । कात्यायनः—'अथ सपिण्डीकरणं संवत्सरे पूर्णे द्वादशाहे त्रिपक्षे वा' इति । बोधायनः—'अथ सपिण्डीकरणं पूर्णे संवत्सरे त्रिपक्षे तृतीये मासि द्वादशाह एकादशाहे वा' इति । व्यासः—

श्राद्धानि षोडशादत्त्वा नैव कुर्यात्सपिण्डनम् ।
असपिण्डीकृते प्रेते पितृत्वं नोपपद्यते ॥
अकृतस्य तु पुत्रस्य शुभं किंचिन्न विद्यते ।
न च नैमित्तिकं काम्यमिष्टापूर्तादिकं न च ॥
नासपिण्डीकृतौ पित्रोरन्येषां श्राद्धमेव च ।
एकादशे द्वादशे वा त्रयोविंशदिनेऽपि वा ॥
त्रिपक्षे वा त्रिमासे वा षष्ठे चैकादशेऽपि वा ॥

इति । गौतमः—

एकादशे द्वादशेऽह्नि त्रिपक्षे वा त्रिमासके ।

षष्ठे वैकादशे वाऽब्दे संपूर्णे वा शुभागमे ॥
सपिण्डकरणस्येमे अष्टौ कालाः प्रकीर्तिताः ।
साग्नौ कर्तर्युभावाद्यौ प्रेते साग्नावनन्तरः ।
अनग्नेस्तु द्वितीयाद्यास्सप्त काला उदीरिताः ॥

इति । अत्रैकादशाहे सपिण्डीकरणस्य प्रयोजनमाह हारीतः—

या तु पूर्वममावास्या मृताहाद्दशमी भवेत् ।
सपिण्डीकरणं तस्यां कुर्यादेव सुतोऽग्निमान् ॥

इति । मृताहादूर्ध्वं द्वितीयादिपरिगणने यदा अमावास्यैकादशाहो भवति तस्मिन्नित्यर्थः । वृद्धवसिष्ठः—

प्रथमा स्यादमावास्या मृताहाद्दशमेऽहनि ।
सपिण्डीकरणं तत्र कुर्यादेव सुतोऽग्निमान् ॥

इति । मृताहादिति मर्यादायां पञ्चमी । मृताहादूर्ध्वदिनमारभ्येत्यर्थः । कार्ष्णाजिनिरपि—

सपिण्डीकरणं कुर्यात्पूर्वेद्युश्चाग्निमान् सुतः ।
परतो दशरात्राच्चेत्कुहूरब्दोपरीतरः ॥

इति । यद्येकादशेऽह्नि सपिण्डीकरणं क्रियते तदा पूर्वाह्णे सपिण्डीकरणादधोभाविनवश्राद्धादीनि दत्त्वा मध्याह्ने सपिण्डीकरणं कृत्वा अपराह्णे पिण्डपितृयज्ञं चरेत् । तदाह सत्यव्रतः—

एकादशेऽह्नि कुर्वाणः पूर्वाह्णे सर्वमाचरेत् ।
मध्याह्ने चैव सापिण्ड्यं कुर्यादित्याह शाण्डिलः ॥

इति । भृगुः—

> या तु पूर्वममावास्या मृताहाद्दशमी भवेत् ।
> सपिण्डीकरणं तत्र कुर्यादेवाग्निमान् सुतः ॥
> सापिण्ड्यं तु विना पुत्रः पितृयज्ञं न चाश्रयेत् ।
> न पार्वणं नाभ्युदयं कुर्वन्न लभते फलम् ॥

इति । देवलः—

> सपिण्डीकरणात्मेते पैतृकं पदमास्थिते ।
> आहिताग्नेस्सिनीवाल्यां पितृयज्ञः प्रवर्तते ॥

इति । यदा दीक्षितस्य पितुर्मृताहाद्द्वादशाहे अमावास्या भवति तत्रैकादशाहे सपिण्डीकरणं कृत्वाऽमावास्यायामपराह्णे पिण्डपितृयज्ञं कुर्यात् । तथाऽऽह जाबालिः—

> द्वादशाहादिकालेषु सपिण्डीकरणेष्विमे ।
> साग्न्यनग्नित्वविधयः कर्तुरेव नियामकाः ॥
> एकादशाहे कुर्वीत द्वादशे यद्यमा भवेत् ।
> सपिण्डीकरणं कृत्वा पितृयज्ञं समाश्रयेत् ॥

इति । एकादशाहद्वादशाहकुहूव्यतिरिक्तविषये साग्निकोऽनग्निको वाऽपि द्वादशाहादिसप्तसु कालेषु सपिण्डीकरणं कुर्यात् । तथाच प्रचेताः—

> एकादशेऽह्नि कुर्वीत साग्निकस्तु सपिण्डनम् ।
> द्वादशाहादिकालेषु साग्निकोऽनग्निकोपि वा ॥
> सपिण्डीकरणं कृत्वा दार्शिकं कर्म चाचरेत् ॥

इति । अत्र विशेषो महाभारते दर्शितः—

अनग्निस्तु यदा वीर भवेत्कुर्यात्तदा गृही ।
प्रेतश्चेदग्निमांश्च स्याद्द्वादशाहे सपिण्डनम् ॥

यजमानोऽग्निमान् राजन् प्रेतश्चानग्निमान् भवेत् ।
एकादशे द्वादशे वा त्रिपक्षे वा त्रिमासि वा ॥

त्रयोविंशदिने वाऽपि षण्मासे वत्सरेऽपि वा ।
प्रमादादकृते तस्मिन् द्वादशैकादशेऽहनि ॥

त्रयोविंशदिने कुर्यात्सपिण्डीकरणं पितुः ।
द्वादशैकादशाहादौ यदि न स्यात्सपिण्डनम् ।
उत्तरोत्तरकाले तु यथासंभवमाचरेत् ॥

इति । गृही श्राद्धकर्ता । गर्गः—

अथापद्यकृतं यत्तु द्वादशाहे सपिण्डनम् ।
त्रयोदशदिने कुर्यात्त्रयोविंशदिनेऽपि वा ॥

इति । बृहस्पतिः—

द्वादशाहादिकालेषु सपिण्डीकरणं यदा ।
तत्र प्रशस्तनक्षत्रे परिशोध्य समाचरेत् ॥

सपिण्डीकरणे त्रीणि ऋक्षाण्याहुर्महर्षयः ।
प्राजापत्यं तथा रौद्रं यदृक्षं सौम्यदैवतम् ॥

त्रिपादृक्षं विना वाऽपि भानुभौमशनैश्चरान् ।
सपिण्डीकरणं यद्वा मासिकाहात्परेऽहनि ॥

इति । आङ्गिराः—

ब्राह्मणक्षत्रियविशां शूद्राणां च सपिण्डने ।
द्वादशाहः प्रशस्तस्स्यात्कर्तुश्चानन्त्यकारणत् ॥

इति । व्यासः—

आनन्त्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात् ।
अस्थिरत्वाच्छरीरस्य द्वादशाहः प्रशस्यते ॥

इति । वृद्धमनुः—

द्वादशेऽहनि विप्राणामाशौचान्ते तु भूभुजाम् ।
वैश्यानां तु त्रिपक्षादावथवा स्यात्सपिण्डनम् ॥

इति । प्रजापतिः—

एकादशेऽह्नि विप्राणां द्वादशेऽहनि वा भवेत् ।
आशौचान्ते भवेद्राज्ञां वैश्यानां च सपिण्डनम् ॥
शूद्राणां द्वादशेऽह्नयेव कर्तुस्तात्कालिकी शुचिः ॥

इति । संवर्तः—

द्वादशेऽहनि विप्राणां सपिण्डीकरणं भवेत् ।
शूद्राणां द्वादशेऽह्नि स्यादाशौचान्तेऽपि वा भवेत् ॥
कुर्यादाशौचमध्येऽपि सच्छूद्राणां सपिण्डनम् ।
कर्तुस्तात्कालिकी शुद्धिरशुद्धिः पुनरेव हि ॥
निजधर्मविहीनानां शूद्राणां तु सपिण्डनम् ।
षष्ठे मासे वत्सरान्ते त्रिपक्षादिषु वा भवेत् ॥
भार्यारतिश्शुचिर्भृत्यभर्ता श्राद्धक्रियापरः ।
द्वादशेऽहनि वा कुर्यादाशौचान्ते सपिण्डनम् ॥

इति । आपस्तम्बः —

शूद्राणां हीनजातीनामाशौचान्ते सपिण्डनम् ।
पक्वान्नेन न कर्तव्यमामेन श्राद्धमाचरेत् ॥
प्रियङ्गुयवगोधूमव्रीहिभिर्वा समाहितः ।
पक्वान्नेनैव सापिण्ड्यं निर्वपेत्पितृपूर्वकम् ।
योजयेत्प्रेतपिण्डं तु नाम्ना पित्रादिषु त्रिषु ॥ इति ॥

इति स्मृतिचन्द्रिकायां सपिण्डीकरणकालाः.

अथ पुनस्सपिण्डीकरणकालः.

तत्र काश्यपः —

व्युत्क्रमेण प्रमीतानां सपिण्डीकृतिरिष्यते ।
अन्तर्हिते मृते पश्चात्पुनः कुर्यात्सपिण्डनम् ॥

इति । दक्षः —

पितामहं च जीवन्तमतिक्रम्य यदा सुतः ।
अतिक्रम्य द्वयं वाऽपि सपिण्डीकरणं चरेत् ॥
तयोरापन्नयोः काले पुनः कुर्यात्सपिण्डनम् ॥

इति । वृद्धवसिष्ठः—

व्युत्क्रमेणापि सापिण्ड्यं कर्तव्यमृषिसंमतम् ।
तत्राप्यूर्ध्वस्य सापिण्ड्ये कृतेऽस्य पुनराचरेत् ॥

औरसः क्षेत्रजो वाऽपि धर्म एवं सनातनः ।
परित्यज्यैव जीवन्तं पुत्रं नान्यैस्तु कारयेत् ॥
भ्राता वा भ्रातृपुत्रो वा सपिण्डश्शिष्य एव वा ।
सपिण्डीकरणं कुर्यात्पुत्रहीनस्य सर्वदा ॥
अथवा प्रेतभूतस्य पत्नी कुर्यादमन्त्रकम् ।
ऋत्विजा कारयेद्यद्वा सपिण्डीकरणं पुनः ॥

इति । प्रजापतिः—

पित्रोस्सपिण्डीकरणं पुत्र एव समाचरेत् ।
अथवा शिष्यसब्रह्मचारिभृत्यपुरोहितैः ।
कारयीत दशाहान्तं सपिण्डीकरणं विना ॥

इति । गालवः—

सपिण्डीकरणश्राद्धं पुत्रैः कार्यं न चापरैः ।
दाहादिकं दशाहान्तं गौणपुत्रैस्तु कारयेत् ॥

इति । अत्र विशेषो गौतमेन दर्शितः—

अग्रजो वाऽनुजो वाऽपि सपिण्डो वाऽपि सोदकः ।
सपिण्डीकरणं कुर्यात्पुत्रो वा वृद्ध्युपस्थितौ ॥
सपिण्डीकरणं हित्वा वृद्धिश्राद्धमुपक्रमेत् ।
अयातयामं मरणं भवेत्तस्य न संशयः ॥
वृद्धिश्राद्धविहीनो यः पुत्रिणोऽस्य सपिण्डनम् ।
कृत्वा तु नरके घोरे पितृभिस्सह मज्जति ॥

इति । वृद्धावुपस्थितायां भ्रातृसापिण्डसोदकादिभिः कृतं सपिण्डीकरणं पुनः पुत्रः पृथक् कुर्यात् । तथा—

अग्रजो वाऽनुजो वाऽपि नवश्राद्धानि षोडश ।
असंसृष्टधनो वाऽपि सर्वैरपि कृतं भवेत् ॥

इति । विष्णुः—

ज्येष्ठो वाऽप्यनुजो वाऽपि सपिण्डस्सोदकोऽपि वा ।
यस्तु संनिहितस्तस्य त्वधिकारस्सपिण्डने ॥
पुनः कुर्युर्यथापूर्वं लेपभाक्त्वप्रसिद्धये ।
श्राद्धाधिकारसिद्ध्यर्थं प्रेतत्वान्मुच्यतेऽपि वा ॥

इति । आपस्तम्बः—

पितुस्सपिण्डीकरणं बन्धुभिर्वा कदाचन ।
प्रेतत्वस्य विमुक्तस्य पुनः कुर्युस्सपिण्डनम् ॥

इति । यत्तु यमः—

देशान्तरस्थितः पुत्रः श्रुत्वा पितृविपर्ययम् ।
कुर्वीत वपनं सद्य आदशाहात्तिलोदकम् ॥
सपिण्डीकरणश्राद्धं कुर्यादेकादशेऽहनि ।

इति, तत् ज्येष्ठविषयम् । शातातपः—

अग्रजो वाऽनुजो वाऽपि पित्रोर्देशान्तरे मृतिम् ।
वापयित्वाऽथ केशादीन् सचेलमवगाहयेत् ॥
श्रवणाहान्न कुर्वीत भोजनं मैथुनं तथा ।
दशाहान्तेऽनुजः कुर्यात्पार्वणं श्राद्धमादरात् ॥
ज्येष्ठस्सापिण्डीकरणं पुनः कुर्यात्कृतं यदि ।

इति । वृद्धशातातपः—

अग्रजो वाऽनुजो वाऽपि पित्रोर्देशान्तरे मृतिम् ।
श्रुत्वा केशान् वापयित्वा सचेलस्नानमाचरेत् ॥
दशाहं तु ब्रह्मचारी दद्याच्चैव तिलोदकम् ।
सपिण्डीकरणं कुर्यादन्येन च कृतं यदि ॥

इति । गौतमः—

देशान्तरे स्थिते ज्येष्ठे त्वनुजेन कृते सति ।
कृतं श्राद्धं पुनः कुर्यात्साापिण्ड्यं पूर्ववत्सुतः ॥
सपिण्डीकरणं श्राद्धं करिष्य इति कीर्तयेत् ।
उपतिष्ठत्विति स्थाने स्वधाशब्दं प्रयोजयेत् ।
मृतं पितरमुद्दिश्य पार्वणस्यैकदेशवत् ॥

इति । शातातपः—

सपिण्डीकरणश्राद्धं ज्येष्ठेन न कृतं यदा ।
ज्येष्ठः पुनश्च कुर्वीत पिण्डसंयोजने कृते ॥

इति । वृद्धवासिष्ठः—

यवीयसा कृते श्राद्धे प्रेतशब्दं विहाय च ।
तदग्रजेन कर्तव्यं सपिण्डीकरणं पुनः ॥
सपिण्डीकरणश्राद्धं दैवपूर्वं नियोजयेत् ।
पितॄनेवाशयेत्तत्र पुनः प्रेतं विनिर्दिशेत् ॥
कनिष्ठोऽपि विदेशस्थः श्रुत्वा पितृविपर्ययम् ।
दशाहं समतिक्रम्य पार्वणं श्राद्धमाचरेत् ॥

सपिण्डीकरणं नाम श्राद्धं पार्वणवद्भवेत् ।
अर्घ्यसंयोजनं कुर्यात्पिण्डसंयोजनं तथा ॥
प्रेतत्वात्तु विमुक्तस्स्यात्पुनः प्रेतं न निर्दिशेत् ।
प्रेतशब्दं विना सर्वं कार्यमित्याह गौतमः ॥

इति । गालवः —

नवश्राद्धं सपिण्डत्वं श्राद्धान्यपिच षोडश ।
एकेनैव तु कार्याणि संविभक्तधनेष्वपि ॥
सपिण्डीकरणादूर्ध्वं प्रतिसंवत्सरं सुतैः ।
मातापित्रोः पृथक्कार्यं त्वेकोद्दिष्टं मृतेऽहनि ॥

इति । गौतमः —

सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतम् ।
धनेन वाऽविभक्तेन तत्सर्वैस्तु कृतं भवेत् ॥

इति । अत्र विशेषो बृहस्पतिना दर्शितः—

सपिण्डीकरणं पित्रोः पितृयज्ञविधानतः ।
पुत्रास्सर्वे पृथक्कुर्युर्यदा ज्येष्ठो न कारयेत् ॥
अग्रजेन कृतं कर्म नानुजेन पुनःकृतिः ॥

इति । लोकाक्षिः —

विभक्तो वाऽविभक्तो वा मातापित्रोस्सपिण्डनम् ।
कथंचिदनुजः कुर्याद्भूयः कुर्यात्तदग्रजः ॥
पितामह्यादिपिण्डेषु मातृपिण्डमिति स्थितिः ॥ इति ॥

इति स्मृतिचान्द्रिकायां पुनस्सपिण्डीकरणकालः.

अथ सपिण्डीकरणप्रयोगः । तत्र प्रचेताः—

स्वपितुः प्रेतभूतस्य त्वेकोद्दिष्टविधानतः ।
एषां पितामहादीनां विधिना पार्वणेन तु ॥
श्राद्धद्वयं हि कर्तव्यं सपिण्डीकरणं हि तत् ॥

इति । विष्णुः—

पितुर्मरणमारभ्य द्वादशे दिवसे चरेत् ।
प्रेतभावविनिर्मोकद्वारा प्रेतस्य वै पितुः ॥
पितामहादिभिस्सार्धं सापिण्ड्यस्य प्रसिद्धये ।
समानोदकभावस्य सिद्ध्यर्थं च पितुस्सुतः ॥
एषां पितामहादीनां विधिना पार्वणेन तु ।
स्वपितुः प्रेतभूतस्य त्वेकोद्दिष्टविधानतः ॥
इत्थं च पार्वणात्मैकोद्दिष्टात्मोभयरूपकम् ।
कामकालौ वैश्वदेवे निर्दिष्टौ तु सपिण्डने ॥
पितामहादीन्निर्दिश्य पितुरुच्चारणं ततः ।
संबन्धगोत्रनामानि वस्वादींश्च प्रकीर्तयेत् ॥
सपिण्डीकरणश्राद्धं पितृपूर्वमुदीरितम् ।
प्रेतपूर्वं वदन्त्येके तदसांप्रतमीरितम् ॥
विश्वेदेवार्चनं कृत्वाऽनन्तरं प्रेतपूजनम् ।
पार्वणस्य हि तन्त्रस्य मध्ये तन्त्रान्तरं भवेत् ॥
अवटत्रितयं वाऽपि कुर्याद्वा मण्डलत्रयम् ।
देवार्थानामुत्तरे तु पित्रर्थानां तु मध्यमे ॥

दक्षिणे तु निमित्तस्य पादप्रक्षाळनक्रमः ।
प्राङ्मुखानादितो देवानभ्यर्च्योदङ्मुखान् पितॄन् ॥
प्रत्यङ्मुखनिविष्टं तु प्रेतं विधिमनुस्मरन् ।
तिलगन्धादिसंयुक्तं कुर्यात्पात्रचतुष्टयम् ॥
सादयेत्प्रथमं तत्र पित्र्यं पैतामहं ततः ।
प्रपितामहदैवत्यं ततः पेतार्थमुत्तमम् ॥
पात्रैकदेश उदकं तेभ्यो दद्याद्यथाक्रमम् ।
गन्धपुष्पाणि धूपं च दीपमाच्छादनादिकम् ॥
यथाविभवसारेण दत्त्वा विप्रांस्तु भोजयेत् ।
एकोद्दिष्टे निमित्तेऽपि यदस्यावाहनादिकम् ॥
स्वधाशब्दं धूपदीपं नमश्शब्दं प्रयोजयेत् ।
आवाहनं स्वधाशब्दं धूपदीपौ सपिण्डने ॥
नैव कुर्यान्नमस्स्थान उपतिष्ठत्विदं भवेत् ।
विप्रपाणावथाग्नौ वा चरुं हुत्वाऽऽहुतिद्वयम् ॥
निरूह्य वह्नेरङ्गारान् प्रेताय च यमाय च ।
स्वाहेति जुहुयादन्नमुक्त्वा तद्गोत्रनामनी ॥
प्रेतहस्तेऽपि वा हुत्वा भोजनान्ते यथाक्रमम् ।
संबुद्ध्या निर्दिशेन्नाम पित्रादीनामसाविति ॥
यज्ञशर्मन्निमं पिण्डमुपतिष्ठेति चान्ततः ।
पिण्डं चतुर्थं प्रेताय दद्याद्दक्षिणहस्ततः ॥
प्रेतपात्रस्थमुदकं पित्राद्यर्घेष्वथानयेत् ।

समानो मन्त्र इत्याभ्यां ऋग्भ्यां द्वाभ्यामनुक्रमात् ॥
मधुमन्त्रेण चादाय प्रेतपिण्डं त्रिधा कृतम् ।
संगच्छध्वमिति द्वाभ्यां पितृपिण्डेषु योजयेत् ॥
ये समाना इति द्वाभ्यां पिण्डोपस्थानमिष्यते ।
पिण्डसंयोजनादूर्ध्वं प्रेतत्वस्य निवृत्तितः ॥
मार्जनादिषु सर्वत्र चतुर्थी विनिवर्तते ।
केवलः पितृशब्दस्तु पितृसामान्यवाचकः ॥
पितामहादिसंबन्धं मन्त्रसूत्रादिषूहयेत् ।
देशान्तरस्थिते ज्येष्ठे सपिण्डीकरणे कृते ।
प्रेतशब्दं विहायैव कुर्यादेवं सपिण्डनम् ॥

इति । यत्तु कात्यायनवचनं—

सपिण्डीकरणे वृत्ते पृथक्त्वं नोपपद्यते ।
पृथक्त्वे तु कृते पश्चात्पुनः पितृसपिण्डता ॥

इति, यत्तु वचनं—

यस्सपिण्डीकृतं प्रेतं पृथक्पिण्डे नियोजयेत् ।
विधिघ्नस्तेन भवति पितृहा चोपजायते ॥

इति, तत् ज्येष्ठेन कृतसपिण्डीकरणस्यानुजेन कृतसापिण्डीकरणार्थं पृथगेकोद्दिष्टनिषेधपरं, मृताहे मातापित्रोरेकोद्दिष्टनिषेधपरं च ॥

इति स्मृतिचन्द्रिकायां सपिण्डीकरणप्रयोगः.

अथानुगमने सपिण्डीकरणकालः.

अनुगमने पत्या सह सपिण्डीकरणं कार्यम् । तत्र यमः—

पत्या चैकेन कर्तव्यं सपिण्डीकरणं स्त्रियाः ।
सा मृताऽपि हि तेनैक्यं गता मन्त्राहुतिव्रतैः ॥

इति । शातातपोपि—

मृता याऽनुगता नाथं सा तेन सहपिण्डताम् ।
अर्हति स्वर्गवासेऽपि यावदाभूतसंप्लवम् ॥

इति । वसिष्ठः—

अनुयाने तु पतिना सपिण्डीकरणं सह ।
अन्तर्धाय तृणं मध्ये भर्तृश्वशुरयोरपि ॥

इति । केचिद्भर्त्रादिभिस्सह सापिण्ड्यमाहुः । यदाह शङ्खः—

मृतं पतिमनुव्रज्य या नारी ज्वलनं गता ।
अस्थिसंचयनान्तेऽस्या भर्तृस्संस्कार एव हि ॥
नवश्राद्धं सपिण्डान्तं भिन्नकालमृतौ यथा ।
सपिण्डीकरणश्राद्धं सह भर्त्रादिभिस्त्रिभिः ॥

इति । अत्र केचिदनुयाने एकचित्यारोहणे एकदिनमरणे स्त्रियाः पृथक्सपिण्डीकरणं नास्ति, भर्तुः कृते स्त्रिया अपि सापिण्ड्यं कृतं भवतीत्याहुः । विष्णुः—

कृते पितरि मातुस्तु कुर्यात्सह सपिण्डनम् ।
पितुरेव सपिण्डत्वे तस्या अपि कृतं भवेत् ॥

इति । सुमन्तुरपि—

दम्पत्योरेककाले तु मृतयोर्वा यदि स्त्रियः ।
चित्यारोहणकाले तु षोडशान्तं पृथक्पृथक् ॥
सपिण्डीकरणं तस्या न च भर्तुः कृतं यदि ।

इति । एवमादीनि वचनान्यप्युक्तान्येकचित्यारोहणे स्त्रियाः पृथक्सपिण्डीकरणासमर्थपराणि वेदितव्यानि, भर्तुः कृते स्त्रिया अपि कृतं भवतीति शास्त्रस्य चरितार्थत्वात् । समर्थस्तु पृथगेव कुर्यात् । तत्र स्मृत्यन्तरं—

या समारोहणं कुर्याद्भर्तुश्चित्यां पतिव्रता ।
द्वादशेऽहनि संप्राप्ते पृथक्पिण्डे नियोजयेत् ॥
एकचित्यां समारूढौ दम्पती निधनं गतौ ।
मासिकानि नवश्राद्धं सपिण्डीकरणं पृथक् ॥

इति । शङ्खः—

पितर्युपरते पत्न्यां क्रियाः कुर्युर्द्वयोरपि ।
अनुवृत्तिं वदन्त्येषां संघातमरणेऽपि च ॥

इति । गौतमः—

पतिव्रता तु या नारी भर्तारमनुगच्छति ।
पिण्डदानादिकं श्राद्धं सपिण्डीकरणं पृथक् ॥

इति । व्याघ्रपादः—

दम्पत्योरेकदा मृत्युर्देहेदौपासनादुभौ ।
पृथक्पुत्रेण कर्तव्याः पिण्डदानोदकक्रियाः ॥

इति । पृथक् श्राद्धादिक्रियास्सपिण्डीकरणं च यदा भर्तुः मरणदिनादुत्तरदिनमृतायाः सहगमने परदिने चितारोहणेनानुगमने वा तत्र द्वादशाहे सपिण्डीकरणं कार्यम् । तदुक्तं स्मृत्यन्तरे—

पित्रोस्संघातमरणे मातुरन्यत्र वा दिने ।
अनुयानमृतौ श्राद्धं यथाकालं समाचरेत् ॥

इति । पित्रोस्संघातमरणे, पितृमरणदिनादुत्तरदिनमरणे परदिनेऽनुगमनमरणे वा मातुस्तत्तदेकादशाहादिकाले षोडशश्राद्धानि सपिण्डीकरणादीनि कुर्यात् । देवलोऽपि—

तद्दिने वाऽपरेद्युर्वा भर्तारमनुगच्छति ।
नवश्राद्धं षोडशं च सपिण्डीकरणं यथा ॥
यथाकाले तु कर्तव्यं प्रतिसंवस्तरं यथा ।

इति । वसिष्ठः—

दह्यमानं तु भर्तारं या नारी त्वनुगच्छति ।
मरणादि भवेच्छ्राद्धं दहनादि तयोर्न तु ॥

इति । वह्निपुराणेऽपि—

दह्यमानं तु भर्तारमनुगच्छति या सती ।
तस्याश्श्राद्धं पिण्डदानमुदकं च पृथक्पृथक् ॥
सपिण्डनं तु मरणाद्द्वादशाहे समापयेत् ॥

इति । एवमादिवचनेभ्यो मातुर्विषमदिने नवश्राद्धानि दत्त्वा मातुरेकादशाहे नवमिश्राण्यपकृष्य दत्त्वा मातुर्द्वादशाहे सपि-

ण्डीकरणश्राद्धं कार्यमित्युक्तं भवति । अन्ये तु पितुश्श्राद्धकाले मातुश्श्राद्धं कर्तव्यमित्याहुः । यदाह शातातपः—

तद्दिने वाऽपरेद्युर्वा भर्तारमनुगच्छति ।
भर्त्रा सहैव शुद्धिस्स्याच्छ्राद्धं चैकदिने भवेत् ॥

इति । प्रचेता अपि—

भर्त्रा सह प्रमीतायां मृतेऽहन्यपरेऽह्नि वा ।
आशौचं मरणादि स्याद्दहनादि तयोर्न तु ॥

इति । भर्तुर्मरणादि भार्याया इत्यर्थः । विश्वादर्शेऽपि—

पतिव्रता त्वन्यदिनेऽनुगच्छेद्या स्त्री पतिं चित्यधिरोहणेन ।
दशाहतो भर्तुरवस्य शुद्धिः श्राद्धद्वयं स्यात्पृथगेककाले ॥

इति । स्मृत्यन्तरेऽपि—

भर्तारमनुगच्छन्ती पत्नी चेत्सार्तवा यदि ।
तैलद्रोण्यां विनिक्षिप्य लवणे वा मृतं पतिम् ॥
त्रिरात्राद्दहनं कुर्युः बान्धवास्तु तया सह ।
श्राद्धं चैकदिने कुर्याद्द्वयोरपि हि निर्णयः ॥

इति । गालवः—

एकचित्यां समारूढौ दम्पती निधनं गतौ ।
एकोद्दिष्टं षोडशं च भर्तुरेकादशेऽहनि ॥
द्वादशेऽहनि संप्राप्ते पिण्डमेकं द्वयोः क्षिपेत् ।
पितामहादिपिण्डेषु तं पितुर्विनियोजयेत् ॥

इति । तत्रैकदिनमरणे एकचित्यारोहणे भर्तुर्मरणदिनादुत्तरदिन-

मरणेऽपि वा स्वस्वसबन्धिकाले श्राद्धं कुर्यादित्येकः पक्षः। भर्तुः श्राद्धकाले मातुः श्राद्धं कुर्यादित्यन्यः पक्षः। तत्रैव सपिण्डीकरणे दम्पत्योरेकं पिण्डं क्षिप्त्वा पितामहादिपिण्डेषु तं पिण्डं योजयेदित्यपरः पक्षः। अत्र स्मृतीनां समबलत्वा-द्येथेच्छया विकल्पो द्रष्टव्यः। अत्रैव विशेषः प्रचेतसा दर्शितः—

दम्पत्योरेकदा मृत्युस्स्याच्चित्यारोहणेन वा।
पृथङ्मातुः पितुः श्राद्धं तथा मातुर्यथा पितुः॥

इति। अत्रिः—

एककाले गतौ जायापती यदि तदा पुनः।
पृथक्पाकेन कर्तव्यं पितृश्राद्धपुरस्सरम्॥
दह्यमानं तु भर्तारं दृष्ट्वा नारी पतिव्रता।
अनुगच्छेत्तयोश्श्राद्धं पृथगेकादशेऽहनि॥
द्वादशेऽहनि संप्राप्ते सपिण्डीकरणं पितुः।
निर्वर्त्य मातृपिण्डं तु पितृपिण्डेन योजयेत्॥

इति। तथा—

पितुर्मरणकाले तु माता यस्य प्रमीयते।
षोडशान्तं पृथक्कृत्वा सपिण्ड्यं द्वादशेऽहनि॥
प्रेतत्वात्तु विमुक्तेन सह मातुस्सपिण्डनम्॥

कुर्यादिति शेषः। अन्ये मृताहवत्तन्त्रेण सपिण्डीकरणमाहुः। यदाह काश्यपः—

दशाष्ट द्वादश विप्रान् निमन्त्र्य द्वादशेऽहनि ।
सर्वोपचारैस्संपूज्य यथाविभवसारतः ॥
दक्षिणाग्रान् कुशान् द्वेधा आस्तीर्यैव तु पूर्ववत् ।
पित्रादेः प्राच्यदर्भेषु प्रेतार्थं पश्चिमेषु तु ॥
पितामहादीन्निर्दिश्य त्रीन् पिण्डान् पितृयज्ञवत् ।
यज्ञशर्मन्निमं पिण्डमुपतिष्ठेति पश्चिमे ॥
द्विधाऽऽस्तृतेषु दर्भेषु त्वर्घ्यपात्रं प्रकल्पयेत् ।
पित्रादेश्च पुरश्चैव मातुश्च तदनन्तरम् ॥
पित्रर्घ्यपात्र उदकं क्रमात्पैतामहादिषु ।
ये समाना इति द्वाभ्यां मन्त्राभ्यां योजयेत्क्रमात् ॥
योजयेन्मातुरर्घ्यं च ऋग्भ्यां मात्रादिषु त्रिषु ।
एवं त्रिधाकृतं पिण्डं पिण्डेषु त्रिषु योजयेत् ॥
पित्रोस्संघातमरणे त्वनुयानविधिः स्मृतः ।
पृथगेवान्यथा कुर्यादिति प्राह पितामहः ॥

इति । अत्राष्टब्राह्मणपक्षे मातापित्रोः प्रेतार्थमेकमेकं पित्रदिषु त्रीन् द्वौ वैश्वदेवे विष्ण्वर्थमेकम् । दशपक्षे वैश्वदेवं तन्त्रेण, अन्यत्सर्वं स्पष्टम् । भोजनान्तोपचारैः संपूज्य पिण्डार्घ्ययोजनं तन्त्रेण स्वगृह्यानुसारेण कुर्यादित्यर्थः । सपिण्डीकरणश्राद्धे विष्ण्वर्चनमुक्तं—

आद्यन्ते देवपूजां च सपिण्डीकरणे चरेत् ।

इति । शाण्डिलोपि—

सपिण्डीकरणे तद्वद्विष्णुमभ्यर्चयेदिति ।

इति । अत्र यत्तन्त्रेण मातापित्रोस्सपिण्डीकरणश्राद्धमुक्तं तत् पूर्वोक्तबहुवचनपर्यालोचनयाऽशक्तविषये योजनीयम् ।

उक्तं स्मृतिसंग्रहे—

दम्पत्योरेकदा मृत्युर्देहेदौपासनादुभौ ।
ततः पुत्रेण कर्तव्याः पृथक्पिण्डोदकक्रियाः ॥
एकोद्दिष्टं सपिण्डं च वह्निरेको द्विजः पृथक् ।
पित्रर्थमुदकं पिण्डं क्षिपेत्पैतामहादिषु ॥
मात्रर्घ्यपात्र उदकं पिण्डं पित्रादिषु त्रिषु ।
ब्राह्मणांश्चैव संभोज्य दद्याच्छक्त्या च दक्षिणाम् ॥

इति । अत्र विशेषमाह पुलस्त्यः—

दुर्मृतस्सुमृतो वाऽपि पिताऽग्रे यद्यसंस्कृतः ।
कालान्तरे मृता माता तस्या दाहादिकाः क्रियाः ॥
पत्या सहैकचित्यां तु दहेदौपासनादुभौ ॥

इति । संवर्तः—

पिता महीपते! यस्य चिरकालमसंस्कृतः ।
माता प्रमीता यदि हि तयोर्दाहादिकं सह ॥
उदकं पिण्डदानं च नवश्राद्धं सपिण्डनम् ।
पित्रोः पुत्रेण कर्तव्यमेष धर्मस्सनातनः ॥

इति । यमः—

अस्थिसंचयनादर्वाग्भर्तुः पत्नी मृता यदि ।

तस्मिन्नेवानले दद्याद्यदि चाग्निर्न शाम्यति ॥
शान्तेऽग्नौ पुनरेवास्याः पृथक्चित्यादि कारयेत् ।
उदकादि सपिण्डान्तं तयोः कार्यं सहैव तु ॥

इति । स्मृत्यन्तरे--

पत्न्याः कुर्यादपुत्रायाः पतिर्मात्रादिभिस्सह ।
साপिण्ड्यमनुयाने तु जनकेन सहात्मजः ॥
पितामह्यादिभिर्ब्राह्मविवाहोढस्त्रियस्सुतः ।
पितृपक्षैर्मातृपक्षैर्वाऽऽसुराद्यागतस्सुतः ॥
विवाहपुत्रभेदेन तद्गोत्रं च व्यवस्थितम् ।
अपुत्रस्यापि कुर्वीत धर्मपत्नी सपिण्डताम् ॥
न तत्संन्यासिनां कुर्यात्पार्वणं द्वादशेऽहनि ।

अस्यार्थः—पतिरपुत्रायाः पत्न्याः सापिण्ड्यं मात्रादिभिः मातृपितामहीप्रपितामहीभिस्सह कुर्यात् । तदाह पैठीनसिः—

अपुत्रायां मृतायां तु पतिः कुर्यात्सपिण्डताम् ।
श्वश्र्वादिभिस्सहैवास्यास्ताभिस्सह मृतेऽहनि ॥

इति । ब्राह्मदैवार्षप्राजापत्यविवाहोढायाः स्त्रियः सुतः पितामह्यादिभिस्सह सपिण्डीकरणं कुर्यात् । तदाह सत्यव्रतः—

मातुस्सापिण्डीकरणं पितामह्यादिभिस्स्मृतम् ।
अपुत्रायां मृतायां तु पतिः कुर्यात्सपिण्डताम् ॥
श्वश्र्वादिभिस्सहैवास्या यदि पूर्वं मृतास्तु ताः ।
भर्ता मृतश्चेत्तेनैव सह तेनैकतां गता ॥

इति । आसुरगान्धर्वराक्षसपैशाचोढायाः स्त्रियस्सुतः पितृपिता-महप्रपितामहैर्वा पितामह्यादिभिर्वा (मातामहादिभिर्वा) सह सपिण्डीकरणं कुर्यात् । यमः—

मातुस्सपिण्डीकरणं पित्रैकेन त्रिभिश्च वा ।
आसुराद्यागतः पुत्रः पितामह्यादिभिस्सह ॥

इति । अस्मिन्नेव विषये शातातपः—

मातुस्सपिण्डीकरणं मातामह्यादिभिः स्मृतम् ।
पितामह्यादिभिः कुर्याद्यद्वा पित्रादिभिस्स्त्रियः ॥
मातामहादिभिर्वाऽपि ह्यासुराद्यागतस्सुतः ।

इति । पुत्रिकापुत्रोऽप्येवमेव । गोत्रनिवृत्त्यनुवृत्ती विवाहप्रकरणे वक्ष्येते ॥

इति स्मृतिचन्द्रिकायामनुगमने सपिण्डीकरणकालः.

अथ सपिण्डीकरणनिषेधे कानिचिद्वचनानि लिख्यन्ते ।

शातातपः—

क्लीबैश्च पतितैरेव दुष्टाभिः स्त्रीभिरेव च ।
सपिण्डीकरणं कुर्यादेकोद्दिष्टं समाचरेत् ॥
नैष्ठिकानां यतीनां च श्राद्धे नारायणार्पणम् ।
उपकुर्वाणकस्यैव सपिण्डीकरणं विदुः ॥
नैष्ठिको ब्रह्मचारी तु देहं त्यक्त्वा परं व्रजेत् ।

तस्य श्राद्धं न कार्यं स्यात्सपिण्डीकरणं न च ॥

इति । वृद्धवसिष्ठः—

सपिण्डीकरणं नैव मृतानां ब्रह्मचारिणाम् ।
दाहादि षोडशाहान्तं निर्वर्त्यैव यथास्मृति ॥
द्वादशेऽहनि संप्राप्ते कृत्वा चैव तु पार्वणम् ।
नारायणं समुद्दिश्य विप्रानष्टौ तु भोजयेत् ॥
एकोद्दिष्टविधानेन श्राद्धं वा कारयेद्द्विजः ॥

इति । अत्रोपकुर्वाणनैष्ठिकानां सपिण्डीकरणं कृताकृतम् । यतिविषये पुलस्त्यः—

कुटीचको बहूदश्च हंसः परमहंसकः ।
चतुर्विधानां भिक्षूणामेकदण्डित्रिदण्डिनाम् ॥
षोडशानि नवश्राद्धं सपिण्डीकरणं च न ॥

इति । उशना—

कुटीचको बहूदश्च हंसः परमहंसकः ।
सपिण्डीकरणं तेषां न कर्तव्यं सुतेन तु ॥
दण्डग्रहणमात्रेण प्रेतत्वं नैव जायते ।
प्रेतत्वस्य विमोकार्थं षोडशश्राद्धको विधिः ॥
पिण्डोदकं नवादीनि क्षुत्तृष्णादिनिवृत्तये ।
सपिण्डीकरणश्राद्धं पितृत्वप्राप्तये विधिः ॥
अवस्थात्रयहीनानां यतीनां द्वादशेऽहनि ।
श्राद्धाधिकारसिद्ध्यर्थं पार्वणं तु सुतश्चरेत् ॥

चतुर्विधानां भिक्षूणां ज्ञातिबन्धुसुतादिभिः ।
द्वादशेऽहनि कर्तव्यं तेषां श्राद्धं तु पार्वणम् ॥

इति । यमः—

सपिण्डीकरणं नैव कुर्यादेवौरसस्सुतः ।
एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा ॥
अहन्येकादशे प्राप्ते पार्वणश्राद्धमाचरेत् ॥

इति । प्रजापतिः—

सपिण्डीकरणं नैव यतीनां चैव सर्वदा ।
अहन्येकादशे प्राप्ते पार्वणं तु विधीयते ॥

इति । बृहस्पतिः—

नवश्राद्धं यतेर्न स्यात्सपिण्डीकरणं न वा ।
अहन्येकादशे प्राप्ते कुर्यात्तस्य हि पार्वणम् ॥

इति । वसिष्ठः—

एकोद्दिष्टं जलं पिण्डमाशौचं प्रेतकर्म च ।
न कुर्यात्पार्वणादन्यद्ब्रह्मभूताय भिक्षवे ॥

ब्रह्मभूतो ब्रह्माहमस्मीत्युपासकः । पुलस्त्यः—

प्रव्रजेद्यदि संसाराद्ब्रह्मविद्यापरायणः ।
कुटीचको भवेद्वाऽपि यद्वा चैव बहूदकः ॥
हंसो भवेत्ततो ज्ञाने परहंसस्ततोऽधिकः ।
एकदण्डी त्रिदण्डी वा मनोदण्डी तु नित्यशः ॥
कुटीचकं तु प्रदहेत्पूरयेच्च बहूदकम् ।

हंसं जले विनिक्षिप्य परहंसं विदारयेत् ॥
सपिण्डीकरणं नैव सर्वेषां स्मृतिशासनात् ।
अहन्येकादशे प्राप्ते पार्वणं श्राद्धमाचरेत् ॥
पिण्डयज्ञं सुतः कुर्याद्दर्शश्राद्धं मृतेऽहनि ।
यतेर्महालये दर्शे वा तस्य मृतवासरे ॥
पार्वणं स्यादितरेषामेकोद्दिष्टं तु वा भवेत् ॥

इति । सुमन्तुः—

औरसः क्षेत्रजो वाऽपि भ्राता वा तत्सुतोऽपि वा ।
कुर्यात्तु पार्वणं श्राद्धं शिष्यान्तेवासिभूमिपाः ॥
कुटीचके तु दर्शादौ पार्वणश्राद्धमाचरेत् ।
नारायणबलिं चैव पार्वणं तु बहूदके ॥
हंसे मृते सुतः कुर्यात्पार्वणं पितृयज्ञवत् ।
नारायणबलिं चैव तथा परमहंसके ॥
विष्णुं संपूज्य विधिवद्दत्त्वाऽर्घ्यं बलिमुत्तमम् ।
चरुं हुत्वा तु सूक्तेन पौरुषेण तु षोडश ॥
द्वादश ब्राह्मणान् भोज्य केशवाद्यैश्च नामभिः ।
यद्वा सर्वेषु कालेषु ब्राह्मणानेव भोजयेत् ॥

इति । स्कन्दपुराणेऽपि—

चतुर्थमाश्रमं गच्छेद्ब्रह्मविद्यापरायणः ।
एकदण्डी त्रिदण्डी वा सर्वसङ्गविवर्जितः ॥
एकादशेऽह्नि संप्राप्ते यदि वा द्वादशेऽहनि ।

पार्वणेन विधानेन श्राद्धं कुर्यात्तदौरसः ॥
प्रत्यब्दे दार्शिके श्राद्धे तीर्थेष्वपि महालये ।
संबन्धं नामगोत्रेण श्राद्धकालेषु नित्यशः ॥

इति । ब्रह्माण्डपुराणे—

क्षत्रियो यदि राजा चेद्विप्रधर्मेण पूजयेत्।
शूद्रो भवति भूपालो द्विजैर्मान्यस्स वैश्यवत् ॥
ब्रह्मचार्यनुपेतस्य मान्यस्तस्य तु नैष्ठिकः ।
द्वयोरपि गृहस्थस्तु त्रयाणां त्ववनीगुरुः ॥
चतुर्णां तु कुटीचस्स्यात्तेषां चैव बहूदकः ।
अधिकारस्तु सर्वेषां यतीनां प्रेतकर्मणि ॥
श्राद्धाधिकारो नैव स्याद्यतीनामौरसं विना ।
एकादशेऽहनि प्राप्ते विष्णुं संपूज्य यत्नतः ॥
ब्राह्मणान् भोजयेच्छक्त्या विष्णुरूपमनुस्मरन् ॥

इति । स्कान्दे नागरखण्डे—

स तथैवोपनीतस्य गृहस्थाश्रममाश्रितः ।
गुरुस्तयोर्व्रती श्रेष्ठस्तेषां संन्यासमाश्रितः ॥
संस्कारेऽपि त्रयो वर्णास्तथैवाश्रमिणश्च ये ।
यतीनां प्रेतकार्ये तु नरकं याति नान्यथा ॥
उदकं नात्र दातव्यं सपिण्डं श्राद्धमेव च ।
नारायणबलिं तस्य कुर्यादेकादशेऽहनि ॥ इति ॥

इति स्मृतिचन्द्रिकायां सपिण्डीकरणनिषेधे कानिचिद्वचनानि.

अथ नवमिश्रैकोद्दिष्टम् । तत्र याज्ञवल्क्यः—

एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकम् ।
आवाहनाग्नौकरणरहितं ह्यपसव्यवत् ॥
उत्तिष्ठतामित्यक्षय्यस्थाने विप्रविसर्जने ।
अभिरम्यतामिति वदेत् ब्रूयुस्तेऽभिरतास्स्म ह ॥

इति । तदेतत्प्रकरणबलान्नवश्राद्धनवमिश्रविषयम् । अत्रापि सपिण्डीकरणार्थैकोद्दिष्टे विशेषो बोधायनेन दर्शितः—

एकोद्दिष्टे निषिद्धेऽपि यद्यप्यावाहनादिके ।
तत्सपिण्डागते त्वेकोद्दिष्टे सर्वं समाचरेत् ॥
आवाहनं स्वधाशब्दं प्रेते बोधायनोऽब्रवीत् ।
न स्नेहपक्वगोधूमविकारो धूप उच्यते ॥
एकोद्दिष्टे न तद्द्यादेतत्सर्वं सापिण्डने ।
एकोद्दिष्टेषु सर्वेषु न च पूर्वं निमन्त्रणम् ।
सापिण्डीकरणार्थे तु पूर्वेद्युस्स्यान्निमन्त्रणम् ॥

इति । अत्र विशेषमाह व्यासः—

नवश्राद्धानि मिश्राणि सापिण्डीकरणं तथा ।
कृत्वा तु विधिवत्स्नायान्नैव स्नायान्मृतेऽहनि ॥ इति ॥

इति स्मृतिचन्द्रिकायां नवमिश्रैकोद्दिष्टनिरूपणम्.

अथ नवश्राद्धानि.

तत्र तावन्नवसंज्ञकानामन्तर्दशाहे क्रियमाणानां नवश्राद्ध-संज्ञामभिनिवेशयन्नाश्वलायनो दशाहपर्यन्तं नवश्राद्धं मन्यते। शिवस्वामी—

नवश्राद्धानि पञ्चाहुराश्वलायनशाखिनः।
आपस्तम्बाष्षडित्याहुर्विभाषामैतरेयिणः॥

इति। प्रजापतिः—

नवश्राद्धं दशाहान्तं मिश्रं संवत्सरादधि।
एकादशाहमारभ्य कुर्यात्प्रेतत्वमुक्तये॥

इति। वसिष्ठः—

सूतकान्तं नवश्राद्धं कुर्यादेकादशे शुचिः।
नवश्राद्धं दशाहानि नवमिश्रं षडन्वहम्॥

इति। अत्र षण्णवश्राद्धं केचिदाहुः। अङ्गिराः—

प्रथमेऽह्नि तृतीयेऽह्नि पञ्चमे सप्तमे तथा।
नवमैकादशे चैव षण्णवश्राद्धमुच्यते॥

इति। व्यासः—

आद्यादशाहं मरणाद्विषमेषु दिनेषु षट्।
नवश्राद्धान्यनुतिष्ठेदेकोद्दिष्टविधानतः॥

इति। स्कन्दपुराणे—

पञ्चमे सप्तमे तद्वत्तृतीये प्रथमे तथा।

नवमैकादशे चैव नवश्राद्धानि तानि वै ॥
वैतरण्या समं प्राप्तः प्रेतस्तृप्तिमवाप्नुयात् ।

इति । अत्र व्यवस्थामाह काश्यपः—

नवश्राद्धानि पञ्चाहुराश्वलायनशाखिनः ।
आपस्तम्बाष्षडित्याहुष्षड्वा पञ्चान्यशाखिनः ॥
केचित्पञ्चैव नवमं भवेदन्तरितं यदि ।
एकादशेऽह्नि तत्कुर्यादिति स्मृतिकृतो विदुः ॥

इति । अत्र नागरखण्डे विशेषोऽभिहितः—

नव सप्त विशां राज्ञां नवश्राद्धान्यनुक्रमात् ।
आद्यन्तयोर्वर्णयोस्तु षडित्याहुर्महर्षयः ॥

इति । स्मृत्यन्तरे—

सूतकान्ते गृहे श्राद्धमेकोद्दिष्टं प्रचक्षते ।

इत्यत्र 'सूतकान्ते गृहे' इति विशेषोपादानान्नवश्राद्धानि मरणस्थाने श्मशाने पिण्डोदकस्थाने वा कार्याणि ॥

इति स्मृतिचन्द्रिकायां नवश्राद्धनिरूपणम्.

अथ नग्नप्रच्छादनश्राद्धम् । तत्र गोभिलः—

नग्नप्रच्छादनं श्राद्धं स्नानान्ते तु मृतेऽहनि ।
घटे तण्डुलपूर्णे वा वाससा परिवेष्टिते ॥
पिधाय कांस्यपात्रेण तस्मिन्नाज्यं विनिक्षिपेत् ॥

हिरण्यं तत्र निक्षिप्य यथाविभवसारतः ।
कुलीनाय दरिद्राय श्रोत्रियाय कुटुम्बिने ॥
संप्रदद्यात्तदा भक्त्या विष्णुं च मनसा स्मरन् ।
प्रेतमुद्दिश्य संपूज्य ब्राह्मणं तु विसर्जयेत् ॥

इति । व्यासः—

वासस्तण्डुलमृत्पात्रं प्रदीपं कांस्यभाजनम् ।
दहनानन्तरं दद्यान्नग्नप्रच्छादनं हि तत् ॥

इति । संचयनाङ्गमपरं श्राद्धं तथैवोक्तम्—

तृतीयेऽहनि कर्तव्यं प्रेतदाहादिनाद्विजः ।

इति । कूर्मपुराणे विशेषोऽभिहितः—

प्रेताय च गृहद्वारि चतुर्थे भोजयेद्विजान् ।
द्वितीयेऽहनि कर्तव्यं क्षुरकर्म च बान्धवैः ॥
चतुर्थे बान्धवैस्सर्वैरास्थिसंचयनं चरेत् ।
पूर्वान् विप्रान् नियुञ्जीत युग्मांस्तु श्रद्धया शुचीन् ।
पञ्चमे नवमे चैव तथैवैकादशेऽहनि ।
युग्मान्विप्रांस्तु भुञ्जीयान्नवश्राद्धं ततो विदुः ॥

ब्रह्मपुराणे—

चतुर्थे ब्राह्मणानां च पञ्चमेऽहनि भूभुजाम् ।
नवमेऽहनि वैश्यानां शूद्राणां दशमेऽहनि ॥
प्रेतार्थं सूतकान्ते तु ब्राह्मणान् भोजयेद्दश ।
नवश्राद्धनिमित्तं तु एकमेकादशेऽहनि ॥ इति ॥

इति स्मृतिचन्द्रिकायां नग्नप्रच्छादनश्राद्धनिरूपणम्.

अथ नारायणबलिः.

ब्रह्मपुराणे—

नारायणबलिं वक्ष्ये व्यासेनोक्तं यथा पुरा ।
चण्डालोदकसर्पाद्यैर्विद्युज्ज्वालाविषादिभिः ॥
गिरिवृक्षाश्मभिश्शस्त्रैः पशुदंष्ट्रिनखिद्विजैः ।
मृतानां नैष्ठिकानां च यतीनां च तपस्विनाम् ॥
वैष्णवानां विशेषेण चान्येषां मोक्षकाङ्क्षिणाम् ।
मृतानां नैष्ठिकादीनां द्वादशेऽहनि कारयेत् ॥
संवत्सरात्परं कुर्याच्चण्डालाद्यैर्हतस्य च ।
आपत्तौ संकटे रोगे यद्वा देशविपर्यये ॥
कर्तृद्रव्यादिसंदेहे प्राणसंदेहदर्शने ।
यस्मिन्कस्मिन् दिने वाऽपि वत्सराद्बहिरेव चेत् ॥
उत्तरायणगे सूर्ये विषुवे चायनेऽपि वा ।
श्रोणायामथ रोहिण्यामेकादश्यां तु पक्षयोः ॥
पूर्वेद्युर्ब्राह्मणान् षड्वा निमन्त्र्य द्वादशापि वा ।
एकमाचार्यकं वृत्वा कुलशीलगुणान्वितम् ॥
सर्वावयवसंपूर्णं वेदशास्त्रार्थपारगम् ।
तत्र स्नानं मृदाऽद्भिश्च विधानेन समाचरेत् ॥
शुक्लाम्बरधरस्सम्यक्परिधायोत्तरीयकम् ।
उपवासं च संकल्प्य कर्ता तावज्जितेन्द्रियः ॥

प्रक्षाल्य पादावाचम्य उपविश्यासने शुभे ।
गोचर्ममात्रं संलिप्य गोमयेन च वारिणा ॥
कुण्डं वा स्थण्डिलं कृत्वा रक्तवर्णमृदादिभिः ।
उपलिप्य यथापूर्वं स्वशाखोक्तविधानतः ।
आहूय विप्रान् संपूज्य स्वस्तिवाचनमाचरेत् ॥
शोभोपशोभासंयुक्तं मनोहरतरं परम् ।
तन्मध्ये स्थापयेत्कुम्भं विष्णुं वैवस्वतं यमम् ॥
स्थापयेत्स्वर्णरौप्यादिकृतं तत्र प्रपूजयेत् ।
वस्त्राभ्यां स्वर्णरौप्येण गन्धपुष्पाक्षतैश्शुभैः ॥
पञ्चाङ्गुलं क्रमात्कुर्यादात्मशुद्धिपुरस्सरम् ।
आसाद्य द्रव्यपात्रादि कुर्यान्न्यासादिकं ततः ॥
गन्धपुष्पाक्षतादींश्च आदायावाहयेद्धरिम् ।
ओं नमो नारायणायेति मूलमन्त्रः प्रकीर्तितः ॥
वैवस्वताय च नमो यमाय च नमस्तथा ।
सर्वोपचारैस्संपूज्य गन्धमाल्यैर्मनोहरैः ॥
ऋग्यजुस्साममन्त्रैश्च स्तुत्वा तद्दैवतैर्हरिम् ।
नृत्तगीतादिवाद्यैश्च पुराणैश्चेतिहासकैः ॥
विष्णोर्नामसहस्रेण स्तुत्वा स्तोत्रकथादिभिः ।
त्रिवारं सम्यगभ्यर्च्य कुर्याज्जागरणं निशि ॥
पूर्वादिषु दळेष्वेवं केशवादीन् प्रपूजयेत् ।
मध्वाज्यतिलमिश्रेण पिण्डान् दद्यात्समाहितः ॥

अपसव्यमवाक्पाणिः पञ्च पिण्डान् कुशेषु तु ।
दक्षिणाभिमुखो भूत्वा ब्रह्मणे च शिवाय च ॥
यमाय विष्णवे चैव प्रेतं च मनसा स्मरन् ।
पत्न्यादिभ्यो न दद्यात्तु स्नात्वा गच्छेद्गृहं प्रति ॥
आचार्यः प्रातरुत्थाय स्नात्वा संध्यादि नैत्यकम् ।
कृत्वा चैव तु पूर्वाह्णे विष्णुं वैवस्वतं यमम् ॥
केशवादींश्च संपूज्य ब्रह्माणं शंकरं तथा ।
स्वगृह्यविधिमाश्रित्य होमं पश्चात्समाचरेत् ॥
विष्णोर्नुकं परोमात्रेत्याभ्यां हुत्वा तु पक्वतः ।
ओं नमो नारायणायैव यमाय ब्रह्मणे शिवे ॥
सूक्तेन पौरुषेणैव जुहुयात् षोडशाहुतीः ॥
नामभिः केशवाद्यैश्च समिदाज्यैस्समापयेत् ॥
ततो विप्रान् समाहूय देवार्थमुपवेशयेत् ।
प्रथमं चैव विष्ण्वर्थं यमं वैवस्वतं ततः ॥
विध्यर्थं तु ततो रौद्रं प्रेतार्थमपरं स्मृतम् ।
प्राङ्मुखान् देवकार्यार्थान् प्रेतार्थं च उदङ्मुखम् ॥
आवाहनादि यत्प्रोक्तं देवपूर्वं तदाचरेत् ।
अङ्गुलीयकवस्त्रादीन् यथाशक्ति समर्पयेत् ॥
अग्नौ करिष्य इत्येताननुज्ञाप्य प्रचोदितः ।
पितृयज्ञविधानेन कृत्वा संभोजयेद्द्विजान् ॥
तृप्तान् ज्ञात्वा ततो विप्रान् तृप्तिं पृष्ट्वा यथाविधि ।

मध्वाज्यतिलमिश्रेण पिण्डान् दद्यात्तु बर्हिषि ॥
विष्णवे प्रथमं दद्याद्ब्रह्मणे च शिवाय च ।
यमाय पञ्चमं पिण्डं दद्याद्वैवस्वताय च ॥
षष्ठं तु प्रेतमुद्दिश्य नामगोत्रमनुस्मरन् ।
विष्णोर्नाम गृहीत्वैव जलान्ते तान् समुत्सृजेत् ॥
होमान्ते द्वादशपक्षे विष्णुं वैवस्वतं यमम् ।
त्रिभिर्विप्रैस्समभ्यर्च्य पित्रादींश्च त्रिभिः पितॄन् ॥
मातामहादिकानन्यानाचार्यं प्रेतरूपतः ।
पार्वणेन विधानेन केशवाद्यैश्च नामभिः ॥
संपूज्य भोजयित्वा तु पिण्डान्ते बलिमुत्सृजेत् ।
ओंनमो नारायणायैव पित्रे चैव स्वधा नमः ॥
एवं मातामहादीनां बलिमुत्सृज्य नामभिः ।
ब्राह्मणान् भोजयित्वा तान् दद्यात्तेभ्यश्च दक्षिणाम् ॥
वस्त्रगन्धाक्षतैः पुष्पैराचार्यं सम्यगर्चयेत् ।
वृषं धेनुमनड्वाहौ स्वर्णं कांस्यमथापि वा ॥
वासो वा दक्षिणां दद्यात्प्रेतरूपेऽपि शक्तितः ।
गृहीत्वाऽऽशिषमध्येभ्यः प्रणिपत्य क्षमापयेत् ॥
सुताद्यो विधिमेतं तु कृत्वा तु प्राप्नयात्सुतान् ।
अकालमृत्युदोषाच्च मुच्यते नात्र संशयः ॥
इदं कर्म कृतं भक्त्या विष्णुलोकजिगीषया ।
इह कामानवाप्नोति विष्णुलोकं स गच्छति ॥

इति । सर्पहते त्वयं विशेषस्त्वष्टपुराणे दर्शितः—

सौवर्णभारनिष्पन्नं नागं कृत्वा तथैव गाम् ।
विप्राय विधिवद्दत्वा पितुरानृण्यमाप्नुयात् ॥

इति । अत्रापवाद आदित्यपुराणे दर्शितः—

प्रमादादपि निश्शङ्कमकस्मान्मृत्युना मृतिः ।
शृङ्गिदंष्ट्रिनखिव्याळविषाविद्युज्जलादिभिः ॥
चण्डालैरथवा चोरैर्निहतो यत्रकुत्रचित् ।
तस्य दाहादिकं कार्यं यस्मान्न पतितस्तु सः ॥

इति । अङ्गिराः—

यदि कश्चित्प्रमादेन म्रियतेऽग्न्युदकादिभिः ।
तस्याशौचं विधातव्यं दद्यात्पिण्डोदकक्रियाः ॥

इति । तत्रापि प्रायश्चित्तोत्तरकालमेव । गौतमः—'यस्य तु प्राणान्तिकं प्रायश्चित्तं स मृतश्शुध्येत्सवर्ण्येवोदकानि प्रेतकार्याणि कुर्युः' इति । शातातपः—

वृद्धश्शौचक्रियालुप्तः प्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥
तस्य त्रिरात्रमाशौचं द्वितीयेऽह्न्यस्थिसंचयः ।
तृतीये तूदकं दत्त्वा चतुर्थे श्राद्धमाचरेत् ॥

इति । अस्ति च भृगुपतनादौ विधिः । तथाच पुराणम्—

दुश्चिकित्सैर्महारोगैः पीडितस्तु पुमान् यदि ।
प्रविशेज्ज्वलनं दीप्तं कुर्यादनशनं तथा ॥

अगाधतोयराशिं वा........................॥

इत्यादि वक्ष्यते।

विप्राग्नुचदकचण्डालशृङ्गिदंष्ट्र्यभिशास्तितः।
अकामतो मृतानां तु दापयेदैन्दवद्वयम् ॥ इति ॥

इति स्मृतिचान्द्रिकायां नारायणबलिविधिः.

रजस्वलामरणे—

ग्राम्यालंकारसंयुक्तां तूष्णीं निर्हृत्य तां मृताम्।
यथोक्तविधिना मन्त्रैस्स्नाप्य गव्यैश्च पञ्चभिः॥
शतकुम्भोदकैस्स्नानं[1] दश द्वादश वा भवेत्।
मलापनोदनं कृत्वा अलंकारान्तरं तथा॥
वस्त्रान्तरावृतां कृत्वा दहेदेवं रजस्वलाम्।

गर्भिणीमृतौ संस्कारः—

मृता चेद्गर्भिणी नारी तस्यास्संस्कार उच्यते।
बोधायनभरद्वाजशौनकाद्यैर्यथोदितम्॥
पितृमेधं तु संकल्प्य कृत्वा दारुचितेः क्रियाम्।
पश्चाद्दारुचितेः प्रेतां दक्षिणे वा यथाविधि॥
निधाय गृह्यतन्त्राणि कृत्वाऽऽदर्वीविमार्जनम्।
हिरण्यगर्भमन्त्रेण विलिखेदसिनोदरम्॥

---

[1] शातकुम्भोदकैस्स्नानं, पा.

आगर्भदर्शनाद्ग्रामे मृतश्चेद्वटे क्षिपेत् ।
दृष्ट्वाऽथ मम पुत्रोऽसीति जीवन्तमभिमन्त्रयेत् ॥
अन्तर्धाय हिरण्यं तमभिषिच्य जलैश्शिशुम् ।
गत्वा ग्रामं शिशोर्दद्याद्यस्ते स्तन इति स्तनम् ॥
सुरक्षितं कुमारं तं कृत्वा गत्वा शवान्तिकम् ।
शतायुधाय स्योनान्तैः पञ्चभिस्तूदरे घृतम् ॥
यजुर्भिश्च प्रयासाय स्वाहेति द्वादशाहुतीः ।
प्राणायेत्यादिभिः पञ्च चक्षुषेत्यादिपञ्चभिः ॥
बोधायनाद्या इत्याहुर्व्याहृतीभिस्तु शौनकः ।
अभिषिच्य पुनर्मन्त्रैः द्विजानुज्ञामवाप्य च ॥
अव्रणं जठरं कृत्वा चितिमारोपयेच्छनैः ।
मृद्भिस्त्रिः कुशगोमूत्रैरापोहिष्ठादिभिस्त्रिभिः ॥
स्नाप्य वाऽऽच्छाद्य वासोभिश्शवधर्मेण दाहयेत् ।
इत्येतच्छौनकः प्राह आहुर्बोधायनादयः ॥
अष्टमे दिवसे दद्याद्धेनुभूम्यादि च द्विजे ।
यथाशक्ति भरद्वाज इत्येवं स्मृतिसंग्रहः ॥

सूतिकामरणे—

सूतिकायां मृतायां तु कथं कुर्वन्ति याज्ञिकाः ।
कुम्भे सलिलमादाय पञ्चगव्यं तथैव च ॥
पुण्यर्ग्भिरभिषिच्याथ वाचा शुद्धिं लभेत्ततः ।
पौरुषेण च सूक्तेन भविष्योक्ताभिरेव च ।

वामनेन च सूक्तेन शतकुम्भोदकेन च ।
यावदावर्तयेच्छुद्धिर्दास्त्रिवारं न्यूनतोऽशुचिः ॥
दर्भोदुम्बरपत्रैश्च पलाशाश्वत्थपञ्चमैः ।
शतकुम्भोदकैः पश्चात्प्रक्षाळ्याहतवाससा ॥
आच्छाद्य गन्धपुष्पाद्यैरलंकृत्य द्विजाज्ञया ।
दाहयेच्छवधर्मेण इति वाजसनेयिनः ॥

इति स्मृतिचन्द्रिकायां रजस्वलादिमरणे संस्कारविषयाणि.

पर्युषितादिदोषे प्रायश्चित्तम्—

दिवा वा यदि वा रात्रौ शवस्तिष्ठति कर्हिचित् ।
तत्पर्युषितमित्याहुर्दहने तस्य का गतिः ॥
पञ्चगव्येन संस्नाप्य प्राजापत्यं समाचरेत् ।
क्लिन्ने छिन्नेऽतिदुर्गन्धे स्नाप्य गोमयवारिणा ॥
तप्तकृच्छ्रं द्विजैर्लब्ध्वा पुण्याद्भिरभिषेचयेत् ।
क्रिमिरुत्पद्यते यत्र स्नाप्य गोमयवारिणा ॥
मृद्भस्मकुशगोमूत्रैः प्रक्षाळ्य च पुनःपुनः ।
तप्तकृच्छ्रैस्त्रिभिश्शुद्धिं लब्ध्वा दग्धं पुनर्दहेत् ॥
शवे चण्डालसंस्पृष्टे स्पृष्टो वा म्रियते यदि ।
चान्द्रायणं द्विजैर्लब्ध्वा स्नाप्य मन्त्रैः पुरोदितैः ॥
वस्त्राद्यैर्भूषितं कृत्वा शवधर्मेण दाहयेत् ॥

रजस्वलासूतिकयोः स्पर्शेऽन्त्यजशुनोर्यदि ।
मृतं वा म्रियमाणं वा चान्द्रस्सर्वत्र शोधकः ॥
विधिना तु भृगोःपातं श्वसूकरमृगादिभिः ।
न शोधयेत्तु संस्पृष्टं पुराणेष्वब्रवीन्मुनिः ॥
वृद्धो भिषक्क्रियात्यक्तश्शौचाचाराक्रियाऽक्षमः ।
स्वहस्तब्रह्महा स्तेयी सुरापी गुरुतल्पगः ॥
करीषाग्नौ दहेद्देहं भृगोः प्रपतनेन वा ।
नाशयेद्यावदायुष्यं गङ्गायमुनसंगमे ॥
महानदीं विशेद्वाऽपि न दोषोऽस्त्यत्र दुर्मृतौ ॥

आदिपुराणे—

दुश्चिकित्सैर्महारोगैः पीडितस्तु पुमान् यदि ।
प्रविशेज्ज्वलनं दीप्तं कुर्यादनशनं तथा ॥
अगाधतोयराशिं वा भृगोः पतनमेव वा ।
गच्छेन्महापथं वाऽपि तुषारगिरिमादरात् ॥
प्रयागवटशाखायां देहत्यागं करोति वा ।
गङ्गायमुनमध्यस्थसरस्वत्यां विशेन्मुदा ॥
उत्तमानाप्नुयाल्लोकान्नात्मघाती भवेत्क्वचित् ॥
वाराणस्यां मृतो यस्तु प्रत्याख्यातभिषक्क्रियः ।
काष्ठापाषाणमध्यस्थो* जाह्नवीजलमध्यगः ।
अविमुक्तस्थितस्तस्य कर्णमूलं गतो हरः ॥

* काष्ठपाषाणभूतस्तु. पा.

प्रणवं तारकं ब्रूते नान्यथा कस्यचित्क्वचित् ॥

इति । ब्रह्मगर्भः—

योऽनुष्ठातुमशक्तोऽपि महाव्याध्युपपीडितः ।
अब्धिवारिमहायात्रां कुर्वन्नामुत्र दुष्यति ॥ इति ॥

इति स्मृतिचन्द्रिकायां पर्युषितादिदोषे
प्रायश्चित्तादिनिरूपणम्.

अथ यतिसंस्कारविधिः.

तत्र यमः—

सर्वसंगनिवृत्तस्य ध्यानयोगरतस्य च ।
न तस्य दहनं कार्यं नाशौचं नोदकक्रिया ॥
शुचौ देशेऽथ गायत्र्या देहं प्रक्षाळ्य वारिणा ।
मधुना सर्पिषाऽभ्यज्य प्रक्षाळ्य च सुगन्धिभिः ।
हिरण्यवर्णा इत्याभिरापोहिष्ठादिभिस्त्रिभिः ।
पवमानानुवाकेन शुद्धवत्या तरत्समैः ॥
शुचीवोऽग्निश्शुचीत्यृग्भिः प्रवदाजातवेदसा ।
पवित्रं तेऽथ चरणं पवित्रमिति च त्रिभिः ॥
अभिषिच्य कुशाग्रैर्वा द्विजानुज्ञामवाप्य च ।
अलंकृत्य च गायत्र्या गन्धमाल्यैस्समन्ततः ॥
दृढे शिक्ये निधायाथ वहेयुर्ब्राह्मणा दृढम् ॥
तेषां हि वहतामत्र सद्यश्शौचं विधीयते ॥

खनित्वा तु शनैर्भूमिं शिरोमात्रं तदन्तरे ।
निक्षिप्य स्नानमात्रेण शुद्धिं स्वायम्भुवोऽब्रवीत् ॥

इति । बोधायनः—

अथ संन्यासिनां धर्मो मृतानां विधिरुच्यते ।
ग्रामात्प्राचीमुदीचीं वा गत्वा यद्वाऽन्यतो दिशम् ॥
ब्रह्मवृक्षस्य वाऽधस्तादश्वत्थस्य शमीतरोः ।
खात्वा वा यज्ञवृक्षस्य नदीतीरे शुचिस्थले ॥
गर्तं सप्तव्याहृतिभिः खातं प्रोक्ष्याथ सप्तभिः ।
आस्तीर्याथ कुशानद्भिः प्रणवेनाभिमन्त्रयेत् ॥
शवं पञ्चामृतैः स्नाप्य सूक्तेन पुरुषेण च ।
गन्धमाल्यैरलंकृत्य शिक्येनादाय धार्मिकः ॥
निदधाति शवं श्वभ्रे प्राङ्मुखोदङ्मुखं च वा ।
विष्णो हव्यं रक्षस्वेति इदं विष्णुर्विचक्रमे ॥
अनेन दक्षिणे हस्ते दण्डं स्थाप्याथ कुण्डके ।
यदस्य पारे रजस इति शिक्यं निधापयेत् ॥
येन देवाः पवित्रेण मुखे जलपवित्रकम् ।
सावित्र्या प्रणवेनैव उदरे ब्रह्मभाजनम् ॥
भूमिर्भूमिमगान्मातेत्यृचा मध्ये* कमण्डलुम् ॥
चित्तिस्स्रुगिति दशभिर्होतृभिश्चानुमन्त्रयेत् ॥
सिकतैः पांसुभिश्श्वभ्रं संपूर्य श्वापदादिभिः ।

---

* गुह्ये. पा.

अभेदनं यथा तद्वत्ततो मार्जनलेपनैः ॥
अलंकृत्य सुगन्धाद्यैस्ततो गर्ते महाजले ।
स्नानमात्रेण शुद्धिस्स्यान्न विधिर्नोदकक्रिया ॥

इति । अत्र ज्ञातिभिरपि सचेलस्नानमात्रं कर्तव्यम् । तथाच स्मृत्यन्तरं—

पुत्रो भ्राताऽथ दौहित्रस्सपिण्डश्शिष्य एव वा ।
यतिं स्पृशन् वहित्वाऽपि सद्यस्स्नानेन शुध्यति ॥
संनिकृष्टैस्तु संन्यस्ते पितर्युपरते सुतैः ।
दहनं चैव कर्तव्यं यच्चान्यच्च स्वशक्तितः ॥
पितृमेधविधानेन दहेदुत्तपनाग्निना ।
अपि होतृविधानेन गायत्र्या प्रणवेन वा ॥
जलावगाहनादेव स्पृष्ट्वा शुद्धास्तु गोत्रिणः ।
अश्वमेधफलं यान्ति दग्ध्वा संबन्धिनो द्विजाः ॥
अहन्येकादशे प्राप्ते पार्वणं तु विधीयते ।
सपिण्डीकरणं तेषां न कर्तव्यं सुतेन तु ।
त्रिदण्डग्रहणादेवाप्रेतमहोशना मुनिः ॥
कुटीचकं च प्रदहेत्पूरयेच्च बहूदकम् ।
हंसो जले विनिक्षेप्यः परं हंसं विदारयेत्* ॥ इति ॥

इति स्मृतिचन्द्रिकायां यतिसंस्कारविधिः

---

* प्रपूरयेत्. पाठान्तरम्.

अथ गङ्गाम्भस्यस्थिनिक्षेपः.

तत्र शाण्डिल्यः—

द्वारवत्यां सेतुबन्धे गोदावर्यां च पुष्करे ।
अस्थीनि विसृजेद्यस्य स मृतो मुक्तिमाप्नुयात् ॥

इति । शङ्खलिखितौ—

गङ्गायां च प्रयागे च केदारे पुष्करोत्तमे ।
अस्थीनि विनिवर्त्यक्त्वा गयायां पिण्डदो भवेत् ।
पित्रो ऋणात्प्रमुच्येत तौ नित्यं मोक्षगामिनौ ॥

इति । योगयाज्ञवल्क्यः—

गङ्गायां यमुनायां वा कावेर्यां वा शुतुद्रुतौ ।
सरस्वत्यां विशेषेण ह्यस्थीनि विसृजेत्सुतः ॥

इति । शालंकायनः—

अस्थिसंचयनं कृत्वा स्वगृह्योक्तविधानतः ।
कुम्भे निधाय चास्थीनि कुम्भं भूमौ विनिक्षिपेत् ॥
तत्स्पृष्ट्वा शिष्टमन्त्राणां जपतः कर्म सिध्यति ।
अस्थिशुद्धिं विधायैव वृक्षाग्रे वा शुभे स्थले ॥
निधाय यात्रापर्यन्तं रक्षां कुर्याद्विचक्षणः ।
निक्षिपेत्पूर्वतो भूमौ षण्मासं नावलोकयेत् ॥
त्रिपक्षं वा त्रिमासं वा भूमेरुद्धरणं न च ।
अनित्यत्वाच्छरीरस्य कालद्रव्यादिसंभवे ॥

मासादिषु व्यतीतेषु अस्थीन्युद्धर्तुमिच्छति ।
त्र्यब्दमब्दद्वयं चैकं कृच्छ्रं मासाद्यनुक्रमात् ।

कृत्वेति शेषः ।

ततस्तद्दोषशान्तिस्स्यादन्यथा नरकं व्रजेत् ।
महातीर्थे दुर्मरणे दशाहाभ्यन्तरे सुतः ॥
अस्थिसंचयनं शुद्धिं कृत्वाऽम्भसि विनिक्षिपेत् ।
अर्धोदके मृतिर्यस्य तं दग्ध्वा विधिवद्बहिः ॥
अस्थिसंचयनार्थानां मन्त्राणां जपपूर्वकम् ।
तिलैराज्येन मधुना हिरण्यशकलैर्जलैः ॥
दुग्धेनाग्निं प्रशाम्यैव गङ्गाम्भसि विनिक्षिपेत् ॥

इति । आपस्तम्बोपि—'चतुर्थेऽह्न्यस्थिसंचयनं तेषां गङ्गाम्भसि प्रक्षेपः' इति । अस्थ्युद्धरणप्रकारमाह जयन्तः—

कर्तुर्जन्मत्रयं भद्रां त्रिपादृक्षाणि वर्जयेत् ।
भौमभृग्वर्कवारांश्च भद्राख्यं करणं तथा ॥
कीकसोद्धरणार्थाय तद्देशं बन्धुभिस्सह ।
गत्वा तत्र नमस्कृत्य प्राणायामपुरस्सरम् ॥
संकल्प्याप उपस्पृश्य मन्त्रमेतदुदीरयन् ।
सर्वंसहे वसुमति त्वयि सर्वं लयं गतम् ॥
त्वं गर्भरक्षितं देहि मत्पित्राद्यस्थि पावने ।
इति संप्रार्थ्य भूदेवीं भूमिर्भूमिं जपेच्छनैः ॥
काष्ठेन खननं कृत्वा ह्यस्थीन्यादाय कुम्भतः ।

कुम्भो यथा न चलति तथा कार्यं प्रयत्नतः ॥
कुम्भसंपूरणं कुर्याद्गन्धपुष्पफलैर्मृदा ।
भूमिं पूर्वसमां कुर्याद्बलिं तत्र विनिक्षिपेत् ॥
बह्वन्नपानभक्ष्याद्यैर्यथा तृप्तिं प्रयाति सा ।
ततोऽनुमन्त्रयेदेतां बलिस्थेति त्र्यृचेन च ॥
ततो गृहीत्वाऽस्थि सुतो नदीतीरे निधाय तत् ।
प्रक्षाळ्य पञ्चगव्येन पञ्चामृतविधानतः ॥
शातकुम्भोदकैस्सम्यगेषाऽन्या शुद्धिरीरिता ।
स्पृष्ट्वा स्पृष्ट्वा तदस्थीनि शतवारं मृदादिभिः ॥
स्नानं कुर्युर्विधानज्ञाः ब्राह्मणा भूतभावनाः ।
अदैवं दैवतं कुर्युर्दैवतं च सुदैवतम् ॥
ब्राह्मणाश्च महाभागास्तेभ्यो दद्याच्च दक्षिणाम् ।
कर्ता स्नानं स्वशुद्ध्यर्थं कुर्याद्वा कारयेत वा ॥
मृत्तिकाख्यं स्वशक्त्या तु त्रिंशद्वा पञ्चविंशतिः ।
ततः कुम्भोदकैः कुर्युराभिषेकं शतादिवत् ॥
श्रीरुद्रपवमानाभ्यां सूक्तैर्विष्ण्वादिसंज्ञितैः ।
तेषु ध्यायेद्वसून् रुद्रानादित्यान् पितृदेवताः ॥
शिवं विष्णुं तथेन्द्रादीन् सर्वाश्चैवेष्टदेवताः ।
अर्चयेद्गन्धपुष्पाद्यैर्नैवेद्यान्तैर्यथाविधि ॥
नमस्कृत्य विधानज्ञं दक्षिणाभिश्च तोषयेत् ॥
आविकाजिनवस्त्रैश्च क्षौमकौशयवर्णकैः ।

कुशरज्ज्वा दृढं बध्वा गङ्गाम्भसि विनिक्षिपेत् ॥

इति । आदिपुराणे—

गङ्गा भागीरथी यत्र सन्निधानं करोत्यथ ।
अस्थ्नां तत्राम्भसि क्षेपो ब्रह्मलोकाय कल्पते ॥

अस्थीनि मातापितृपूर्वजानां नयन्ति गङ्गाम्भसि ये कदाचित्।
तद्बान्धवस्यापि दयाभिभूतास्तेषां च तीर्थानि फलप्रदानि ॥
स्नात्वा ततः पञ्चगव्यैर्निषिच्य हिरण्यमध्वाज्यतिलैर्विकीर्य ।
अस्थीनि मृत्पिण्डपुटे निधायपश्यन् दिशं पितृराजोपगूढाम् ॥
नमोऽस्तु धर्माय इति प्रविश्य जले स मे प्रीत इति क्षिपेच्च ।
उत्थाय भास्वन्तमवेक्ष्य सूर्यं स दक्षिणां विप्रमुख्याय दद्यात्॥
एवं कृते प्रेतपुरे स्थितस्य स्वर्गे गतिस्स्याच्च महेन्द्रतुल्या ॥

इति । महाभारते—

यावदस्थि मनुष्यस्य गङ्गातोयेषु तिष्ठति ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥

इति । ब्रह्मपुराणे—

अस्थीनि मातापितृपूर्वजानां दशाश्वमेधे तु नरो नभस्ये ।
कृष्णाष्टम्यां पञ्चगव्यैर्निषिच्य हिरण्यमध्वाज्यतिलैर्विकीर्य ॥
पुण्ये तु मृत्पिण्डपुटे निधाय नमोऽस्तु धर्माय इति ब्रुवंश्च ।
क्षिपेज्जले पितृतीर्थेन भक्त्या नत्वाऽथ सूर्यं प्रयतः प्रपश्येत्
यथाशक्त्या दक्षिणां चापि दत्वा पितॄन् सर्वान् ब्रह्मलोकं-
नयेत्सः ॥

नभस्यस्यापरे पक्षे अष्टम्यां मध्यगे रवौ ।
ब्राह्मणानुज्ञयाऽस्थीनि गङ्गाम्भसि विनिक्षिपेत् ॥
एवं कृते महापापी सुरापी गुरुतल्पगः ।
सर्वपातकयुक्तोपि मुक्तस्स्यान्नात्र संशयः ॥

इति । पद्मपुराणे—

अस्थ्नां कृत्वा तु संशुद्धिं केशवाद्यैश्च नामभिः ।
पञ्चगव्येषु निक्षिप्य गन्धाद्यैस्संप्रपूजयेत् ॥
द्विजानुज्ञामवाप्यैव गङ्गायां सुसमाहितः ।
संकल्पप्रयतस्तस्य चोच्चरन् गोत्रनामनी ॥
अघमर्षणसूक्तेन धर्मायैव नमोस्त्विति ।
विसर्जयेत्ततोऽस्थीनि यावदस्थीनि तज्जपेत् ॥ इति ॥

इति स्मृतिचन्द्रिकायामस्थिनिक्षेपप्रकारः.

अथ गयाश्राद्धविधिः.

तत्रादिपुराणम्—

उद्यतस्तु गयां गन्तुं श्राद्धं कर्तुं विधानतः ।
विधाय कर्पटीवेषं ग्रामस्यापि प्रदक्षिणम् ॥
ततो ग्रामान्तरं गत्वा श्राद्धशेषस्य भोजनम् ।
कृत्वा प्रदक्षिणं गच्छेत्प्रतिग्रहविवर्जितः ॥

स्वगृहे घृतप्रधानद्रव्यं श्राद्धं नवदेवत्यं निर्वर्त्य श्राद्धशेषघृतं गृहीत्वा ग्रामं प्रदक्षिणीकृत्य ग्रामान्तरं गत्वा तत्र भुक्त्वा तमपि

प्रदक्षिणीकृत्य प्रतिग्रहादिविवर्जितो गच्छेदित्यर्थः । प्रतिग्रह-विसर्जनं चागयाश्राद्धपरिसमाप्तेः ।

अनेनैव विधानेन गत्वा चोत्तरमानसम् ।
आचम्य कुशहस्तस्तु शिरस्यभ्युक्ष्य वारिणा ।
अब्रुवन् स्थानमध्ये तु गच्छेत्कनकसंज्ञितम् ॥

अब्रुवान्निति व्यर्थवाग्व्यवहारनिषेधः ।

तत्राचम्य शिरस्सिक्त्वा ब्रूयादादित्यमीक्ष्य च ।
गयायां सरसो मध्ये स्नात्वा पैतामहं परम् ॥
दृष्ट्वा स्थानं प्रविश्याथ श्राद्धं कुर्याद्यथाविधि ।
पितृव्यमातुलादीनां तथैकोद्दिष्टमेव च ॥
वाप्यां स्नानं मतङ्गस्य धर्मपृष्ठे परेऽहनि ।
श्राद्धपिण्डौ ततः कार्यौ मध्याह्ने कूपयूपयोः ॥

पिण्डदानस्य पृथगुपादानं गयायां तस्य प्राधान्यद्योतनार्थम् ।

ब्रह्मणस्सरसि स्नात्वा कृत्वा यूपप्रदक्षिणम् ।
तृतीयदिवसे कुर्याच्छ्राद्धं पिण्डावसेचनम् ॥
महानद्यामुपस्पृश्य तर्पयेत्पितृदेवताः ।
अक्षयान् लभते लोकान् कुलं चैव समुद्धरेत् ॥
गयाशिरसि तत्कुर्याच्छ्राद्धपिण्डौ चतुर्थके ।
पञ्चमे दिवसे गच्छेद्वटमक्षयसंज्ञकम् ॥
गयायां मुण्डपृष्ठे च सर्वपापैः प्रमुच्यते ।
गयाशीर्षे यदा श्राद्धं नाम्ना येषां तु निर्वपेत् ॥

नरकस्था दिवं यान्ति स्वर्गस्था मोक्षमाप्नुयुः ।
स्वर्गपाताळमध्ये तु नास्ति तीर्थं गयासमम् ।
पितरो यान्ति देवत्वं दत्ते पिण्डे गयाशिरे ॥
मुण्डपृष्ठे पदं न्यस्तं महादेवेन धीमता ।
बहून्यब्दसहस्राणि तपस्तप्त्वा सुदुष्करम् ॥
अल्पेनाप्यत्र कालेन नरो धर्मपरायणः ।
पापाद्विमोचयत्याशु जीर्णां त्वचमिवोरगः ॥
गयाकूपे नरस्स्नात्वा कृत्वा तर्पणमेव च ।
वटवृक्षतले श्राद्धं ततः कुर्याद्विधानतः ॥
तत्राक्षयवटो नाम त्रिषु लोकेषु विश्रुतः ।
पितॄणां तत्र यद्दत्तमक्षय्यं तद्भवेद्ध्रुवम् ॥
वटमूलं समाश्रित्य शाकेनाप्युदकेन वा ।
एकस्मिन भोजते विप्रे कोटिर्भवति भोजिता ॥
तीर्थानामुत्तमं तीर्थं गया त्रैलोक्यविश्रुता ।
दत्त्वा पिण्डोदके तत्र दृष्ट्वा च प्रपितामहम् ॥
अक्षयान् लभते लोकान् कुलं चैव समुद्धरेत् ।
उद्धृताः पितरस्सर्वे धर्मेण किमतः परम् ॥
श्रूयते पितृभिश्चैव गीता गाथा महामुने ॥
अपि नस्ते भविष्यन्ति कुले सन्मार्गगामिनः ।
गयामुपेत्य ये पिण्डान् दास्यन्त्यस्माकमादरात् ॥
शुक्लकृष्णावुभौ पक्षौ गयायां यो वसेन्नरः ।

पुनात्यासप्तमं चैव कुलं नास्त्यत्र संशयः ॥
गयां प्राप्तं सुतं दृष्ट्वा पितॄणामुत्सवो भवेत् ।
पद्भ्यामपि जलं स्पृष्ट्वा अस्मभ्यं किं न दास्यति ॥
गृहाच्चलितमात्रस्य गयाया गमनं प्रति ।
स्वर्गारोहणसोपानं पितॄणां तु पदेपदे ॥
ब्रह्मघ्नस्य सुरापस्य बालघ्नस्य गुरुद्रुहः ।
नाशमायाति वै पापं गयां समनुयाति यः ।
ब्रह्महा च कृतघ्नश्च गोघाती पञ्चपातकी ।
सर्वे ते निष्कृतिं यान्ति गयायां पिण्डपातनात् ॥
मकरे वर्तमाने तु ग्रहणे चन्द्रसूर्ययोः ।
दुर्लभं त्रिषु लोकेषु गयायां पिण्डपातनम् ॥
गयायामक्षयं श्राद्धं जपहोमतपांसि च ।
पितृक्षयो हि तत्पुण्यं तस्मात्तत्राक्षयं भवेत् ॥
भरतस्याश्रमे पुण्ये नित्यं पुण्यतमैर्वृते ।
मतङ्गस्य पदं पुण्यं दृश्यते सर्वमानुषैः ॥
ततो गयां समाश्रित्य ब्रह्मचारी जितेन्द्रियः ।
अश्वमेधमवाप्नोति गमनादेव भारत ॥

ब्रह्मचर्यं ऋतुकालादन्यत्र बोद्धव्यम् ।

ततो गच्छेत्तु राजेन्द्र धेनुकं लोकविश्रुतम् ।
तत्र चिह्नं महाराज अद्यापि सुमहाद्भुतम् ॥
कपिलायास्सवत्साया दृश्यन्ते कुरुनन्दन ।

विचरन्त्याः पदानि स्म कर्दमे नृपसत्तम ॥
तेषूपस्पृश्य राजेन्द्र पदेषु भरतर्षभ ।
यत्किंचिदशुभं पुंसां तत्प्रणश्यति भारत ॥
ततो गृध्रवटं गच्छेत् स्थानं देवस्य धीमतः ।
स्नात्वा तु भस्मना तत्र अभिगम्य वृषध्वजम् ॥
ब्राह्मणेन भवेच्चीर्णं व्रतं द्वादशवार्षिकं ।
इतरेषां तु वर्णानां सर्वपापक्षयो भवेत् ॥
ततो गच्छेत्तमुद्यन्तं पर्वतं लोकविश्रुतम् ।
सावित्र्यास्तत्र दृश्यन्ते पदानि भरतर्षभ ॥
तत्र संध्यामुपासीत ब्राह्मणश्शंसितव्रतः ।
उपासिता भवेत्संध्या तेन द्वादशवार्षिकी ॥
योनिद्वारं तु तत्रैव विद्यते भरतर्षभ ।
तत्र गत्वा विमुच्यन्ते पुरुषा योनिसंकटात् ॥
ततः पक्वादते राजन् तीर्थसेवी यथाक्रमम् ।
विपुलां धनसिद्धिं च सिद्धिं च महतीं लभेत् ॥
ततो गच्छेत राजेन्द्र धर्मपृष्ठं समाहितः ।
तत्र धर्मो महाराज नित्यमास्ते युधिष्ठिर ॥
तत्राधिगम्य राजेन्द्र हयमेधफलं लभेत् ।
ततो त्रिशल्यमासाद्य नरस्त्रैलोक्यविश्रुतम् ॥
अग्निष्टोममवाप्नोति स्वर्गलोकं च गच्छति ।
तथा माहेश्वरं धाम समासाद्य नरश्शुचिः ।

पितृमेधमवाप्नोति कुलं चैव समुद्धरेत् ॥
दिवौकसान्धंकरणीं समासाद्य जितेन्द्रियः ।
न दुर्गतिमवाप्नोति वाजपेयं च विन्दति ॥
अथ माषपदं गच्छेत् ब्रह्मचारी दृढव्रतः ।
तत्र माषपदे स्नात्वा वाजपेयफलं लभेत् ॥
तत्र कोटिस्तु तीर्थानां विश्रुता भरतर्षभ ।
तत्राभिषेकं कुर्वीत तीर्थकोट्यां श्रितव्रतः ॥
पुण्डरीकमवाप्नोति विष्णुलोकं च गच्छति ॥

पुण्डरीकशब्देन पौण्डरीकयागोऽभिधीयते ।

गोप्रचार..................ब्रह्मप्रकल्पिताः ।
तेषु संसक्तमात्रेषु पितरो मोक्षमाप्नुयुः ॥
एको ह्यृषिस्तु प्रवराग्रहस्त आम्रेषु मध्ये सलिलं ददाति ।
आम्राश्च सिक्ताः पितरश्च तृप्ता एका क्रिया द्व्यर्थकरी बभूव ॥
या सा वैतरणी नाम नदी त्रैलोक्यविश्रुता ।
साऽवतीर्णा महाभागा पितॄणां तारणाय वै ॥
तत्र गत्वा नरः स्नात्वा गोदानं प्रकरोति यः ।
एकविंशतिवंश्यान्वै तारयेन्नात्र संशयः ॥
महानदी ब्रह्मसरोऽक्षयो वटः प्रभासमुद्यन्तमथो गयाशिरः ।
सरस्वती धेनुकधर्मपृष्ठे एते कुरुक्षेत्रसमा गयायाम् ॥
यदि पुत्रो गयां गच्छेत्कदाचित्कालपर्ययात् ।

तानेव भोजयेद्विप्रान् ब्रह्मणा ये प्रकल्पिताः ॥
येषां ब्रह्मसदः स्थानं[1] सोमपानं तथैव च ।
ब्रह्मकल्पितसंस्काराः विप्रा ब्रह्मसमाः स्मृताः ॥
वासो देहपरित्यागो गयायां तु विधीयते ।
श्राद्धं पिण्डोदके चैव गयायां परिकीर्तितम् ॥
यः करोति वृषोत्सर्गं गयाक्षेत्रे ह्यनुत्तमे ।
अग्निष्टोमसमं पुण्यं लभते नात्र संशयः ॥
तत्कूपयूपयोर्मध्ये पिण्डं दद्यान्महीतले ।
कूपोदकेन तत्कृत्वा पितॄणां दत्तमक्षयं ॥
ब्रह्मणा सदसि ब्राह्मे यूपः पुण्यः प्रकल्पितः ।
यूपं प्रदक्षिणीकृत्य वाजपेयफलं लभेत् ॥
नाम्ना कनकनन्देति तीर्थं चातिपवित्रकम् ॥
उदीच्यां मुण्डपृष्ठस्य ब्रह्मर्षिगणसेवितम् ।
तत्र स्नात्वा दिवं यान्ति स्वशरीरेण मानवाः ॥
दत्तं चापि सदा श्राद्धमक्षय्यं समुदाहृतम् ।
तत्र पुष्करिणी रम्या सुषुम्ना नाम नामतः ॥
स्नात्वा ऋणत्रयात्तत्र मुच्यते क्षीणकल्मषः ।
श्राद्धं भवति चानन्तं तत्र दत्तं महोदयम् ॥
तारयेच्च सदाश्राद्धी दश पूर्वान् दशापरान् ॥
मानसे सरसि स्नात्वा श्राद्धं निर्वर्तयेत्ततः ।

[1] ब्रह्मसरस्स्नानम्.

तीरे तु तस्य सरसो देवस्यायतनं महत् ॥
आरुह्य तु विमानं च सद्यो याति दिवं नरः ।
उत्तरं मानसं गत्वा सिद्धिं प्राप्नोति चोत्तमाम् ॥

तस्मिन्निर्वर्तयेच्छ्राद्धं यथाविभवमादरात् ।
कामांश्च लभते दिव्यान् मोक्षोपायं च विन्दति ॥

मानसे सरसि श्रेष्ठे दृश्यते महदद्भुतम् ।
दिव्यश्रुतश्च नक्षत्रग्रहशब्दो निशाम्यते ॥

गयायां गृध्रवटे च श्राद्धं दत्वा महाफलम् ।
गोगयायाश्शिरो यत्र तत्र पुण्या महानदी ॥

ऋषिदेवैस्सदा जुष्टं तीर्थं ब्रह्मसरस्तथा ।
यत्फलं संनिहत्यायां राहुग्रस्ते दिवाकरे ।
फलं तदखिलं प्रोक्तं गयायां तु दिनेदिने ॥

नन्दन्ति पितरस्तस्य सुवृष्टैरिव कर्षकाः ।
गयागतोऽन्नदाता यः पितरस्तेन पुत्रिणः ॥

यद्ददाति गयास्थश्च सर्वमानन्त्यमश्नुते ।
तथा वर्षत्रयोदश्यां मघासु च न संशयः ॥

इति स्मृतिचन्द्रिकायां गयाश्राद्धविधिनिरूपणम्.

अथ गयाश्राद्धाधिकारिणः.

तत्र पुत्रादयोऽधिकारिणो ज्ञेयाः । विशेषस्तूच्यते—

‘पुत्रेषु विद्यमानेषु नान्यं वै कारयेत्स्वधाम् ।’

इति ऋश्यशृङ्गवचनस्यायमपवादः—

आत्मजो वाऽन्यजो वाऽपि गयाकूपे यदाकदा ।
यन्नाम्ना पातयेत्पिण्डं तं नयेद्ब्रह्म शाश्वतम् ॥

इति । तथाऽन्योपि विशेषः—

आत्मनस्तु महाबुद्धे गयायां तु तिलैर्विना ।
पिण्डनिर्वापणं कुर्यात्तथाऽन्या अपि गोत्रजाः ॥

अन्या इति छान्दसम् । अस्मादेव वचनादन्यत्र आत्मनः पिण्डदानं न कार्यमित्यवगम्यते । तथा—

सवर्णा ज्ञातयो मित्रा बान्धवास्सुहृदस्तथा ।
तेऽपि भूप गयाकूपे पिण्डान् दद्युर्विधानतः ॥

इति । मित्रा इति छान्दसम् ।

‘न पुत्राय पिता दद्यान्न ज्येष्ठस्तु कनीयसे ।
न पत्न्यै च पतिर्दद्यादेष धर्मस्सनातनः’ ॥

इत्यस्यापि गयायामपवादमाह गोभिलः—

पुत्रेभ्योपि पिता दद्यात्कनिष्ठेभ्योपि पूर्वजः ।
दद्यात्पिण्डं प्रयत्नेन गयायां तु समाहितः ॥

इति । अपिशब्दात्पत्न्या अपि भर्ता पिण्डं दद्यात् । तथा—

पित्रोस्तु जीवतोर्दद्याद्गयायां पिण्डमेव च ।
बदरेण च तद्दद्याद्यवान्नेन फलेन वा ॥
उपवीत्येव तत्कुर्याद्दाधियुक्तैस्तथा तिलैः ।
अतस्सर्वे दिवं यान्ति पिण्डदानादिति श्रुतिः ॥
तस्मात्तेभ्योपि यत्नेन दद्यात्पिण्डं विधानतः ।

इति । वृद्धशातातपः —

प्रीत्या गयायां पिण्डांस्तु सर्वेषां वर्णलिङ्गिनाम् ।
स्वयं कुर्वन्नरस्सम्यङ्महतीं श्रियमाप्नुयात् ॥

इति । मरीचिः—

न कर्तव्यं हि विप्रेण शूद्राणामौर्ध्वदैहिकम् ।
शूद्रेण ब्राह्मणस्यापि विना पापवशात्काचित् ॥ इति ॥

इति गयाश्राद्धाधिकारिनिरूपणम् ॥

इति श्री सकलविद्याविशारद श्रीकेशवादित्यभट्टोपाध्याय-
सूनु याज्ञिकदेवणभट्टोपाध्यायसोमयाजि-
विरचितायां स्मृतिचन्द्रिकायां
आशौचकाण्डः
समाप्तः.